# અહો! શ્રુતજ્ઞાનમ્
## ગ્રંથ જીર્ણોદ્ધાર



-: સંયોજક :-

**શ્રી આશાપૂરણ પાર્શ્વનાથ જૈન જ્ઞાનભંડાર**
શા. વિમળાબેન સરેમલ જવેરચંદજી બેડાવાળા ભવન
હીરાજૈન સોસાયટી, સાબરમતી, અમદાવાદ-૩૮૦૦૦૫.
મો. ૯૪૨૬૫ ૮૫૯૦૪ (ઓ.) ૦૭૯-૨૨૧૩૨૫૪૩

# "અહો શ્રુતજ્ઞાનમ્" ગ્રંથ જીર્ણોધ્ધાર ૯૫

## સ્યાદ્વાદ રત્નાકર ભાગ-૫

**: દ્રવ્ય સહાયક :**

પ.પૂ. આગમોદ્ધારક આનંદસાગરસૂરીશ્વરજી મ.સા.ના સમુદાયના
પૂજ્ય સાધ્વીજી શ્રી જીતેન્દ્રશ્રીજી મ.સા.ના શિષ્યા
પૂજ્ય સાધ્વીજી શ્રી ઇન્દ્રિયદમાશ્રીજી મ.સા.ના શિષ્યા
પૂજ્ય સાધ્વીજી શ્રી આત્મજયાશ્રીજી મ.સા.,
પૂજ્ય સાધ્વીજી શ્રી મુક્તિરત્નાશ્રીજી મ.સા.,
પૂજ્ય સાધ્વીજી શ્રી વિરાગરત્નાશ્રીજી મ.સા.,
પૂજ્ય સાધ્વીજી શ્રી ભક્તિરત્નાશ્રીજી મ.સા.
આદિ ઠાણા-૪ ની પ્રેરણાથી શ્રી હરીપુરા અસારવા મૂ.પૂ. જૈન સંઘ
અસારવા, અમદાવાદના જ્ઞાનખાતાની ઉપજમાંથી

**: સંયોજક :**

શાહ બાબુલાલ સરેમલ બેડાવાળા
શ્રી આશાપૂરણ પાર્શ્વનાથ જૈન જ્ઞાનભંડાર
શા. વીમળાબેન સરેમલ જવેરચંદજી બેડાવાળા ભવન
હીરાજૈન સોસાયટી, સાબરમતી, અમદાવાદ-380005
(મો.) 9426585904 (ઓ.) 22132543

સંવત ૨૦૬૭ ઈ.સ. ૨૦૧૧

"Aho Shrut Gyanam"

## અહો શ્રુતજ્ઞાનમ્ ગ્રંથ જીર્ણોદ્ધાર – સંવત ૨૦૬૫ (ઈ. ૨૦૦૯)– સેટ નં-૧

| ક્રમાંક | પુસ્તકનું નામ | કર્તા-ટીકાકાર-સંપાદક | પૃષ્ઠ |
|---|---|---|---|
| 001 | श्री नंदीसूत्र अवचूरी | पू. विक्रमसूरिजीम.सा. | 238 |
| 002 | श्री उत्तराध्ययन सूत्र चूर्णी | पू. जिनदासगणिचूर्णीकार | 286 |
| 003 | श्री अर्हद्गीता-भगवद्गीता | पू. मेघविजयजी गणिम.सा. | 84 |
| 004 | श्री अर्हच्चूडामणिसारसटीकः | पू. भद्रबाहुस्वामीम.सा. | 18 |
| 005 | श्री यूक्ति प्रकाशसूत्रं | पू. पद्मसागरजी गणिम.सा. | 48 |
| 006 | श्री मानतुङ्गशास्त्रम् | पू. मानतुंगविजयजीम.सा. | 54 |
| 007 | अपराजितपृच्छा | श्री बी. भट्टाचार्य | 810 |
| 008 | शिल्प स्मृति वास्तु विद्यायाम् | श्री नंदलाल चुनिलालसोमपुरा | 850 |
| 009 | शिल्परत्नम् भाग-१ | श्रीकुमार के. सभात्सवशास्त्री | 322 |
| 010 | शिल्परत्नम् भाग-२ | श्रीकुमार के. सभात्सवशास्त्री | 280 |
| 011 | प्रासादतिलक | श्री प्रभाशंकर ओघडभाई | 162 |
| 012 | काश्यशिल्पम् | श्री विनायक गणेश आपटे | 302 |
| 013 | प्रासादमञ्जरी | श्री प्रभाशंकर ओघडभाई | 156 |
| 014 | राजवल्लभ याने शिल्पशास्त्र | श्री नारायण भारतीगोंसाई | 352 |
| 015 | शिल्पदीपक | श्री गंगाधरजी प्रणीत | 120 |
| 016 | वास्तुसार | श्री प्रभाशंकर ओघडभाई | 88 |
| 017 | दीपार्णव उत्तरार्ध | श्री प्रभाशंकर ओघडभाई | 110 |
| 018 | જિનપ્રાસાદ માર્તણ્ડ | શ્રી નંદલાલ ચુનીલાલસોમપુરા | 498 |
| 019 | जैन ग्रंथावली | श्री जैन श्वेताम्बरकोन्फ्रन्स | 502 |
| 020 | હીરકલશ જૈનજ્યોતિષ | શ્રી હિમ્મતરામમહાશંકર જાની | 454 |
| 021 | न्यायप्रवेशः भाग-१ | श्री आनंदशंकर बी.ध्रुव | 226 |
| 022 | दीपार्णव पूर्वार्ध | श्री प्रभाशंकर ओघडभाई | 640 |
| 023 | अनेकान्त जयपताकाख्यं भाग-१ | पू. मुनिचंद्रसूरिजीम.सा. | 452 |
| 024 | अनेकान्त जयपताकाख्यं भाग-२ | श्री एच. आर. कापडीआ | 500 |
| 025 | प्राकृत व्याकरण भाषांतर सह | श्री बेचरदास जीवराजदोशी | 454 |
| 026 | तत्त्पोपप्लवसिंहः | श्री जयराशी भट्ट बी. भट्टाचार्य | 188 |
| 027 | शक्तिवादादर्शः | श्री सुदर्शनाचार्यशास्त्री | 214 |

| | | | |
|---|---|---|---|
| 028 | क्षीरार्णव | श्री प्रभाशंकर ओघडभाई | 414 |
| 029 | वेधवास्तु प्रभाकर | श्री प्रभाशंकर ओघडभाई | 192 |
| 030 | शिल्परत्नाकर | श्री नर्मदाशंकरशास्त्री | 824 |
| 031 | प्रासाद मंडन | पं. भगवानदास जैन | 288 |
| 032 | श्री सिद्धहेम बृहद्वृत्ति बृहन्न्यास अध्याय१ | पू. लावण्यसूरिजीम.सा. | 520 |
| 033 | श्री सिद्धहेम बृहद्वृत्ति बृहन्न्यास अध्याय२ | पू. लावण्यसूरिजीम.सा. | 578 |
| 034 | श्री सिद्धहेम बृहद्वृत्ति बृहन्न्यास अध्याय३ (१) | पू. लावण्यसूरिजीम.सा. | 278 |
| 035 | श्री सिद्धहेम बृहद्वृत्ति बृहन्न्यास अध्याय३ (२) (३) | पू. लावण्यसूरिजीम.सा. | 252 |
| 036 | श्री सिद्धहेम बृहद्वृत्ति बृहन्न्यास अध्याय५ | पू. लावण्यसूरिजीम.सा. | 324 |
| 037 | વાસ્તુનિઘંટુ | પ્રભાશંકર ઓઘડભાઈ સોમપુરા | 302 |
| 038 | તિલકમઞ્જરી ભાગ-૧ | પૂ. લાવણ્યસૂરિજી | 196 |
| 039 | તિલકમઞ્જરી ભાગ-૨ | પૂ. લાવણ્યસૂરિજી | 190 |
| 040 | તિલકમઞ્જરી ભાગ-૩ | પૂ. લાવણ્યસૂરિજી | 202 |
| 041 | સપ્તસન્ધાન મહાકાવ્યમ્ | પૂ. વિજયઅમૃતસૂરિશ્વરજી | 480 |
| 042 | સપ્તભઙ્ગીમિમાંસા | પૂ. પં. શિવાનન્દવિજયજી | 228 |
| 043 | ન્યાયાવતાર | સતિષચંદ્ર વિદ્યાભૂષણ | 60 |
| 044 | વ્યુત્પત્તિવાદ ગુઢાર્થતત્ત્વાલોક | શ્રી ધર્મદત્તસૂરિ (બચ્છા ઝા) | 218 |
| 045 | સામાન્યનિર્યુક્તિ ગુઢાર્થતત્ત્વાલોક | શ્રી ધર્મદત્તસૂરિ (બચ્છા ઝા) | 190 |
| 046 | સપ્તભઙ્ગીનયપ્રદીપ બાલબોધિનીવિવૃત્તિઃ | પૂ. લાવણ્યસૂરિજી | 138 |
| 047 | વ્યુત્પત્તિવાદ શાસ્ત્રાર્થકલા ટીકા | શ્રીવેણીમાધવ શાસ્ત્રી | 296 |
| 048 | નયોપદેશ ભાગ-૧ તરઙ્ગિણીતરણી | પૂ. લાવણ્યસૂરિજી | 210 |
| 049 | નયોપદેશ ભાગ-૨ તરઙ્ગિણીતરણી | પૂ. લાવણ્યસૂરિજી | 274 |
| 050 | ન્યાયસમુચ્ચય | પૂ. લાવણ્યસૂરિજી | 286 |
| 051 | સ્યાદ્યાર્થપ્રકાશઃ | પૂ. લાવણ્યસૂરિજી | 216 |
| 052 | દિન શુદ્ધિ પ્રકરણ | પૂ. દર્શનવિજયજી | 532 |
| 053 | બૃહદ્ ધારણા યંત્ર | પૂ. દર્શનવિજયજી | 113 |
| 054 | જ્યોતિર્મહોદય | સં. પૂ. અક્ષયવિજયજી | 112 |

## અહો શ્રુતજ્ઞાનમ્ ગ્રંથ જીર્ણોદ્ધાર – સંવત ૨૦૬૬ (ઈ. ૨૦૧૦)– સેટ નં-૨

| ક્રમ | પુસ્તકનું નામ | ભાષા | કર્ત્તા-ટીકાકાર-સંપાદક | પૃષ્ઠ |
|---|---|---|---|---|
| 055 | श्री सिद्धहेम बृहद्वृत्ति बृहन्न्यास अध्याय-६ | सं | पू. लावण्यसूरिजीम.सा. | 296 |
| 056 | विविध तीर्थ कल्प | सं | पू. जिनविजयजी म.सा. | 160 |
| 057 | ભારતીય જૈન શ્રમણ સંસ્કૃતિ અને લેખનકળા | ગુજ. | पू. पूण्यविजयजी म.सा. | 164 |
| 058 | सिद्धान्तलक्षणगूढार्थ तत्त्वलोकः | सं | श्री धर्मदत्तसूरि | 202 |
| 059 | व्याप्ति पञ्चक विवृत्ति टीका | सं | श्री धर्मदत्तसूरि | 48 |
| 060 | જૈન સંગીત રાગમાળા | ગુ. | श्री मांगरोळ जैन संगीत मंडळी | 306 |
| 061 | चतुर्विंशतीप्रबन्ध (प्रबंध कोश) | सं | श्री रसिकलाल एच. कापडीआ | 322 |
| 062 | व्युत्पत्तिवाद आदर्श व्याख्यया संपूर्ण ६ अध्याय | सं | श्री सुदर्शनाचार्य | 668 |
| 063 | चन्द्रप्रभा हेमकौमुदी | सं | पू. मेघविजयजी गणि | 516 |
| 064 | विवेक विलास | सं/ગુ. | श्री दामोदर गोविंदाचार्य | 268 |
| 065 | पञ्चशती प्रबोध प्रबंध | सं | पू. मृगेन्द्रविजयजी म.सा. | 456 |
| 066 | सन्मतितत्त्वसोपानम् | सं | पू. लब्धिसूरिजी म.सा. | 420 |
| 067 | ઉપદેશમાલા દોઘટ્ટી ટીકા ગુર્જરાનુવાદ | ગુજ. | पू. हेमसागरसूरिजी म.सा. | 638 |
| 068 | मोहराजापराजयम् | सं | पू. चतुरविजयजी म.सा. | 192 |
| 069 | क्रियाकोश | सं/हिं | श्री मोहनलाल बांठिया | 428 |
| 070 | कालिकाचार्यकथासंग्रह | सं/ગુ. | श्री अंबालाल प्रेमचंद | 406 |
| 071 | सामान्यनिरुक्ति चंद्रकला कलाविलास टीका | सं. | श्री वामाचरण भट्टाचार्य | 308 |
| 072 | जन्मसमुद्रजातक | सं/हिं | श्री भगवानदास जैन | 128 |
| 073 | मेघमहोदय वर्षप्रबोध | सं/हिं | श्री भगवानदास जैन | 532 |
| 074 | જૈન સામુદ્રિકનાં પાંચ ગ્રંથો | ગુજ. | श्री हिम्मतराम महाशंकर जानी | 376 |
| 075 | જૈન ચિત્ર કલ્પદ્રૂમ ભાગ-૧ | ગુજ. | श्री साराभाई नवाब | 374 |

| | | | | |
|---|---|---|---|---|
| 076 | જૈન ચિત્ર કલ્પદ્રૂમ ભાગ-૨ | ગુજ. | श्री साराभाई नवाब | 238 |
| 077 | સંગીત નાટ્ય રૂપાવલી | ગુજ. | श्री विद्या साराभाई नवाब | 194 |
| 078 | ભારતનાં જૈન તીર્થો અને તેનું શિલ્પસ્થાપત્ય | ગુજ. | श्री साराभाई नवाब | 192 |
| 079 | શિલ્પ ચિન્તામણિ ભાગ-૧ | ગુજ. | श्री मनसुखलाल भुदरमल | 254 |
| 080 | બૃહદ્ શિલ્પ શાસ્ત્ર ભાગ-૧ | ગુજ. | श्री जगन्नाथ अंबाराम | 260 |
| 081 | બૃહદ્ શિલ્પ શાસ્ત્ર ભાગ-૨ | ગુજ. | श्री जगन्नाथ अंबाराम | 238 |
| 082 | બૃહદ્ શિલ્પ શાસ્ત્ર ભાગ-૩ | ગુજ. | श्री जगन्नाथ अंबाराम | 260 |
| 083 | આયુર્વેદના અનુભૂત પ્રયોગો ભાગ-૧ | ગુજ. | पू. कान्तिसागरजी | 114 |
| 084 | કલ્યાણ કારક | ગુજ. | श्री वर्धमान पार्श्वनाथ शास्त्री | 910 |
| 085 | विश्वलोचन कोश | सं./हिं | श्री नंदलाल शर्मा | 436 |
| 086 | કથા રત્ન કોશ ભાગ-1 | ગુજ. | श्री बेचरदास जीवराज दोशी | 336 |
| 087 | કથા રત્ન કોશ ભાગ-2 | ગુજ. | श्री बेचरदास जीवराज दोशी | 230 |
| 088 | હસ્તસઞ્જીવનમ્ | सं. | पू. मेघविजयजीगणि | 322 |
| 089 | એન્દ્રચતુર્વિંશતિકા | सं. | पू.यशोविजयजी, पू. पुण्यविजयजी | 114 |
| 090 | સમ્મતિ તર્ક મહાર્ણવાવતારિકા | सं. | आचार्य श्री विजयदर्शनसूरिजी | 560 |

# श्री आशापूरण पार्श्वनाथ जैन ज्ञानभंडार

संयोजक – शाह बाबुलाल सरेमल - (मो.) 9426585904 (ओ.) 22132543 - ahoshrut.bs@gmail.com
शाह वीमळाबेन सरेमल जवेरचंदजी बेडावाळा भवन
हीराजैन सोसायटी, रामनगर, साबरमती, अमदावाद-05.

## अहो श्रुतज्ञानम् ग्रंथ जीर्णोद्धार – संवत २०६७ (ई. 2011) सेट नं.-३

प्रायः अप्राप्य प्राचीन पुस्तकों की स्केन डीवीडी बनाई उसकी सूची। *यह पुस्तके www.jainelibrary.org वेबसाइट से भी डाउनलोड कर सकते हैं।*

| क्रम | पुस्तक नाम | कर्त्ता/टीकाकार | भाषा | संपादक / प्रकाशक | पृष्ठ |
|---|---|---|---|---|---|
| 91 | स्याद्वाद रत्नाकर भाग-१ | वादिदेवसूरिजी | सं. | मोतीलाल लाघाजी पुना | 272 |
| 92 | स्याद्वाद रत्नाकर भाग-२ | वादिदेवसूरिजी | सं. | मोतीलाल लाघाजी पुना | 240 |
| 93 | स्याद्वाद रत्नाकर भाग-३ | वादिदेवसूरिजी | सं. | मोतीलाल लाघाजी पुना | 254 |
| 94 | स्याद्वाद रत्नाकर भाग-४ | वादिदेवसूरिजी | सं. | मोतीलाल लाघाजी पुना | 282 |
| 95 | स्याद्वाद रत्नाकर भाग-५ | वादिदेवसूरिजी | सं. | मोतीलाल लाघाजी पुना | 118 |
| 96 | पवित्र कल्पसूत्र | पुण्यविजयजी | सं./अं | साराभाई नवाब | 466 |
| 97 | समराङ्गण सूत्रधार भाग-१ | भोजदेव | सं. | टी. गणपति शास्त्री | 342 |
| 98 | समराङ्गण सूत्रधार भाग-२ | भोजदेव | सं. | टी. गणपति शास्त्री | 362 |
| 99 | भुवनदीपक | पद्मप्रभसूरिजी | सं. | वेंकटेश प्रेस | 134 |
| 100 | गाथासहस्त्री | समयसुंदरजी | सं. | सुखलालजी | 70 |
| 101 | भारतीय प्राचीन लिपीमाला | गौरीशंकर ओझा | हिन्दी | मुन्शीराम मनोहरराम | 316 |
| 102 | शब्दरत्नाकर | साधुसुन्दरजी | सं. | हरगोविन्ददास बेचरदास | 224 |
| 103 | सुबोधवाणी प्रकाश | न्यायविजयजी | सं./गु | हेमचंद्राचार्य जैन सभा | 612 |
| 104 | लघु प्रबंध संग्रह | जयंत पी. ठाकर | सं. | ओरीएन्ट इस्टी. बरोडा | 307 |
| 105 | जैन स्तोत्र संचय-१-२-३ | माणिक्यसागरसूरिजी | सं. | आगमोद्धारक सभा | 250 |
| 106 | सन्मतितर्क प्रकरण भाग-१,२,३ | सिद्धसेन दिवाकर | सं. | सुखलाल संघवी | 514 |
| 107 | सन्मतितर्क प्रकरण भाग-४,५ | सिद्धसेन दिवाकर | सं. | सुखलाल संघवी | 454 |
| 108 | न्यायसार - न्यायतात्पर्यदीपिका | सतिषचंद्र विद्याभूषण | सं. | एसियाटीक सोसायटी | 354 |

| | | | | | |
|---|---|---|---|---|---|
| 109 | जैन लेख संग्रह भाग-१ | पुरणचंद्र नाहर | सं./हि | पुरणचंद्र नाहर | 337 |
| 110 | जैन लेख संग्रह भाग-२ | पुरणचंद्र नाहर | सं./हि | पुरणचंद्र नाहर | 354 |
| 111 | जैन लेख संग्रह भाग-३ | पुरणचंद्र नाहर | सं./हि | पुरणचंद्र नाहर | 372 |
| 112 | जैन धातु प्रतिमा लेख भाग-१ | कांतिसागरजी | सं./हि | जिनदत्तसूरि ज्ञानभंडार | 142 |
| 113 | जैन प्रतिमा लेख संग्रह | दौलतसिंह लोढा | सं./हि | अरविन्द धामणिया | 336 |
| 114 | राधनपुर प्रतिमा लेख संदोह | विशालविजयजी | सं./गु | यशोविजयजी ग्रंथमाळा | 364 |
| 115 | प्राचिन लेख संग्रह-१ | विजयधर्मसूरिजी | सं./गु | यशोविजयजी ग्रंथमाळा | 218 |
| 116 | बीकानेर जैन लेख संग्रह | अगरचंद नाहटा | सं./हि | नाहटा ब्रधर्स | 656 |
| 117 | प्राचीन जैन लेख संग्रह भाग-१ | जिनविजयजी | सं./हि | जैन आत्मानंद सभा | 122 |
| 118 | प्राचिन जैन लेख संग्रह भाग-२ | जिनविजयजी | सं./हि | जैन आत्मानंद सभा | 764 |
| 119 | गुजरातना ऐतिहासिक लेखो-१ | गिरजाशंकर शास्त्री | सं./गु | फार्बस गुजराती सभा | 404 |
| 120 | गुजरातना ऐतिहासिक लेखो-२ | गिरजाशंकर शास्त्री | सं./गु | फार्बस गुजराती सभा | 404 |
| 121 | गुजरातना ऐतिहासिक लेखो-३ | गिरजाशंकर शास्त्री | सं./गु | फार्बस गुजराती सभा | 540 |
| 122 | ऑपरेशन इन सर्च ऑफ संस्कृत मेन्यु. इन मुंबई सर्कल-१ | पी. पीटरसन | अं. | रॉयल एशियाटीक जर्नल | 274 |
| 123 | ऑपरेशन इन सर्च ऑफ संस्कृत मेन्यु. इन मुंबई सर्कल-४ | पी. पीटरसन | अं. | रॉयल एशियाटीक जर्नल | 414 |
| 124 | ऑपरेशन इन सर्च ऑफ संस्कृत मेन्यु. इन मुंबई सर्कल-५ | पी. पीटरसन | अं. | रॉयल एशियाटीक जर्नल | 400 |
| 125 | कलेक्शन ऑफ प्राकृत एन्ड संस्कृत इन्स्क्रीप्शन्स | पी. पीटरसन | अं. | भावनगर आर्चीऑलॉजीकल डिपार्टमेन्ट, भावनगर | 320 |
| 126 | विजयदेव माहात्म्यम् | जिनविजयजी | सं. | जैन सत्य संशोधक | 148 |

आर्हतमतप्रभाकरस्य

चतुर्थो मयूखः

श्रीमद्वादिदेवसूरिविरचितः

# प्रमाणनयतत्त्वालोकालङ्कारः

तद्व्याख्या च

# स्याद्वादरत्नाकरः

---

पुण्यपत्तनस्थ

ओसवालवंशजश्रेष्ठिलाधाज़ीतनूजमोतीलाल इत्येतैः टिप्पणी-

भिरुपोद्घातेन च परिष्कृत्य संशोधितः ।

---

वीरसंवत् २४५७.

---

प्रथमेयमङ्कनावृत्तिः ।

मूल्यं रुप्यकद्वयम् ।

इदं पुस्तकं 'मोतीलाल लाधाजी' इत्येतैः पुण्यपत्तने (२७ भवानी पेठ) प्रकाशितम्। (अस्य सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः)

तच्च,

पुण्यपत्तने सदाशिवश्रेण्यां 'लक्ष्मण भाऊराव कोकाटे' इत्यनेन स्वकीये 'हनुमान प्रिंटिंग प्रेस' मुद्रणालये मुद्रितम्।

# शुद्धिपत्रम्

## प्रथमभागे—

| अशुद्धम् | शुद्धम् | पृष्ठम् | पंक्ति |
|---|---|---|---|
| निरुप्यमाणं | निरूप्यमाणं | ९१ | २४ |
| भावन | भवान | १२३ | २१ |
| दूरोपता | दूरापेता | १३६ | १९ |
| केकिना | केकिनो | १८३ | २१ |
| कल्प्य तस्य | कल्प्यतेऽस्य | १९८ | १२ |
| करुणा सान्द्र | करुणासान्द्र | ,, | १९ |
| तदितरत्त्वाप्र | तदितरत्त्वाप्रा | २४० | ५ |
| निश्चयः। संवाद | निश्चयःसंवाद | २४१ | १ |
| भवेत्। तदा | भवेत्, तदा | २४१ | ५ |
| प्रमाण्यस्य | प्रामाण्यस्य | ,, | २३ |
| प्रमाण्य | प्रामाण्यं | २४२ | १ |
| दोषाणापि | दोषाणामपि | ,, | ८ |

## द्वितीयभागे—

| अशुद्धम् | शुद्धम् | पृष्ठम् | पंक्ति |
|---|---|---|---|
| ताः कलाः | ताः कला | २५९ | १७ |
| समुपजाययानाः | समुपजायमानाः | ३१७ | १० |
| नाहङ्कारिकास्त | नाहङ्कारिकास्त | ३४६ | ११ |
| यथात्म्येन | याथात्म्येन | ३४८ | ९ |
| प्रमाता। | प्रमाता, | ३४८ | १२ |
| तथैवऽसंवेदना | तथैव संवेदना | ३५२ | ८ |
| उत्पलशतपत्र | उत्पलपत्रशत | ३५३ | ११ |
| परमार्थिकं | पारमार्थिकं | ३५३ | २२ |
| विषत्वा | विषयत्वा | ३५४ | ८ |
| स्पर्शाः। शीत | स्पर्शः शीत | ३५८ | ११ |
| जायमान | जायमान | ३५८ | १९ |
| वृत्ति | वृति | ३६२ | १८ |
| त्वाद्विष | त्वात्तद्विष | ३९३ | १९ |
| न्तवीर्य | नन्तवीर्य | ४७८ | ८ |
| क्षमाः | क्षमा | ४८१ | ७ |
| नाम्र | नम्र | ४८१ | १४ |

## तृतीयभागे—

| अशुद्धम् | शुद्धम् | पृष्ठम् | पंक्ति |
|---|---|---|---|
| भेदौ वक्तुं | अनयोरन्तरे त्रुटयति। | ५१६ | १९ |
| मुद्रा | मुद्रां | ५२० | १२ |
| क्वचिद् | धर्मिणः क्वचिद् | ५४० | २३ |
| धर्मिधर्महेतौ-रुप | धर्मिताप्रति-पत्तये उप | ५५६ | ९ |
| परार्थमनु | परार्थं मान | ५६५ | २२ |
| साध्यधम | साध्यधर्मे | ५६८ | ६ |
| साधान | साधन | ,, | २३ |
| सरत्य | सरन्त्य | ५७० | ८ |
| विधेः सिद्धौ | विधिसिद्धौ | ५८५ | २४ |
| डम्बरं | डम्बर | ५८६ | १७ |
| सामग्न्या | सामग्न्य | ५८७ | ३ |
| कुर्वती | कुर्वन्ती | ५९८ | ,, |
| कृत्तिका | कृत्तिकाः | ,, | ,, |
| ,, | ,, | ,, | १८ |
| प्राज्यापत्य | प्राजापत्य | ,, | २६ |
| स्वात् | स्यात् | ६०२ | २० |
| शमस्तत्कार्यस्य | शमस्तद्विरुद्धस्त-दनुपशमस्त-त्कार्यस्य | ६०३ | १९ |
| स्नुपलब्धि | स्पलब्धि | ,, | २० |
| कार्यस्या | कारणस्या | ६१२ | १३ |
| सिध्यत् सत् | सिध्यन् सन् | ६१२ | १४ |
| प्रशम तुलाया | समत्वं तुलाया | ६१३ | ५ |
| चान्यत्कृतिं | च न्यत्कृतिं | ६१९ | ४ |
| रागादितः | रागोदितः | ,, | ५ |
| रादित इति | रादिरिति | ६२४ | २१ |
| क्षोभमाणेन | क्षोभ्यमाणेन | ६२५ | ९ |
| रिक्ष | रीक्ष | ६२७ | ८ |

| अशुद्धम्, | शुद्धम्, | पृष्ठम्, | पंक्ति, |
|---|---|---|---|
| ता | तां | ६२८ | १० |
| समातन्वते | समां मन्वते | ६३३ | ४ |
| लब्ध्वन्यथा | लब्ध्यन्यथा | ६५६ | ६ |
| भिषणो | भीषणो | ६५७ | ८ |
| सीयते | सीयन्ते | ,, | १० |
| वांतशः | वांशतः | ,, | १७ |

## चतुर्थभागे—

| अशुद्धम्, | शुद्धम्, | पृष्ठम्, | पंक्ति, |
|---|---|---|---|
| कालभेद | कालाभेद | ७३६ | ८ |
| कदाचित्कतयो | कादाचित्कतयो | ७८८ | १९ |
| तदेक्षण | तदेकक्षण | ७८९ | १९ |
| द्रव्यपर्यायथोः। | द्रव्यपर्याययोः | ८०० | ७ |
| प्रतिभासमाना | प्रतिभासमानं | ८५२ | १४ |
| लोकस्तमः | लोकाभावस्तमः | ८५२ | १८ |

## पंचमभागे—

| अशुद्धम्, | शुद्धम्, | पृष्ठम्, | पंक्ति, |
|---|---|---|---|
| च ज्ञानस्य | चाज्ञानस्य | ९९३ | १७ |
| न वरं | नवरं | ९९४ | ३ |
| द्वितीयादिं | द्वितीयादि | ,, | ४ |
| माध्यस्थमुपेक्षेते | माध्यस्थ्यमुपेक्षिते | ,, | १० |
| एतेनादृष्टि | एतेनादृष्ट | ९९५ | १ |
| तथा वा मे (?) | तथाचात्म | ,, | ७ |
| सुक्षोपेक्षा | सुखोपेक्षा | ,, | १४ |
| पेक्षा बुद्धय | पेक्षाबुध्य | ,, | २१ |
| ततः | तत् | ९९६ | ३ |
| धर्मे | धर्मी | ,, | ५ |
| प्रमाणभेद | प्रमाणाद् अभेद | ,, | १३ |
| व्यवस्था विप्लवः | व्यवस्थाविप्लवः | ९९७ | १० |
| प्रमाणात्, | प्रमाणात् | ,, | २० |
| सांवृतत्वा | सांवृतत्व | १००२ | १८ |
| तस्माद पार | तस्मात् पार | ,, | १९ |
| संख्या विषय | संख्याविषय | १००३ | १९ |
| " तद्वदा-भासते इति कृत्वा " | चतुर्विंशसूत्रारम्भे योजितमसत् । त्रयोविंशसूत्रवृत्तिपर्यवसाने योजनीयम् । | | |
| यदा भासते | यदाभासते | १००५ | ३ |
| भासकस्तर्को | भासस्तर्को | ,, | २ |
| नुपपत्त्या | नुपपत्त्य | ,, | ९ |
| करणाच्च । | करणाच्च | १००८ | ६ |
| यनेकान्तस्तद्वर्जे | येकान्तस्तद्वर्जे | ,, | १६ |
| पक्षः प्रयोगः | प्रक्षप्रयोगः | ,, | २३ |
| र्थिकप्रमाण | र्थिकः प्रमाण | १०११ | १३ |
| स पार | स न पार | ,, | १९ |
| लोके प्रतीत्या | लोकप्रतीत्या | ,, | २० |
| इति लोक | इति । लोक | ,, | २२ |
| नाप्यनुमूयत | नाप्यनुभयत | १०१२ | २५ |
| प्रमाण भाव | प्रमाणाभाव | १०१३ | ४ |
| पहिहारा | परिहारा | १०२० | २२ |
| नुपपत्तेः | नुपपत्तिः | १०२४ | ७ |
| प्रतीयते । | प्रतीयते, | ,, | २१ |
| समानधर्मा | साधनधर्मा | १०३५ | १ |
| इति | इति सन्दिग्धोभयधर्मा | ,, | ४ |
| ज्ञानाभ्रान्तत्व | ज्ञानाद् भ्रान्तत्व | १०३६ | १८ |
| निरयत्वस्य | नित्यत्वस्य सत्त्वस्य | १०३७ | १ |
| शौद्धोदनो | शौद्धोदनौ | ,, | १९ |
| बुद्धौ | बुद्धो | १०३८ | १० |
| ज्ञायते । किं | ज्ञायते किं | ,, | ११ |
| फलं । तस्य | फलं तस्य | १०४२ | ११ |
| नैगमा | नैगमा | १०५३ | ७ |
| रपामा | रपारमा | १०५८ | २ |
| व्यवहारो | व्यवहारा | ,, | १० |
| च सत्यं | चासत्यं | १०५९ | १३ |
| सिदध्ये | सिध्ये | ,, | १४ |
| वैसादृश्यं | वैसदृश्यं | ,, | १८ |
| भविष्य | भविष्यद् | १०६० | ९ |
| न घट - | न घटशब्द--वाच्यं, घट- | १०६५ | २१ |
| प्रवृत्त | प्रवृत्ति | ,, | २२ |
| नैगमा | नैगमो | १०६६ | २३ |
| नर्जुसुत्रा | नर्जुसूत्रा | १०६८ | ५ |
| स्थितत्वात्पृथिव्या | स्थितत्वात् । पृथिव्या | १०७५ | २१ |

| अशुद्धम्, | शुद्धम्, | पृष्ठम्, | पंक्ति | अशुद्धम्, | शुद्धम्, | पृष्ठम्, | पंक्ति |
|---|---|---|---|---|---|---|---|
| अभिव्यक्ते न | अभिव्यक्तेर्न | ,, | २२ | हेतुरव्याभि | हेतुर्व्यभि | १०७९ | १९ |
| मर्पयत्येव | मर्पयत्येव । | १०७६ | ६ | सिद्धे ननु | सिद्धेन तु | ,, | २० |
| स्पन्दिनी | स्पन्दिनीं | ,, | ४ | नुत्थस्य | तुच्छस्य | ,, | २२ |
| प्रत्यक्षम् । | प्रत्यक्षं | ,, | ७ | भेदात् । तेषां | भेदात् तेषां | १०८० | २० |
| कत्वाच । न | कत्वाच न | ,, | ११ | प्रदीर्घभ्यास | प्रदीर्घाभ्यास | १०८१ | १४ |
| स्पदत्वाच । नाहं | स्पदत्वाच नाहं | ,, | १५ | प्रसिद्धम् । | प्रसिद्धं | ,, | २१ |
| व्यापारस्तन्यस्य | व्यापारःस्तन्यस्य | १०७७ | १४ | दृष्टस्य | अदृष्टस्य | १०८३ | २० |
| | | | | चैतन्याभास | चैतन्याभाव | ,, | २१ |
| मनुस्मरतः | मननुस्मरतः | ,, | १५ | भत् | भृत् | १०८४ | १७ |
| वक्तृव्यापारः | वक्त्रव्यापारः | ,, | १७ | स्यादा | स्याद्वा | ,, | १९ |
| सम्भवाद् बाधकस्य | सम्भवद्बाधकस्य | १०७९ | ४ | कथा कुद्याम्बिताम् | कथाकुटुम्बिताम् | १०८५ | २ |

# अथ षष्ठः परिच्छेदः ।

यत्रान्यत्परभागमेति न महः पारेऽन्धकारं सदा
यस्यावस्थितिरावृतिं न भजते यन्मेघमालादिभिः ॥
अस्तं यन्न समेति यच्च परितस्त्रैलोक्यविद्योतकं
तज्ज्योतिर्जगतां तनोतु महतीं तत्त्वावबोधश्रियम् ॥७००॥

एवं प्रमाणस्य लक्षणसंख्याविषयान्प्ररूप्य फलं प्ररूपयन्नाह—

**यत् प्रमाणेन साध्यते तदस्य फलमिति ॥ १ ॥**

यद्वक्ष्यमाणमज्ञाननिवृत्त्यादिकं प्रमाणेन प्रत्यक्षादिना साध्यते निष्पाद्यते तदस्य प्रमाणस्य फलमवगन्तव्यमिति ॥ १ ॥

अथैतत्प्रकारसंख्यामाह—

**तद्द्विविधमानन्तर्येण पारम्पर्येण चेति ॥ २ ॥**

एकं प्रमाणस्य फलमानन्तर्येण साक्षादपरं तु पारम्पर्येण व्यवहितमित्यर्थः ॥ २ ॥

अथाद्यफलाविर्भावनायाह—

**तत्रानन्तर्येण सर्वप्रमाणानामज्ञाननिवृत्तिः फलमिति ॥ ३ ॥**

तत्र तयोरानन्तर्यपारम्पर्यभेदभिन्नयोः फलयोर्मध्यादानन्तर्येण सर्वप्रमाणानामर्वाग्दर्शिज्ञानानां योगिज्ञानानां च ज्ञानस्य विपर्ययादेर्निवृत्तिः प्रध्वंसः स्वपरव्यवसितिस्वरूपा फलं प्रतिपत्तव्यमिति ।

ननु केवलिनां सदा सर्वप्रमेयस्य प्रत्यक्षत्वादज्ञाननिवृत्तिः फलाभाव इति चेत् । मैवम् । प्रतिसमयमशेषार्थविषयाज्ञाननिवृत्तिपरिणतेः फलरूपायास्तेषां सद्भावात् । ननु प्रथमसमय एवाशेषार्थप्रकाश-

रूपेण परिणतौ केवलस्य केवलिनः प्रतिसमयाज्ञाननिवृत्तिपरिणामो नास्तीति चेत् । न । द्वितीयादिसमये तदनभ्युपगमे तस्याज्ञत्वप्रसङ्गात् । न वरं केवलज्ञानोत्पत्तिप्रथमसमयेऽज्ञानस्य निवृत्तिः प्रथमसमयविशेषेण समस्ति । द्वितीयादिसमये पुनः सैव द्वितीयादिसमयविशिष्टेति न फलभावलक्षणो दोषः ॥ ३ ॥

इत्थमानन्तर्येण प्रमाणफलं निरूप्य पारम्पर्येण तत्प्रकाशयन्नाह—

## पारम्पर्येण केवलज्ञानस्य तावत्फलमौदासीन्यमिति ॥ ४ ॥

औदासीन्यं साक्षात्समस्तार्थानुभवेऽपि हानोपादानेच्छाविरहान्माध्यस्थमुपेक्षेतेत्यर्थः । कुत इति चेत् । उच्यते । सिद्धप्रयोजनत्वात्केवलिनां सर्वत्रौदासीन्यमेव भवति । हेयस्य संसारतत्कारणस्य हानात्, उपादेयस्य मोक्षतत्कारणस्योपादानात्, सिद्धप्रयोजनत्वं नासिद्धं भवताम् । ननु करुणावतां परदुःखजिहासूनां कथमौदासीन्यम् । करुणाया असम्भवे वा कथमाप्तत्वं तेषां स्यादिति चेत् । न । मोहविशेषात्मिकायाः करुणायास्तेषामसम्भवात् । स्वदुःखनिवर्तनवदकरुणयापि परदुःखनिराचिकीर्षायां प्रवृत्तेः । नन्वस्मदादिवद्यालोरेवात्मदुःखनिवर्तनं केवलिनः समीचीनम् । तथा चात्र प्रयोगः— यो यः स्वात्मनि दुःखं निवर्तयति स स्वात्मनि करुणावान् । यथाऽस्मदादिः, तथा च योगी स्वात्मनि संसारदुःखं निवर्तयतीति । न चात्र हेतुर्विरुद्धोऽनैकान्तिको वा । विपक्षे सर्वथाप्यभावात् । भयलोभादिनात्मदुःखनिवर्तकैर्व्यभिचारी हेतुरिति चेत् । न । तेषामपि करुणोत्पत्तेः । न ह्यात्मन्यकरुणावतः परतो भयं लोभोऽभिमानो वा सम्भवति । तेषामात्मकरुणाप्रयुक्तत्वादिति परम्परया करुणावानेवात्मदुःखमनशनादिनिमित्तं निवर्तयति भयादिहेतुका वा कस्यचिदात्मनि करुणोत्पद्यते । सोत्पन्ना सती स्वदुःखं निवर्तयतीति साक्षात्करु-

णयात्मदुःखनिवर्तने प्रवर्तते । ततो न व्यभिचारः । एतेनादृष्टिविशेषवशादात्मनि दुःखनिवर्तनपरैर्व्यभिचारचोदना निरस्ता । ततः करुणोत्पत्तेरेव तन्निवर्तनात् । तन्नाकरुणस्यात्मदुःखनिवर्तनं दृष्टमतो यमसमाधिरिति चेत् । न । स्वभावतोऽपि स्वदुःखनिवर्तननिबन्धनत्वोपपत्तेः । यथा खलु तत्स्वाभाव्यादेव भास्करो लोकं प्रकाशयति न पुनः कृपालुतया । तथा यदि केवली स्वदुःखं निवर्तयिष्यति तदा को दोषः । तथा वा मे ( ? ) दुःखनिवर्तकत्वस्य हेतोः करुणावत्त्वेनान्यथानुपपत्तेः सन्दिग्धत्वाद्व्यभिचारित्वम् । ततो निःशेषान्तरायक्षयादभयदानस्वरूपमेवात्मनः प्रक्षीणावरणस्य परमा दया । सैव च मोहाभावाद्रागद्वेषयोरप्रणिधानादुपेक्षा । तीर्थकरत्वनामोदयात्तु हितोपदेशप्रवर्तनात्परदुःखनिराकारणसिद्धिरिति । न तु बुद्धवत्करुणयाऽस्य प्रवृत्तिर्भगवतो येनापेक्षा केवलस्य फलं न स्यात् । ननूपेक्षावत्केवलज्ञाने सुखस्यापि फलत्वं वक्तुमुचितमन्यथा 'केवलस्य सुखोपेक्षा' इति पूर्वाचार्यवचनविरोधो दुष्परिहर इति चेत् । सत्यम् । किन्तु न सहृदयक्षोदक्षमोऽयं केवलज्ञानस्य सुखफलत्वपक्षः, इत्युपेक्षितोऽस्माभिः । सुखस्य हि संसारिणि सद्वेद्यकर्मोदयफलत्वम् । मुक्ते तु समस्तकर्मक्षयफलत्वं प्रमाणोपपन्नम् । न पुनर्ज्ञानफलत्वम् । ततः सूक्तं पारम्पर्येण केवलज्ञानस्य तावत्फलमौदासीन्यमिति ॥ ४ ॥

अथ केवलव्यतिरिक्तप्रमाणानां परम्पराफलप्रकटनायाह—

## शेषप्रमाणानां पुनरुपादानहानोपेक्षा बुद्धय इति ॥ ५ ॥

पारम्पर्येण फलमिति प्राक्सूत्रादत्र सम्बध्यते । ततः शेषप्रमाणानां केवलज्ञानव्यतिरिक्तानां पुनरुपादानं परिग्रहो हानं परित्याग उपेक्षा औदासीन्यं तदर्थमुपादेयादिषु बुद्धयः पारम्पर्येण फलमित्यर्थः ॥ ५ ॥

प्रमाणफलं प्रमाणाद्भिन्नमेवेति यौगाः, अभिन्नमेवेति ताथागताः, इत्येकान्तद्वयनिरासार्थं स्वमतं प्रमाणतो व्यवस्थापयन्नाह—

**ततः प्रमाणतः स्याद्भिन्नमभिन्नं च प्रमाणफलत्वान्यथानुपपत्तेरिति ॥ ६ ॥**

तत् सामान्यलक्षणलक्षितं फलं धर्मि प्रमाणतः स्याद्भिन्नमभिन्नं चेति साध्यो धर्मः प्रमाणफलत्वान्यथानुपपत्तेरिति हेतुः ॥ ६ ॥

अथास्य हेतोर्व्यभिचारं पराकुर्वन्नाह—

**उपादानबुद्ध्यादिना प्रमाणाद्भिन्नेन व्यवहितफलेन हेतोर्व्यभिचार इति न विभावनीयमिति ॥ ७ ॥**

प्रमाणफलं च भविष्यति प्रमाणात्सर्वथा भिन्नं च भविष्यति । यथोपादानबुद्ध्यादिकमिति न परामर्शनीयं यौगैरित्यर्थः ॥ ७ ॥

कुत इत्याह—

**तस्यैकप्रमातृतादात्म्येन प्रमाणभेदव्यवस्थितेरिति ८**

तस्योपादानबुद्ध्यादेर्व्यवहितफलस्यैकप्रमातृतादात्म्येनैकेन प्रमात्रा सह तादात्म्यमविष्वग्भावस्तेन कृत्वा किमित्याह—प्रमाणात्सकाशादभेदव्यवस्थितेः प्रमाणेन समं तादात्म्योपपत्तेर्हेतोर्व्यभिचार इति न विभावनीयमिति प्राक्तनेन योगः ॥ ८ ॥

एकप्रमातृतादात्म्यमपि तस्य कुतः सिद्धमित्याह—

**प्रमाणतया परिणतस्यैवात्मनः फलतया परिणतिप्रतीतेरिति ॥ ९ ॥**

---

१ 'प्रमाणस्य प्रमाणत्वं तस्मादभ्युपगच्छताम् ।
भिन्नं फलमुपेतव्यमेकत्वे तदसंभवात् ॥' इति न्या. मं. पृ. ७१ ।

२ 'विषयाधिगतिश्चात्र प्रमाणफलमिष्यते । स्ववित्तिर्वा प्रमाणं तु सारूप्यं योग्यतापि वा ॥ १३४४ ॥' इति तत्त्वसंग्रहे ।

यस्यैवात्मनः प्रमाणाकारेण परिणतिस्तस्यैव फलरूपतया परिणाम इत्येकप्रमात्रपेक्षया प्रमाणफलयोरभेदः ॥ ९ ॥

एतदेव भावयन्नाह—

**यः प्रमिमीते स एवोपादत्ते परित्यजत्युपेक्षते चेति सर्वसंव्यवहारिभिरस्खलितमनुभवादिति ॥ १० ॥**

न खल्वन्यः प्रमाता प्रमाणपर्यायतया परिणमतेऽपरश्चोपादानहानोपेक्षाबुद्धिपर्यायस्वभावतयेति कस्यापि सचेतसोऽनुभवः समस्तीत्यर्थः ॥ १० ॥

यथोक्तार्थानभ्युपगमे दूषणमाह—

**इतरथा स्वपरयोः प्रमाणफलव्यवस्था विप्लवः प्रसज्येतेति ॥ ११ ॥**

इतरथेत्येकस्यैव प्रमातुः प्रमाणफलसम्बन्धित्वानङ्गीकारे इमे प्रमाणफले स्वकीये इमे च परकीये इति नैयत्यं न स्यादिति भावः। तदित्थमुपादानबुद्ध्यादौ व्यवहितफले प्रमाणादभेदस्यापि प्रसिद्धेर्न तेन प्रकृतहेतोर्व्यभिचार इति सिद्धम् ॥ ११ ॥

अथ व्यभिचारान्तरं निराचिकीर्षुराह—

**अज्ञाननिवृत्तिस्वरूपेण प्रमाणादभिन्नेन साक्षात्फलेन साधनस्यानेकान्त इति नाशङ्कनीयमिति ॥ १२ ॥**

प्रमाणफलं च स्यात्प्रमाणात्, सर्वथाप्यभिन्नं च स्याद्यथाज्ञाननिवृत्तिरित्यनयानैकान्तिकत्वं प्रकृतिहेतोरिति न शङ्कनीयं शाक्यशिष्यैः ॥ १२ ॥

([1] कुत इत्याह—

१ एतच्चिह्नान्तर्गतं रत्नाकरे त्रुटितं रत्नाकरावतारिकायाः पूरितम्।

**कथंचित्तस्यापि प्रमाणाद्भेदेन व्यवस्थानादिति ॥ १३ ॥**

कथंचिदिति वक्ष्यमाणेन प्रकारेण ) .... रूपस्य साक्षात्फलस्य न केवलमुपादानबुद्ध्यादेर्व्यवहितफलस्येत्यपिशब्दार्थः ॥ १३ ॥

एवं व्यवस्थानमपि कुतः सिद्धमित्याह—

**साध्यसाधनभावेन प्रमाणफलयोः प्रतीयमानत्वादिति ॥ १४ ॥**

ये हि साध्यसाधनभावेन प्रतीयेते परस्परं भिद्येते यथा कुठारच्छिदे । साध्यसाधनभावेन प्रतीयेते च प्रमाणाज्ञाननिवृत्त्याख्यफले ॥ १४ ॥

अस्यैव हेतोरसिद्धतां पराजिहीर्षुः प्रमाणस्य साधनत्वं तावत्समर्थयमान आह—

**प्रमाणं हि करणाख्यं साधनं स्वपरव्यवसितौ साधकतमत्वादिति ॥ १५ ॥**

यत्खलु क्रियायां साधकतमं तत्करणाख्यं साधनं, यथा परश्वधः साधकतमं च परव्यवसितौ प्रमाणमिति ॥ १५ ॥

अथ फलस्य साध्यत्वं समर्थयन्ते—

**स्वपरव्यवसितिक्रियारूपाज्ञाननिवृत्त्याख्यं फलं तु साध्यं प्रमाणनिष्पाद्यत्वादिति ॥ १६ ॥**

यत्प्रमाणनिष्पाद्यं तत्साध्यं यथोपादानबुद्ध्यादिकं प्रमाणनिष्पाद्यं च प्रकृतं फलमिति । तत्र प्रमाणादेकान्तेन फलस्याभेदः साधीयान् । सर्वथा तादात्म्ये हि प्रमाणफलयोर्न व्यवस्था तद्भावविरोधात् । न हि सारूप्यमस्य प्रमाणमधिगतिः फलमिति सर्वथा

तादात्म्ये सिध्यत्यतिप्रसक्तेः । ( ननु प्रमाणस्यासारूप्य )व्यावृत्तिः सारूप्यमनधिगतिव्यावृत्तिरिति व्यावृत्तिभेदादेकस्यापि प्रमाणफलव्यवस्थेति चेत् । नैवम् । स्वभावभेदमन्तरेणान्यव्यावृत्तिभेदस्याप्यनुपपत्तेः । कथं च दर्शनस्याप्रमाणफलव्यावृत्त्या प्रमाणफलव्यवस्थावत्प्रमाणान्तरफलान्तरव्यावृत्त्याऽप्रमाणत्वस्याफलत्वस्य च व्यवस्था न स्यादिति।।१६।।

अथ प्रसंगतः कर्तुरपि सकाशात्प्रकृतफलस्य भेदं समर्थयमानः प्राह—

**प्रमातुरपि स्वपरव्यवसितिक्रियायाः कथंचिद्भेद इति ।। १७ ।।**

प्रमातुरात्मनः किं पुनः प्रमाणादित्यपिशब्दार्थः ।। १७ ।।

स्वपरव्यवसितिक्रियाया अज्ञाननिवृत्त्याख्यफलस्वभावायाः कथंचिद्वक्ष्यमाण.... .... .... ....( अत्र हेतुमाहुः—

**कर्तृक्रिययोः साध्यसाधकभावेनोपलम्भादिति ।१८।**

ये साध्यसाधकभावेनोपलभ्येते ते अन्योन्यं भिन्ने । यथा देवदत्तदारुच्छिदिक्रिये साध्यसाधकभावेनोपलभ्येते च प्रमातृस्वपरव्यवसितिक्रिये इत्यर्थः ।। १८ ।।

हेत्वसिद्धिपरिहारार्थमाह—

**कर्ता हि साधकः स्वतन्त्रत्वात्, क्रिया तु साध्या कर्तृनिर्वर्त्यत्वादिति ।। १९ ।।**

स्वमात्मा )…. तन्त्रं प्रधानमस्येति स्वतन्त्रो यः क्रियायां स्वतन्त्रः स साधको यथा वृक्षच्छेदक्रियायां व्रश्चनः । स्वतन्त्रश्च स्वपरव्यवसितिक्रियायां प्रमातेति स्वतन्त्र( त्वं कर्तुः कुतः सिद्धमिति चेत् । क्रियासिद्धावपरायत्ततया प्राधान्येन विवक्षितत्वात् । स्वपरव्यवसितिल) क्षणा क्रिया पुनः साध्या कर्तृनिर्वर्त्यत्वात् । या खलु कर्तृनिर्वर्त्या क्रिया सा साध्येति व्यवहारः । .... .... .... .... ....

एवमेकान्ततो भेदं प्रमाणफलयोर्जगुः ।।
योगास्तमथ सन्न्यायाद्दूषयन्ते मनीषिणः ।। ७०१ ।।

तथा हि यत्तावत्प्रमाणमित्याद्यवादि तत्र प्रत्यभिज्ञानबाधः पक्षस्य प्रमाणात्कथंचिदभिन्नस्य तत्फलस्याज्ञाननिवृत्त्यादेः प्रत्यभिज्ञानेन प्रतीयमानत्वात् । योऽहं पदार्थं प्रमिणोमि स एव निवृत्ताज्ञानस्तमुपाददे परित्यजाम्युपेक्षे चेति हि प्रतिप्राणि प्रतीयते । अनुमानबाधश्च । तथा हि—फलं प्रमाणात्कथंचिदेव भिन्नं तत्कार्यत्वान्यथानुपपत्तेः । ज्ञानं हि स्वकारणकलापादुपजायमानं स्वार्थग्रहणव्यापारलक्षणोपयोगरूपं सदज्ञाननिवृत्त्यादिरूपतया परिणमत इतीत्थं कथंचिदेव भेदे प्रमाणफलयोः कार्यकारणभावो घटते । कारकत्वाख्यो हेतुश्च प्रदीपात्मना व्यभिचारी । प्रदीपः स्वात्मनात्मानं प्रकाशयतीत्यत्र प्रदीपात्मनः कारकत्वेऽपि प्रकाशरूपाभिन्नफलकारित्वप्रतीतेः । न खलु प्रदीपात्मनः प्रकाशो भिन्नस्तस्याप्रकाशत्वप्रसङ्गात्, पटवत् । प्रदीपात्मनो भिन्नस्यापि प्रकाशस्य प्रदीपात्मनि समवायात्प्रकाशतासिद्धिरिति चेत् । मैवम् । अप्रदीपात्मन्यपि घटादौ तत्समवायानुषङ्गात् । प्रत्यासत्तिविशेषात्प्रकाशस्य प्रदीपात्मन्येव समवायो नान्यत्रेति चेत् । स कोऽन्योऽन्यत्र कथंचित्तादात्म्यात् । दृष्टान्तस्य च साध्यविकलत्वं कुठारादेरप्येकान्तव्यतिरिक्तक्रियाकारित्वासिद्धेः । कुठारादिना हि काष्ठादेश्छिदा निरूप्यमाणा छेद्यप्रदेशानुप्रवेशलक्षणैवावतिष्ठते । स चानुप्रवेशः कुठारादेरात्मगतधर्मोऽनर्थान्तरम् । एवं करणत्वानुमानेऽपि पक्षहेतुदृष्टान्तदोषा वाच्याः । यच्चोक्तम्—'न ह्येकस्यैकदा स्वात्मापेक्षया करणरूपता फलरूपता च श्रेयसी' इत्यादि । तदप्यसत्यम् । एकस्याप्यपेक्षाभेदादनेककारकरूपतोपपत्तेर्यथा वृक्षस्तिष्ठति वृक्षेण कृतं वृक्षादपेतं वृक्षं पश्येत्यादौ । एवं प्रमाणस्यैकस्यापि साधकतमत्वापेक्षयाऽज्ञाननिवृत्त्यादिस्वभावापेक्षया च प्रमाणरूपता फलरूपता च न विरोधमध्यास्ते । ननु चाज्ञान-

निवृत्तिज्ञानमेव न च तदेव तस्यैव कार्यं युक्तं विरोधादतः कथमस्याः प्रमाणफलत्वं स्यादिति चेत् । तदपि स्याद्वादन्यायानभिज्ञभाषितम् । अज्ञाननिवृत्तेः स्वार्थव्यवसायपरिणतिलक्षणायाः स्वार्थग्रहणव्यापारलक्षणोपयोगरूपप्रमाणेन कार्यत्वाविरोधात्, साधकतमांशस्येतरांशात्, कथंचिद्भेदप्रतिपादनात् । किं च धर्मरूपतां धर्मिरूपतां वा प्रतिज्ञायाज्ञाननिवृत्तिज्ञानमेवेति प्रतिज्ञायेत । यदि धर्मरूपतां तर्ह्यज्ञाननिवृत्तेर्धर्मस्वभावयोः स्वधर्मिणोर्ज्ञानात्कथंचिद्भेदो दुष्प्रतिषेधः । न हि सर्वथाप्यभेदे धर्मधर्मिभावः संगच्छते । तस्मादज्ञाननिवृत्तिर्ज्ञानमेवेति प्रतिज्ञा क्षीणा । अथ धर्मिरूपतां तत्रापि किमपेक्षाज्ञाननिवृत्तेर्धर्मित्वं परिकल्प्येत ज्ञानापेक्षया धर्मान्तरापेक्षया वा । प्रथमपक्षे तन्निवृत्तेर्धर्मित्वम् । ज्ञानस्य तु धर्मत्वमिति वैपरीत्यमायातम् । न चैतद्युक्तम् । तस्यास्तदाश्रितत्वात् । यदाश्रितं न तस्य स्वाश्रयापेक्षयैव धर्मित्वं यथा रूपादेः । ज्ञानाश्रिता चाज्ञाननिवृत्तिरिति । अथ धर्मान्तरापेक्षया तदाज्ञानापेक्षया किमस्याः स्यात् । धर्मरूपता चेत्, कथमेवं ज्ञानमेवाज्ञाननिवृत्तिरित्यभेदाभिधानं युज्यते । ज्ञानस्याज्ञाननिवृत्तिर्धर्म इति भेदाभिधानस्योपपन्नत्वात् । तथा च ज्ञानमेवाज्ञाननिवृत्तिरिति दुर्घटम् । यदप्यभिहितं विशेषणज्ञानं फलमित्यादि तदप्यपेशलम् । विशेषणविशेष्ययोर्विभिन्नज्ञानालम्बनत्वाभावात् । एकमेव हि ज्ञानं तदालम्बनम् । न हि शुक्लः पटो दण्डी पुरुष इत्यादौ विशेषणविशेष्ययोर्ज्ञानभेदो न श्रूयते । न च विषयभेदादवश्यं ज्ञानभेदः पञ्चाङ्गुलादेर्विषयस्य समानेन्द्रियग्राह्यस्य योग्यदेशावस्थितस्यानेकस्याप्येकज्ञानालम्बनत्वात् । कथमन्यथा सदसद्धर्मः कस्यचिदेकज्ञानालम्बनमनेकत्वात्, पञ्चाङ्गुलवत्, इत्यत्र प्रयोगे पञ्चाङ्गुलस्य दृष्टान्तत्वेनोपादानं स्यात् । कथं वाऽवयविनः सिद्धिरूर्ध्वाधोमध्यभागानामप्येकज्ञानावलम्बनत्वाभावप्रसङ्गतस्तद्व्यापित्वेनास्य सिद्ध्यनुपपत्तेः । यापि विशेषणाक्षसन्निकर्षादिलक्षण-

विभिन्ना सामग्री प्रतिपादिता साप्यनुपपन्ना। सन्निकर्षस्य प्रागेव प्रतिक्षिप्तत्वात्। सति च कार्यभेदे कारणभेदः कल्पयितुं युक्तः। न चात्र तद्भेदोऽस्ति विशेषणविशेष्यालम्बनस्यैकस्यैव ज्ञानस्य समर्थितत्वादिति।

भिन्नाभिन्नं तदिदमियता विस्तरेण प्रसिद्धं
प्रत्यक्षादेरधिगमगणात्तत्फलं सर्वमेव।
यस्त्वेकान्तः कुमतमतिभिस्तीर्थिकैः कीर्तितोऽसौ
दोषव्याघ्रप्रसनवशतो न स्वरूपं बिभर्ति ॥७०२॥२०॥

कश्चिदाह—"कल्पनाशिल्पिनिर्मिता सर्वापि प्रमाणफलहृतिरिति विफल एवायं प्रमाणफलालम्बनः स्याद्वादिनां भेदाभेदप्रतिष्ठोपक्रमः" इति। तन्मतमिदानीमपाकर्तुमाह—

## संवृत्त्या प्रमाणफलता व्यवहार इत्यप्रामाणिकप्रलापः, परमार्थतः स्वाभिमतसिद्धिविरोधादिति ॥२१॥

संवृत्त्याऽविचारितरम्यप्रतीत्या कल्पनापराभिधानया, इयमत्रोपनिषत्। सांवृतप्रमाणफलव्यवहारवादिनापि सांवृतत्वं प्रमाणफलयोः परमार्थवृत्त्या तावदेष्टव्यम्। तच्चासौ प्रमाणादभिमन्यतेऽप्रमाणाद्वा। न तावदप्रमाणात्तस्याकिंचित्करत्वात्। अथ प्रमाणात्तत्र। यतः सांवृतत्वग्राहकं प्रमाणं सांवृतमसांवृतं वा स्यात्। यदि सांवृतं, कथं तस्मादपारमार्थिकस्य सकलप्रमाणफलव्यवहारसांवृतस्य सिद्धिः। तथा च पारमार्थिक एव समस्तोऽपि प्रमाणफलव्यवहारः प्राप्त इति। अथ प्रमाणफलसांवृतत्वग्राहकं प्रमाणं स्वयमसांवृतमिष्यते तर्हि क्षीणा सकलप्रमाणफलव्यवहारसांवृतत्वप्रतिज्ञा। अनेनैव व्यभिचारात्। तदेवं सांवृतसकलप्रमाणफलव्यवहारवादिनो व्यक्त एव परमार्थतः स्वाभिमतसिद्धिविरोध इति ॥ २१ ॥

प्रस्तुतमेवार्थं निगमयन्नाह—

**ततः पारमार्थिक एव प्रमाणफलव्यवहारः सकलपुरुषार्थसिद्धिहेतुः स्वीकर्तव्य इति ॥ २२ ॥**

अयमभिसन्धिः—सर्वापि पुरुषार्थसिद्धिः प्रमाणनिबन्धनात् । ततस्तां तात्त्विकीमभिलषता तन्मूलभूतं प्रमाणं तावत्तात्त्विकमङ्गीकर्तव्यम् । प्रमाणस्य च तात्त्विकत्वे सिद्धे तत्फलस्य तज्जन्यतया तात्त्विकत्वमयत्नोपनतमिति । तदित्थं प्रमाणफलव्यवहारस्य पारमार्थिकत्वप्रसिद्धेः सफल एवायं प्रमाणफलयोर्भेदाभेदप्रतिष्ठानारम्भः स्याद्वादपीयूषपानलम्पटानामिति ।

कः शक्तश्चरमं तरीतुमुदधिं बाह्वोर्बलान्मानवः
 कः पाणौ त्रिदिवाधिपक्षितिधरं धर्तुं पटीयानिह ।
कः शेषाहिफणाविभूषणमणीनादातुमभ्युद्यतः
को वा मानफलं कृती जिनमते सम्यक्क्षमो जल्पितुम् । ७०३ ।२२

एवं प्रमाणस्य विस्तरतः स्वरूपसंख्याविषयफलान्यभिधायेदानीं हेयज्ञाने सति तद्धानादुपादेयं सम्यगुपादातुं पार्यतेऽतस्तत्स्वरूपाद्याभासमप्याह——

**प्रमाणस्य स्वरूपादिचतुष्टयाद्विपरीतं तदाभासमिति ॥ २३ ॥**

पूर्वप्रतिपादितात्प्रमाणस्य सम्बन्धिनः स्वरूपादिचतुष्टयात्स्वरूपसंख्याविषयफललक्षणात्सकाशाद्विपरीतमपरं स्वरूपादिचतुष्टयं यत्तत्तदाभासं स्वरूपादिचतुष्टयाभासं स्वरूपाभासं संख्याभासं विषयाभासं फलाभासं चेत्यर्थः ॥ २३ ॥

तद्वदाभासत इति कृत्वा, तत्र स्वरूपाभासं तावदाह——

**अज्ञानात्मकानात्मप्रकाशकस्वमात्रावभासकनिर्विकल्पकसमारोपाः प्रमाणस्य स्वरूपाभासा इति २४**

अज्ञानात्मकं चानात्मप्रकाशकं च स्वमात्रावभासकं च निर्विकल्पकं च समारोपश्चेति सर्वेषां द्वन्द्वः । ते किमित्याह—प्रमाणस्य सम्बन्धिनः स्वरूपाभासाः प्रमाणाभासाः प्रत्येतव्याः ।। २४ ।।

अत्र यथाक्रमं दृष्टान्तानाह—

**यथा सन्निकर्षाद्यस्वसंविदितपरानवभासकज्ञानदर्शनविपर्ययसंशयानध्यवसाया इति ॥ २५ ॥**

सन्निकर्ष आदिर्यस्य कारकसाकल्यादेः परैः प्रमाणतया प्रतिपन्नस्य स्वाभिप्रेतचक्षुरादिदर्शनचतुष्कस्य[1] च तत्सन्निकर्षादिज्ञानशब्दस्य प्रत्येकं पदद्वयेनाभिसम्बन्धात् । अस्वसंविदितं ज्ञानं **नैयायिका**द्युपकल्पितं परानवभासकं बाह्यार्थापलापि परिकल्पितं ज्ञानं दर्शनं **सौगतानां** चतुर्विधप्रत्यक्षतया संमतं विपर्ययसंशयानध्यवसायाश्चोपवर्णितस्वरूपास्ततः सर्वेषां द्वन्द्वः । तत्र सन्निकर्षादिकमज्ञानात्मकस्य दृष्टान्तः । अस्वसंविदितं ज्ञानमनात्मप्रकाशकस्य परानवभासकं स्वमात्रावभासकस्य दर्शनं निर्विकल्पकस्य विपर्ययादयस्तु समारोपस्येति ।। २५ ।।

कथमेषां तत्स्वरूपावभासतेत्यत्र हेतुमाह—

**तेभ्यः स्वपरव्यवसायस्यानुपपत्तेरिति ।। २६ ।।**

न खल्वज्ञानस्वभावं सन्निकर्षादिकं वाऽनात्मप्रकाशकमस्वसंविदितं वा स्वमात्रावभासकं परानवभासकं वा सर्वथा निर्णयशून्यं दर्शनं वा विपर्ययादिस्वरूपः समारोपो वा स्वपरयोर्निर्णयं कर्तुं पर्याप्नोतीति तेषां प्रमाणस्वरूपाभासत्वमुपपन्नम् । यत्पुनः प्रमाणस्वरूपाभासस्वभावं न भवति तत्स्वपरयोर्निर्णयं कर्तुं पर्याप्तमेव । यथा ज्ञानात्मकं स्वप्रकाशकं परावभासकं सविकल्पकं विपर्ययादिविकलं च प्रमाणमिति । एतच्च सर्वं प्रागेव प्रतिष्ठितमित्यलमिहातिप्रसङ्गेन ।। २६ ।।

---

१ चक्षुरचक्षुरवधिकेवलेति दर्शनचतुष्टयम् ।

इत्थं सामान्यतः प्रमाणस्वरूपाभासमभिधाय विशेषतस्तदभिधित्सुः सांव्यवहारिकप्रत्यक्षाभासं तावदाह—

**सांव्यवहारिकप्रत्यक्षमिव यदा भासते तत्तदाभासमिति ॥ २७ ॥**

सांव्यवहारिकप्रत्यक्षमिन्द्रियानिन्द्रियनिबन्धनतया द्विप्रकारं प्रागुपवर्णितस्वरूपं प्रतिपत्तव्यम् ॥ २७ ॥

उदाहरणमाह—

**यथाम्बुधरेषु गन्धर्वनगरज्ञानं दुःखे सुखज्ञानं चेति ॥ २८ ॥**

अत्राद्यं निदर्शनमिन्द्रियनिबन्धनाभासस्य द्वितीयं पुनरिन्द्रियनिबन्धनाभासस्य । अवग्रहाभासादयस्तु तद्भेदाः स्वयमेव प्राज्ञैर्विवेचनीयाः ॥ २८ ॥

पारमार्थिकप्रत्यक्षाभासमिदानीमावेदयन्नाह—

**पारमार्थिकप्रत्यक्षमिव यदाभासते तत्तदाभासमिति ॥ २९ ॥**

पारमार्थिकप्रत्यक्षं विकलसकलस्वरूपतया द्विभेदं यथोक्तमवधार्यम् ॥ २९ ॥

निदर्शनमाह—

**यथा शिवाख्यस्य राजर्षेरसङ्ख्यातद्वीपसमुद्रेषु सप्तद्वीपसमुद्रज्ञानमिति ॥ ३० ॥**

शिवाख्यो राजर्षिः[1] स्वसमयप्रसिद्धः, तस्य किल विभङ्गापरपर्यायमवध्याभासं तादृशसंवेदनमाविर्बभूवेत्याहुः सैद्धान्ताः । मनःपर्यायकेवलज्ञानयोस्तु विपर्ययः कदाचिन्न सम्भवति । एकस्य संयमविशुद्धि-

---

१ शिवराजर्षिचरितं भ. सू. श. ११ उ. ९ सू. ४१८ तो ज्ञेयम् ।

प्रादुर्भूतत्वादन्यस्य समस्तावरणस्य क्षयसमुत्थत्वात् । ततश्च नात्र तदाभासचिन्तावकाशः ॥ ३० ॥

अथ परोक्षाभासं विवक्षुः स्मरणाभासं तावदाह—

**अननुभूते वस्तुनि तदिति ज्ञानं स्मरणाभासमिति ॥ ३१ ॥**

अननुभूते कदाचिदप्यनुपलब्धे ॥ ३१ ॥

उदाहरणमाह—

**अननुभूते मुनिमण्डले तन्मुनिमण्डलमिति यथेति ॥ ३२ ॥**

सुगमम् ॥ ३२ ॥

प्रत्यभिज्ञानाभासमाह—

**तुल्ये पदार्थे स एवायमित्येकस्मिंश्च तेन तुल्य इत्यादिज्ञानं प्रत्यभिज्ञानाभासमिति ॥ ३३ ॥**

प्रत्यभिज्ञानं हि तिर्यगूर्ध्वतासामान्यादिगोचरमुपवर्णितं, तत्र तिर्यक्सामान्यालिङ्गिते भावे स एवायमिति ज्ञानम् । ऊर्ध्वतासामान्यस्वभावे चैकस्मिन्द्रव्ये तेन तुल्य इति ज्ञानम् । आदिशब्दादेवंजातीयकमन्यदपि ज्ञानं प्रत्यभिज्ञानाभासमिति ॥ ३३ ॥

तत्रोदाहरणमाह—

**यमलकजातवदिति ॥ ३४ ॥**

एकस्याः स्त्रिय एकदिनोत्पन्नमपत्ययुगलं यमलकमिति कीर्त्यते । ततश्च यमलकजातयोर्मध्यादेकत्र द्वितीयेन तुल्योऽयमिति जिज्ञासिते स एवायमिति ज्ञानम् । अपरत्र स एवायमिति बुभुत्सिते तेन तुल्योऽयमिति ज्ञानं च प्रत्यभिज्ञानाभासमित्यर्थः ॥ ३४ ॥

तर्काभासमाह—

**असत्यामपि व्याप्तौ तदवभासकस्तर्काभास इति ॥ ३५ ॥**

अविद्यमानायामपि व्याप्तावन्यथानुपपत्तिनामिकायां यस्तस्या व्याप्तेरवभासः स तर्काभासः ॥ ३५ ॥

उदाहरणमाह—

**स श्यामो मैत्रतनयत्वादित्यत्र यावान्मैत्रतनयः स श्याम इति यथेति ॥ ३६ ॥**

न हि मैत्रतनयत्वाख्यस्य साधनस्य श्यामत्वेन साध्येनान्यथानुपपत्त्यापरपर्याया व्याप्तिः प्रतीयते । शाकाद्याहारपरिणतिपूर्वकत्वप्रयुक्तत्वाच्छ्यामतायाः । यो हि जनन्युपभुक्तशाकाद्याहारपरिणामपूर्वकस्तनयः स एव श्याम इति शाकाद्याहारपरिणतिपूर्वकत्वस्यैव श्यामत्वेन साध्येन व्याप्तिः । न पुनर्मैत्रतनयत्वस्य । ततश्च स श्यामो मैत्रतनयत्वादित्यत्रानुमाने यावान्मैत्रतनयः स श्याम इति सर्वाक्षेपेण यः प्रत्ययः स तर्काभास एव । प्रोक्तन्यायेनासत्यामपि व्याप्तौ प्रवृत्तत्वादिति ॥ ३६ ॥

अथानुमानाभासमाह—

**पक्षाभासादिसमुत्थं ज्ञानमनुमानाभासमिति ॥ ३७ ॥**

पक्षाभास आदिर्येषां हेत्वाभासप्रभृतीनां ते पक्षाभासादयो वक्ष्यमाणलक्षणास्तेभ्यः समुत्था उत्पत्तिरस्येति पक्षाभासादिसमुत्थं ज्ञानमनुमानाभासमिति प्रतिपाद्यते । एतच्च यदा स्वप्रतिपत्त्यर्थं तदा स्वार्थानुमानाभासं, यदा तु परप्रतिपत्त्यर्थं पक्षादिवचनरूपापन्नं तदा परार्थानुमानाभासमवसेयमिति ॥ ३७ ॥

पक्षाभासांस्तावदाह—

**तत्र प्रतीतनिराकृतानभीप्सितसाध्यधर्मविशेषणास्त्रयः पक्षाभासा इति ॥ ३८ ॥**

तत्र तेषु पक्षाभासादिषु मध्ये प्रतीतं च प्रमाणप्रतिपन्नं निराकृतं च प्रत्यक्षादिभिर्बाधितम् । अनभीप्सितं चानिष्टं साध्यधर्मरूपं विशेषणं येषु ते प्रतीतनिराकृतानभीप्सितसाध्यधर्मविशेषणास्त्रयः । पक्षस्थानोपन्यस्तत्वात्तत्कार्याकरणाच्च । पक्षवदाभासन्त इति पक्षाभासाः कथ्यन्ते । प्रतीतसाध्यधर्मविशेषणो निराकृतसाध्यधर्मविशेषणोऽनभीप्सितसाध्यधर्मविशेषणश्चेति । अप्रतीतानिराकृताभीप्सितसाध्यधर्मविशिष्टधर्मिणां सम्यक्पक्षत्वेन प्रागुपवर्णितत्वादेतेषां च तद्विपरीतत्वादिति ॥ ३८ ॥

तत्र प्रथमं पक्षाभासमुदाहर्तुमाह—

**प्रतीतसाध्यधर्मविशेषणो यथार्हतान्प्रत्यवधारणवर्जं परेण प्रयुज्यमानः समस्ति जीव इत्यादिरिति ॥ ३९ ॥**

रागद्वेषमोहलक्षणारिहननात्, पापस्वरूपरजोहननात्, रहस्याभावात्, अतिशयपूजार्हत्वाद्वा, अर्हंस्तीर्थकरः स देवता येषां त आर्हता जैनास्तान्प्रति अवधारणमस्त्येव जीव इत्याद्यनेकान्तस्तद्वर्जयतीत्यवधारणवर्जं यथा भवति, आदिशब्दान्नास्ति जीवो, नित्यो जीवः, श्रावणः शब्दः, शीतलं जलमुष्णोऽग्निरित्येवमादिकमप्यत्रोदाहरणं दृश्यम् । इदमत्रैवंपर्यमवधारणं वर्जयित्वा परोपन्यस्तसमस्तोऽपि वाक्यप्रयोग आर्हतानां प्रतीतमेवार्थं प्रकाशयति, ते हि सर्वं जीवादिवस्त्वनेकान्तात्मकमिति प्रतिपन्नाः । अन्यथा समस्तप्रमाणादिव्यवहारोच्छेदप्रसङ्गादिति तेषामवधारणरहितं प्रमाणवाक्यं सुनयवाक्यं वा प्रयुज्यमानं प्रसिद्धमेवोद्भावयतीत्यनर्थकमिति यदा त्ववधारणयुक्तः पक्षः प्रयोगस्तदा प्रत्यक्षादिनिराकृतो भवतीति न कश्चिदार्हतान्प्रति विजिगीषुः

सिद्धसाधनं प्रसिद्धसम्बन्ध इत्यपि संज्ञाद्वयमस्य पक्षाभासस्याविरुद्ध-मिति ॥ ३९ ॥

अथ द्वितीयपक्षाभासं भेदतो निगमयन्नाह—

**निराकृतसाध्यधर्मविशेषणः प्रत्यक्षानुमानागमलोकस्ववचनादिभिः साध्यधर्मस्य निराकरणादनेकप्रकार इति ॥ ४० ॥**

प्रत्यक्षनिराकृतसाध्यधर्मविशेषणः, अनुमाननिराकृतसाध्यधर्मविशेषणः, आगमनिराकृतसाध्यधर्मविशेषणः, लोकनिराकृतसाध्यधर्मविशेषणः, स्ववचननिराकृतसाध्यधर्मविशेषणः, आदिशब्दात्स्मरणनिराकृतसाध्यधर्मविशेषणस्तर्कनिराकृतसाध्यधर्मविशेषणश्चेत्येवं द्वितीयः पक्षाभासोऽनेकप्रकारो भवतीति ॥ ४० ॥

एतेषु प्रथमं प्रकारमाह—

**प्रत्यक्षनिराकृतसाध्यधर्मविशेषणो यथा नास्ति भूतविलक्षण आत्मेति ॥ ४१ ॥**

.... .... .... माणेष्वपि पक्षाभासेषु निरुक्तिः कार्या। पृथिव्यप्तेजोवायुभ्यः शरीरत्वेन परिणतेभ्यो भूतेभ्यो विलक्षणोऽन्य आत्मा नास्तीति कश्चिद्भ्रान्तः प्रतिजानीते। तत्प्रतिज्ञावचनं स्वसंवेदनप्रत्यक्षेण निराक्रियते। यथा शीतोऽग्निरिति प्रतिज्ञावचनं बाह्येन्द्रियप्रत्यक्षेण। तथा हि—यथा बाह्याः पृथिव्यादयो बाह्येन्द्रियप्रत्यक्षतया प्रतिभासन्ते तथा शरीरमपि। न च तथात्मा न च सन्नास्त्येव स्वसंवेदनानुभूयमानत्वात्। तदभावे च मृतावस्थायामिव सर्वः प्राणिगणो वर्तेतेति सकलप्रमाणादिव्यवहाराभावः स्यात्। न .... .... ....

.... .... हकत्वात्। नापि शरीरस्यैवावस्थाविशेषश्चैतन्यं पराप्रत्यक्षत्वात्। शरीरादव्यतिरिक्तमप्यन्त्रादिवत्पराप्रत्यक्षमेतदिति चेत्। मैवम्। अन्त्रादेः कदाचिदुदरविदारणे परप्रत्यक्षत्वात्।

परपरिदृश्यमानेऽप्यवयवे सुखाद्यनुभवस्य पुनः पराप्रत्यक्षत्वात् । तद्व्यतिरेके हि तद्वृत्तस्यापि .... .... त्तिस्तद्व्यतिरेकात् । न च सुखाद्यनुभवस्तत्र नास्ति । स्वात्मनोऽनुभवसिद्धत्वादिति भूतविलक्षणात्मनिषेधवादी स्वसंवेदनप्रत्यक्षेण बाध्यते । न च स्वरूपभेदेन प्रतिपन्नयोरभेदाभ्युपगमो युक्तः । सर्वाभेदप्रसङ्गात् । सोऽपि च प्रमाणादिव्यवहारप्रवृत्तिविरुद्धः । न च स्वपरप्रका .... .... .... .... वृतानुभवस्याप्यसत्यत्वप्रसङ्गात् । प्रपञ्चतः पुनरात्मसिद्धिः सप्तमपरिच्छेदे विधास्यते, इत्यलमिहातिविस्तरेण । एतेनैव चैतन्यशून्यं चतुर्भूतमात्रं तत्त्वमित्येतदपि प्रतिज्ञावचः प्रत्यक्षनिराकृतसाध्यधर्मविशेषणत्वेनाभिहितमवगन्तव्यम् । एवमकठिना पृथ्वी, अद्रवं वारि, अनुष्ण .... .... नात्तमिह द्रष्टव्यम् ॥ ४१ ॥

द्वितीयं प्रकारमाह—

## अनुमाननिराकृतसाध्यधर्मविशेषणो यथा नास्ति सर्वज्ञो वीतरागो वेति ॥ ४२ ॥

सर्वं त्रिकालविषयानन्तरूपं वस्तु साक्षाद्युगपज्जानातीति सर्वज्ञः । वीतो विगतो रागो यस्मादसौ वीतरागस्तदभावं कश्चित्साधयितुकामः प्रतिजानीते .... .... .... .... मनुमाननिराकृतम् । तथा हि यः कश्चिन्निर्ह्रासातिशयवान्स कचित्स्वकारणजनितनिर्मूलक्षयः, यथा कनकादिमलो निर्ह्रासातिशयवती च दोषावरणे इत्यनेनानुमानेन सुव्यक्तैव बाधास्य । एतस्माद्ध्यनुमानाद्यत्र कचन पुरुषधौरेये दोषावरणयोः सर्वथा प्रक्षय.... .... .... .... सिद्धिः प्रत्यक्षपरिच्छेदे कृतेति कृतमिहातिप्रयासेन । एवमपरिणामी शब्द इत्यपि प्रतिज्ञानं परिणामी शब्दः कृतकत्वात्, घटवदित्यनुमानेन निराक्रियमाणत्वात्प्रकृतपक्षाभासोदाहरणत्वेनावगन्तव्यम् ॥ ४२ ॥

अथ तृतीयं प्रकारमाह—

**आगमनिराकृतसाध्यधर्मविशेषणो यथा जैनेन रजनिभोजनं भजनीयमिति ॥ ४३ ॥**

" [१]अत्थंगयम्मि आइच्चे पुरत्था य अणुग्गए ।
आहारमइयं सव्वं मणसा वि ण पत्थइ ॥ "

इत्यादिना हि प्रसिद्धप्रामाण्येन परमागमवाक्येन क्षपाभक्षणपक्षः प्रतिक्षिप्यमाणत्वान्न साधुत्वमास्कन्दतीति । एवं जैनेन परकलत्रमभिलषणीयं, क्षीरवृक्षफलं भक्षणीयं, नवनीतमास्वादनीयं, पिशितमशनीयं, सीधु सेवनीयं, भवान्तरेणैव सुखप्रदं पुण्यम्, इत्याद्युदाहरणमालाऽप्यत्रावसेया । सर्वत्रागमबाधसद्भावस्याविशेषादिति ॥ ४३ ॥

अथ चतुर्थं प्रकारमाह—

**लोकनिराकृतसाध्यधर्मविशेषणो यथा न पारमार्थिकप्रमाणप्रमेयव्यवहार इति ॥ ४४ ॥**

इह लोकशब्देन लोकप्रतीतिरुच्यते । ततश्च लोकेन लोकप्रतीत्या निराकृतं साध्यधर्मरूपं विशेषणं यस्य स लोकनिराकृतसाध्यधर्मविशेषण इत्युद्देशः । शेषं पुनरुदाहरणम् । तत्र परमार्थस्तत्त्वं तस्मिन् भवः पारमार्थिकः, प्रमाणं च प्रमेयं च प्रमाणप्रमेये । व्यवहारो हिताहितोपेक्षणीयार्थानां प्राप्तिपरिहारोपेक्षालक्षणस्तत्स्वरूपभेदनिश्चयलक्षणश्च स पारमार्थिको भवतीति कश्चित्प्रतिजानीते । तदेतत्तस्य प्रतिज्ञानं लोके प्रतीत्या निराक्रियमाणत्वात्प्रकृतपक्षाभासतां नातिवर्तते । तथा हि—सर्वापि लोकप्रतीतिरेवंविधा समस्ति यत्पारमार्थिकं प्रमाणं तेन तत्त्वातत्त्वविवेकः क्रियते, इति लोकप्रतीतिरपि भ्रान्तैवेति चेत् । न । दृष्टहान्यदृष्टकल्पनापत्तेः । सा च न्यायविरुद्धा । किंच

१ अस्तंगत आदित्ये पुरस्ताच्चानुद्गते । आहारात्मकं सर्वं मनसापि न प्रार्थयेद् ॥ २८॥ इति छाया । दशवै. सू. ८ अ. २ उ. ।

प्रमाणादिव्यवहारस्यापारमार्थिकत्वे तत्त्वातत्त्वविचारोऽनर्थकः स्यात् । तेन तद्व्यवस्थाया असिद्धेः । तदुक्तम्—

‘ प्रमाणापरमार्थत्वे तत्त्वातत्त्वविचारणा ।
न युक्ता तेन तत्सिद्धेरसिद्धेः परमार्थतः ॥ ’

ननु च लोकप्रतीतिः प्रत्यक्षादिप्रमाणेभ्यो नान्या । तथा च प्रत्यक्षादिनिराकृतसाध्यधर्मविशेषणेष्वेव पक्षाभासेषु लोकनिराकृतसाध्यधर्मविशेषणोऽन्तर्भविष्यत्यलमस्य तेभ्यः पृथगुपन्यासेनेति चेत् । सत्यम्, एवमेतत् । तथापि विनेयमनीषोन्मीलनार्थमस्य पार्थक्येन निर्देशः । ननु चन्द्रः शशीत्येषा लोकप्रतीतिरप्रत्यक्षादिस्वभावा स्वविपरीतप्रतिज्ञानमचन्द्रः शशीत्येतद्बाधते । ततः प्रकृतपक्षाभासस्य प्राक्तनेष्वन्तर्भावकथनमन्याय्यमिति चेत् । तन्न । यतश्चन्द्रः शशीत्येषापि लोकप्रतीतिः प्रत्यक्षत्वं नातिवर्तते । तथा हि—सर्वोऽपि स्पष्टावलोको लोकः शशिनं चन्द्रादिशब्दसंसर्गयोग्यमेव पश्यति न तदयोग्यम् । तस्मात्सापि प्रत्यक्षव्यापारपरामर्शिनी स्वतन्त्रा न भवतीति प्रत्यक्षमेव । एवं शुचि नरशिरःकपालं प्राण्यङ्गत्वाच्छङ्खशुक्तिवदित्यादिकमप्यत्रोदाहरणं दृश्यम् । लोके हि प्राण्यङ्गत्वाविशेषेऽपि किंचित्तु पवित्रं वस्तु स्वभावतः प्रसिद्धम् । यथा गोपिण्डोत्पन्नत्वाविशेषेऽपि वस्तु स्वभावतः पवित्रं तद्दुग्धं न पुनस्तत्पिशितमिति ॥ ४४ ॥

इदानीं पञ्चमं प्रकारमाह—

**स्ववचननिराकृतसाध्यधर्मविशेषणो यथा नास्ति प्रमेयपरिच्छेदकं प्रमाणमिति ॥ ४५ ॥**

प्रमेयं सामान्यविशेषाद्यात्मकं जीवादिवस्तु, तस्य परिच्छेदकं निश्चायकं प्रमेयपरिच्छेदकं प्रमाणं प्रत्यक्षादिकं नास्तीति कश्चित्प्रतिजानीते । प्रमाणस्य हि प्रतिभासात्मनः सत्यत्वं स्वतः प्रतिपत्तुं न पार्यते न परतो नोभयतो नाप्यनुभूयत इति कथं तत्प्रमेयपरिच्छेदकं भवेत् । तथा परः सदपि प्रत्यक्षपरोक्षभेदभिन्नं प्रमाणं सत्या-

वृतोभयानुभयरूपतया निश्चेतुमशक्यत्वादिदं तत्त्वमिदमतत्त्वमिति परिच्छेदकं न भवतीति प्रतिजानीते । तयोर्द्वयोरपि प्रतिज्ञानं स्ववचनेन निराक्रियते । तत्राद्यस्य तावद्वचनं स्ववचनेनेत्थं निराक्रियते सर्वप्रमाणभावमभ्युपगच्छतः स्वमपि वचनं स्वाभिप्रायप्रतिपादनपरं नास्तीति वाचंयमत्वमेव तस्य श्रेयः । ब्रुवाणस्तु नास्ति प्रमाणं प्रमेयपरिच्छेदकमिति स्ववचनं प्रमाणीकुर्वन्ब्रूत इति स्ववचनेनैवासौ व्याहन्यते । द्वितीयस्यापि प्रतिज्ञानं स्ववचनेनेत्थं निराक्रियते । यदि सर्वं प्रमाणं सन्दिग्धसत्यानृतादिस्वभावं तर्हीदमपि प्रतिज्ञावचनं नास्ति प्रमेयपरिच्छेदकं प्रमाणमिति सन्दिग्धमसत्यानृतादिस्वभावमेव । सन्दिग्धमेवेति, प्रमेयपरिच्छेदकप्रमाण .... .... .... भेन ब्रूयात् । ब्रुवाणस्तु निश्चिन्वान एव ब्रवीतीति स्ववचनेनैव व्याहन्यते । अनिश्चयादेव ब्रवीतीति चेत् । तर्ह्युन्मत्तकवद्यत्किंचन वादीत्युपेक्षणीयोऽसौ न्यायवादिभिः । यद्वा यदि प्रमाणं प्रत्यक्षादिप्रभेदभिन्नमस्ति कथं तत्प्रमेयपरिच्छेदकं न स्यात् । अथ तत्प्रमेयपरिच्छेद- .... .... .... .... ....णं प्रमाणं च प्रमेयपरिच्छेदकं च न भवतीति स्ववचनव्याघातः । एवं निरन्तरमहं मौनी, सदैवाप्रसवधर्मिणी मे जननी, नित्यं ब्रह्मचारी मे जनकः, इत्यादीन्यपि स्ववचननिराकृतसाध्यधर्म.... .... .... .... .... .... पुणैर्निरूपणीयानि न तु स्ववचनस्य शब्दरूपत्वात्तन्निराकृतसाध्यधर्मविशेषणः पक्षाभासः प्राङ्निगदितागमनिराकृतसाध्यधर्मविशेषण एव पक्षाभासेऽन्तर्भवतीति किमर्थमस्य भेदेन कथनमिति चेत् । एवमेतत्, तथापि शिष्यशेमुषीविकासार्थमस्यापि पार्थक्येन कथनमिति न कश्चिद्दोषः । एवमेते प्रत्यय .... .... .... .... .... .... विशेषणादयः साक्षात्सूत्रोपात्ताः पञ्चमद्वितीयपक्षाभासस्य प्रकाराः प्रदर्शिताः । शेषास्त्वादिशब्देन सूचितास्त्रयोऽस्य प्रकाराः प्रदर्श्यन्ते । तत्र स्मरणनिराकृतसाध्यधर्मविशेषणो यथा--उभाभ्यां

प्रतिपत्तृभ्यामेकत्वानुभूते फलनिवहशालिनि सहकारतरौ तन्मध्यादेकः स्मरणाभासः परतन्त्रः कालान्तरे द्वितीये .... .... यति यथाऽहो वयस्य स सहकारतरुः फलपटलीविकल इति । ततो द्वितीयस्तं प्रति ब्रूते हन्त तवायं पक्षो मामकीनेन सम्यक्स्मरणेन निराक्रियतेऽहं हि तं सहकारतरुं सान्द्रफलप्राग्भारभारिणं सम्यक्स्मरामीति । प्रत्यभिज्ञाननिराकृतसाध्यधर्मविशेषणो यथा—सदृशेऽपि तत्कचन वस्तुनि कश्चन कञ्चनाधिकृत्योर्ध्वतासामान्यभ्रान्त्या पक्षीकुरुते तदेवेदमिति । तस्यायं पक्षस्तिर्यक्सामान्यालम्बिना तेन सदृशमिदमित्येवंरूपेण सम्यक्प्रत्यभिज्ञानेन निराक्रियत इति । तर्कनिराकृतसाध्यधर्मविशेषणो यथा— .... .... .... .... .... .... ....

(यो[1] यस्तत्पुत्रः स श्याम इति व्याप्तिः समीचीनेति । अस्यायं पक्षो यो जनन्युपभुक्तशाकाद्याहारपरिणामपूर्वकस्तत्पुत्रः, स श्याम इति व्याप्तिग्राहिणा सम्यक्तर्केण निराक्रियते ॥ ४५ ॥

द्वितीयं पक्षाभासं सभेदमुपदर्श्य तृतीयमुपदर्शयन्ति—

## अनभीप्सितसाध्यधर्मविशेषणो यथा स्याद्वादिनः शाश्वतिक एव कलशादिरशाश्वतिक एव वेति वदतः ॥ ४६ ॥

स्याद्वादिनो हि सर्वत्रापि वस्तुनि नित्यत्वैकान्तः, अनित्यत्वैकान्तो वा नाभीप्सितः, तथापि कदाचिदसौ सभाक्षोभादिनैवमपि वदेत् । एवं नित्यः शब्द इति ताथागतस्य वदतः प्रकृतः पक्षाभासः । ये त्वप्रसिद्धविशेषणाप्रसिद्धविशेष्याप्रसिद्धोभयाः पक्षाभासाः परैः प्रोचिरे, नामी समीचीनाः । अप्रसिद्धस्यैव विशेषणस्य साध्यमानत्वात्, अन्यथा सिद्धसाध्यताऽवतारात् । अथात्र सार्वत्रिकः प्रसिद्ध्यभावो विवक्षितो न तु तत्रैव धर्मिणि, यथा साङ्ख्यस्य विनाशित्वं क्वापि धर्मिणि न प्रसिद्धम्,

---

१ रत्नाकरावतारिकाया उद्धृतम् ।

तिरोभावमात्रस्यैव सर्वत्र तेनाभिधानात्। तदयुक्तम्। एवं सति क्षणिकतां साधयतो भवतः कथं नाप्रसिद्धविशेषणत्वं दोषो भवेत्, क्षणिकतायाः सपक्षे काप्यप्रसिद्धेः। विशेष्यस्य तु धर्मिणः सिद्धिर्विकल्पादपि प्रतिपादितेति कथमप्रसिद्धताऽस्य? । एतेनाप्रसिद्धोभयोऽपि परास्तः ॥ ४६ ॥

पक्षाभासान्निरूप्य हेत्वाभासानाहुः–

**असिद्धविरुद्धानैकान्तिकास्त्रयो हेत्वाभासाः ॥४७॥**

निश्चितान्यथाऽनुपपत्त्याख्यैकहेतुलक्षणविकलत्वेनाहेतवोऽपि हेतुस्थाने निवेशाद्धेतुवदाभासमाना हेत्वाभासाः ॥ ४७ ॥

तत्रासिद्धमभिदधति–

**यस्यान्यथानुपपत्तिः प्रमाणेन न प्रतीयते सोऽसिद्धः ॥ ४८ ॥**

अन्यथाऽनुपपत्तेर्विपरीताया अनिश्चितायाश्च विरुद्धानैकान्तिकत्वेन कीर्तयिष्यमाणत्वादिह हेतुस्वरूपाप्रतीतिद्वारैकैवान्यथाऽनुपपत्त्यप्रतीतिरवशिष्टा द्रष्टव्या; हेतुस्वरूपाप्रतीतिश्चेयमज्ञानात्, सन्देहात्, विपर्ययाद्वा विज्ञेया ॥ ४८ ॥

अथामुं भेदतो दर्शयन्ति–

**स द्विविध उभयासिद्धोऽन्यतरासिद्धश्च ॥ ४९ ॥**

उभयस्य वादिप्रतिवादिसमुदायस्यासिद्धः। अन्यतरस्य वादिनः, प्रतिवादिनो वाऽसिद्धः ॥ ४९ ॥

तत्राद्यभेदं वदन्ति–

**उभयासिद्धो यथा परिणामी शब्दश्चाक्षुषत्वात् ॥ ५० ॥**

चक्षुषा गृह्यत इति चाक्षुषस्तस्य भावश्चाक्षुषत्वं तस्मात्। अयं च वादिप्रतिवादिनोरुभयोरप्यसिद्धः, श्रावणत्वाच्छब्दस्य ॥ ५० ॥

द्वितीयं भेदं वदन्ति–

# अन्यतरासिद्धो यथा, अचेतनास्तरवो विज्ञानेन्द्रियायुर्निरोधलक्षणमरणरहितत्वात् ॥ ५१ ॥

ताथागतो हि तरूणामचैतन्यं साधयन्विज्ञानेन्द्रियायुर्निरोधलक्षणमरणरहितत्वादिति हेतूपन्यासं कृतवान् । स च जैनानां तरुचैतन्यवादिनामसिद्धः । तदागमे द्रुमेष्वपि विज्ञानेन्द्रियायुषां प्रमाणतः प्रतिष्ठितत्वात् । इदं च प्रतिवाद्यसिद्धयपेक्षयोदाहरणम् । वाद्यसिद्धयपेक्षया तु—अचेतनाः सुखादयः, उत्पत्तिमत्त्वादिति । अत्र हि वादिनः सांख्यस्योत्पत्तिमत्त्वमप्रसिद्धम्, तेनाविर्भावमात्रस्यैव सर्वत्र स्वीकृतत्वात् ।

नन्वित्थमसिद्धप्रकारप्रकाशनं परैश्चक्रे—स्वरूपेणासिद्धः, स्वरूपं वाऽसिद्धं यस्य सोऽयं स्वरूपासिद्धः, यथा अनित्यः शब्दः, चाक्षुषत्वादिति । ननु चाक्षुषत्वं रूपादावस्ति, तेनास्य व्यधिकरणासिद्धत्वं युक्तम् । न, रूपाद्यधिकरणत्वेनाप्रतिपादितत्वात् । शब्दधर्मिणि चोपदिष्टं चाक्षुषत्वं न स्वरूपतोऽस्तीति स्वरूपासिद्धम् । ) .... ....

.... धानब्रह्मेश्वरा अकृतकत्वादाश्रयैकदेशो न सिद्धः । अस्य परमाणवः प्रसिद्धाः । प्रधानादिकं तु न सिद्धमिति । व्यधिकरणासिद्धो यथा—अनित्यः शब्दः पटस्य कृतकत्वाद्विभिन्नमधिकरणमाश्रयो यस्यासौ व्यधिकरणः स चासावसिद्धश्चेति । ननु शब्देऽपि कृतकत्वमस्ति । तत्कथमस्यासिद्धत्वमिति चेत् । तदसत्यम् । तस्य हेतुत्वेनाप्रतिपादितत्वात् । न चान्यत्र प्रतिपादितमन्यत्र सिद्धं भवति । अतिप्रसङ्गात् । भागासिद्धो यथा—अनित्यः शब्दः प्रयत्नानन्तरीयकत्वात् । प्रयत्नानन्तरीयकत्वं हि मेघगर्जितादिलक्षणे पक्षभागे न सम्भवतीति भागासिद्धम् । सन्दिग्धासिद्धो यथा—ज्वलनवानयं महीधरनितम्बो बाष्पादिभावसन्दिग्धधूमत्वादिति । अत्र हि बाष्पादिभावेन सन्दिग्धो धूमप्रबन्धः पावकप्रतीतये हेतुत्वेनोपन्यस्त इति सन्दिग्धासिद्धत्वम् । सन्दिग्धाश्रयो यथा—इह निकुञ्जे मयूरः केकायितादिति तदापातदेश-

विभ्रमे सति। प्रतिज्ञार्थैकदेशासिद्धो यथा—अनित्यः शब्दोऽनित्यत्वादिति। अत्रोच्यते। विशेष्यविशेषणव्यर्थविशेष्यव्यर्थविशेषणासिद्धस्तावद्वादिनः प्रतिवादिन उभयोर्वा भविष्यन्तीति वाद्यसिद्धादिष्वेव तेषामन्तर्भूतत्वान्न भेदेनाभिधानं युक्तम्। आश्रयसिद्धाश्रयैकदेशासिद्धौ तु न सम्भवतः। सर्वत्र विकल्पसिद्धस्य धर्मिणः सम्भवात्। समर्थितं चैतत्प्रागेव तृतीयपरिच्छेदे। यत्पुनः क्वचिदनयोरुद्भावनं परान्प्रति तत्पराभ्युपगमापेक्षयैवेति। व्यधिकरणासिद्धस्तु न वस्तुतो हेतुदोषः। व्यधिकरणस्याप्युदेष्यति शकटं कृत्तिकोदयादुपरि वृष्टस्तडित्वानधस्तरङ्गिणी, पूरदर्शनादित्यादेर्गमकत्वप्रतीतेः। अविनाभावनिबन्धनो हि गम्यगमकत्वाभावो न त्वव्यधिकरणत्वनिबन्धनः। स श्यामस्तत्पुत्रत्वादित्यत्र हि सत्यपि साध्येन सह हेतोरेकाधिकरणत्वे गमकत्वं नास्ति। तन्निबन्धनाया अन्यथानुपपत्तेरभावात्। एवमनित्यः शब्दः पटस्य कृतकत्वादित्यत्राप्यन्यथानुपपत्त्यभावादेव गमकत्वाभावो न पुनर्व्यधिकरणत्वादिति। विस्तरश्च व्यधिकरणस्यापि हेतोः साध्यसाधकत्वमधस्तात्प्रसाधितमित्यलमतिप्रसङ्गेन। भागासिद्धोऽप्युभयस्यान्यतरस्य वाऽसिद्धः स्यादिति तयोरेवान्तर्भूतः। एवं सन्दिग्धासिद्धोऽपि सन्दिग्धाश्रयोऽप्येवमेव। तथा हि यद्देशं केकायितं तद्देशेनैव मयूरेण सार्धं तदविनाभूतं, तथा यद्देशो धूमस्तद्देशेनैव धूमध्वजेनाविनाभूतः। तदिह यदि वादिप्रतिवादिनोरुभयोरपि न तदाश्रयनिश्चयस्तदा हेतुलक्षणस्याविनाभावस्योभाभ्यामनिश्चयादुभयासिद्धः। अन्यतरस्य तु तदनिश्चयेऽन्यतरस्यासिद्ध इति प्रतिज्ञार्थैकदेशासिद्धोऽपि न भेदेनाभिधातुमुचितः। तस्य हि स्वरूपेणैवासिद्धत्वं न प्रतिज्ञार्थैकदेशत्वेन धर्मिणा व्यभिचारात्। प्रतिज्ञार्थैकदेशोऽपि हि धर्मी क्वचिद्धेतुत्वेन प्रयुक्तः स्वसाध्यं साधयन्नुपलभ्यते। यथा प्रमाणं स्वपरव्यवसायिज्ञानमेव भवति। प्रमाणत्वान्यथानुपपत्तेरित्यत्र। इह हि प्रमाणाख्यो धर्म्येव हेतुत्वेनोपन्यस्तः। स्वपरव्यवसायिज्ञानत्वाख्यं

स्वसाध्यं गमयति । ततश्चानित्यः शब्दोऽनित्यत्वादित्यत्र न प्रतिज्ञार्थैकदेशत्वेनानित्यत्वस्य हेतोरसिद्धत्वं किन्तु स्वरूपेणैव । तथा च वाद्यसिद्धावेवान्तर्भूतत्वात्प्रतिज्ञार्थैकदेशासिद्धः पृथक्कथयितुं न युक्त इति पुरापि चायं पराकृत इति कृतं निर्दलितदलनाभियोगेन । एवं च परोपदर्शितानामसिद्धप्रकाराणां केषांचिदिहैवान्तर्भावकरणात्कतिपयानां पुनर्दूषणात्प्रकारद्वयमेवासिद्धस्य व्यवस्थितम् ।

उभयासिद्धावन्यतरस्यासिद्धश्चेति । ननु नास्त्येवान्यतरासिद्धानामहेत्वाभासः । तथा हि—परेणासिद्ध इत्युद्भाविते यदि वादी तत्साधकं प्रमाणं न ब्रवीति तदा प्रमाणाभावादुभयोरप्यसिद्धः । अथ ब्रूयात्तर्हि प्रमाणस्यापक्षपातित्वादुभयोरप्यसौ सिद्धोऽन्यथा साध्यमप्यन्यतरासिद्धं न कदाचित्सिध्येदिति व्यर्थः प्रमाणोपन्यासः स्यादिति चेत् । तदयुक्तम् । यतो वादिना प्रतिवादिना वा सभ्यसमक्षं स्वोपन्यस्तो हेतुः प्रमाणतो यावन्न परं प्रति साध्यते तावत्तं प्रत्यस्य सिद्धेरभावात्कथं नान्यतरासिद्धता । नन्वेवमप्यस्यासिद्धत्वं गौणमेव स्यादिति चेत् । एवमेतत् । प्रमाणतो हि सिद्धेरभावादसिद्धोऽसौ न तु स्वरूपतः, न खलु रत्नादिपदार्थस्तत्त्वतोऽप्रतीयमानस्तावत्कालं मुख्यतस्तदाभासो भवतीति । ततश्च—

अविनाभावता यस्य न प्रमाणेन केनचित् ।
प्रतीतिपथमायाता सोऽसिद्ध इति कीर्तितः ॥ ७०४ ॥ ५१ ॥

अधुनाविरुद्धलक्षणाभिधानार्थमाह—

## साध्यविपर्ययेणैव यस्यान्यथानुपपत्तिरध्यवसीयते स विरुद्ध इति ॥ ५२ ॥

यदा केनचित्साध्यविपर्ययेणाविनाभूतो हेतुः साध्याविनाभावभ्रान्त्या प्रयुक्तः स्यात् । तदा स विरुद्धो हेत्वाभास इत्यर्थः ॥ ५२ ॥

अत्रोदाहरणमाह——

## यथा नित्य एव पुरुषोऽनित्य एव वा, प्रत्यभिज्ञाना-दिमत्त्वादिति ॥ ५३ ॥

प्रत्यभिज्ञानमादिर्येषां ते प्रत्यभिज्ञानादयः, प्रत्यभिज्ञानस्मरणप्रमाणतदाभासनिश्चयहितप्राप्त्यहितपरिवर्जनं संसारमोक्षतत्कारणादयस्ते यस्य सन्ति स प्रत्यभिज्ञानादिमान्, तस्य भावस्तत्त्वं तस्मान्नित्य एव पुरुष इति कश्चित्कापिलादिः प्रतिजानीते तस्यायं हेतुः स्थिरैकस्वरूपपुरुषसाध्यविपरीतपरिणामिपुरुषेणैव व्याप्तत्वाद्विरुद्धः । तस्य हि वादिनो भ्रान्त्युत्पत्तेर्निमित्तं प्रतिक्षणनश्वरेषु चेतनाचेतनेष्वर्थेषु प्रत्यभिज्ञानादीनामसम्भवप्रतीतिः । तथा हि—प्रतिक्षणमत्यन्तोच्छेदिषु भावेषु यथा बाह्यं वस्तु निर्मूलोच्छेदि तथान्तरमपीति पुरुषान्तरचित्तवदेकसन्तानेऽपि स्मृतिप्रत्यभिज्ञाने न स्याताम् । ततश्चेदं प्रमाणमयं प्रमाणाभास इति निश्चिन्वन्न कश्चिदस्तीति हितप्राप्त्यहितपरिवर्जनव्यवहारोच्छेदः स्यात् । एकस्य स्थायिनः पुरुषस्याभावाच्च संसारमोक्षतत्करणकार्यकारणभावादिव्यवस्था परमार्थतो नास्त्येवेति प्रत्यभिज्ञानादीनां तत्रासम्भवः । तथा सौगतोऽप्यनित्य एव पुरुषः प्रत्यभिज्ञानादिमत्त्वादिति प्रमाणयति । तस्याप्ययं हेतुरत्यन्तोच्छेदिपुरुषसाध्यविपरीतपरिणामिपुरुषेण व्याप्यत्वाद्विरुद्धः । अस्यापि हि स्वात्मानमविच्छिन्नोत्पादव्ययध्रौव्यात्मकमनुभवतोऽपि विभ्रमहेतुः स्थिरैकस्वरूपे पुरुषेऽभ्युपगते प्रत्यभिज्ञानादीनामसम्भवप्रतिपत्तिरेव । तथा हि—यदि चेतनाचेतनं च स्थिरैकस्वरूपमेव तदा सुषुप्त्याद्यवस्थायामिव बाह्यार्थग्रहणादिरूपेण प्रवृत्त्यभावात्प्रत्यभिज्ञानादयः कदाचिन्न स्युः । तद्भावे वा स्थिरैकत्वस्वरूपत्वहानिः । अवस्थाभेदादयं व्यवहार इत्यप्ययुक्तम् । तासामवस्थातुर्व्यतिरेकाव्यतिरेकविकल्पानुपपत्तेः । व्यतिरेके तास्तस्येति सम्बन्धाभावः । अव्यतिरेके पुनरवस्थातैवेति तदवस्थः प्रत्यभिज्ञानादीनामत्राभावः । वाशब्दो विकल्पार्थः ।

नित्य एव पुरुष इति वा प्रतिज्ञा भवतु । अनित्य एवेति वा द्वयोरपि पक्षयोः प्रत्यभिज्ञानादिमत्त्वाख्यो हेतुर्विपरीतमेव साधयति । परिणामिपुरुषेणैवोभयैकान्तविरुद्धेन व्याप्तत्वात् । न चैकस्य पुरुषस्य नित्यानित्योभयात्मकत्वं विरुद्धं सर्वप्राणभृतां तथैव स्वानुभवसिद्धत्वात्तथैव प्रत्यभिज्ञानादिव्यवहारोपपत्तेः । अन्यथा समस्तव्यवहारोच्छेदप्रसङ्गात् । नित्य एवानित्य एव वेत्येवमेकान्तेन कल्पितयोः पुरुषयोः प्रमाणादिव्यवहारप्रवृत्तिविरुद्धयोः परस्परपरिहारस्थितिलक्षणो विरोधो न पुनरस्मिन्प्रमाणसिद्धे परिणामिपुरुषे । तथा चोक्तमाचार्य**श्रीसिद्धसेनदिवाकरपादैः**—

"[1]परस्पराक्षेपविलुप्तचेतसः
स्ववादपूर्वापरमूढनिश्चयान् ।
समीक्ष्य तत्त्वोत्पथिकान्कुवादिनः
कथं पुमान् स्याच्छिथिलादरस्त्वयि ॥ १ ॥
वदन्ति यानेव गुणान्धचेतसः
समेत्य दोषान् किल ते स्वविद्विषः ।
त एव विज्ञानपथागताः सतां
त्वदीयसूक्तप्रतिपत्तिहेतवः ॥ २ ॥" इति ।

अन्येनाप्युक्तम्—

"ये परस्खलितोन्निद्राः स्वदोषेऽक्षिनिमीलनाः ।
तपस्विनस्ते किं कुर्युरप्राप्तत्वन्मतश्रियः ॥" इति ।

एवमपरिणामी शब्दः कृतकत्वात्, तुरङ्गोऽयं शृङ्गसङ्गित्वादित्यादीन्यपि विरुद्धोदाहरणानि द्रष्टव्यानि । तथा हि कृतकत्वं पूर्वोत्तराकारपरिहारावाप्तिस्थितिलक्षणपरिणामेनैवाविनाभूतं बहिरन्तर्वा प्रतीतिविषयः सर्वथा नित्ये क्षणिके वा तदभावप्रतिपादनात् । तथा शृङ्गसङ्गित्वमप्य-

---

[1] द्वा० द्वा० प्रथमद्वा० श्लो० ५–६

तुरङ्गत्वेनैव साध्यतुरङ्गत्वविपरीतेन व्याप्तं गवादिषु प्रतीयते तुरङ्गमे तदसम्भवादिति विरुद्धमेव । ये चाष्टौ विरुद्धभेदाः परैरिष्टास्तेऽप्येतल्लक्षणलक्षितत्वाविशेषादिहैवान्तर्भवन्तीत्युदाह्रियन्ते । तत्र सति सपक्षे चत्वारो विरुद्धाः । पक्षविपक्षव्यापकः सपक्षवृत्तिः । यथा—नित्यः शब्दः, उत्पत्तिधर्मकत्वात् । उत्पत्तिधर्मकत्वं हि पक्षीकृते शब्दे वर्तते नित्यविपरीते चानित्यघटादौ विपक्षेनाकाशादौ नित्ये सत्यपि सपक्ष इति । विपक्षैकदेशवृत्तिः पक्षव्यापकः, सपक्षावृत्तिश्च यथा—नित्यः शब्दः (सामान्यवत्त्वे सति, अस्मदादिबाह्येन्द्रियग्राह्यत्वात्) प्रत्यक्षत्वात् । बाह्येन्द्रियग्रहणयोग्यतामात्रं हि बाह्येन्द्रियप्रत्यक्षत्वमत्र विवक्षितम् । तच्च कालत्रयवर्तिषु सर्वेष्वपि शब्देषु सम्भवति । तेन सिद्धमस्य पक्षव्यापकत्वं चानित्ये घटादौ भावात्सुखादौ चाभावात् । सिद्धं सपक्षावृत्तित्वं च नित्ये व्योमादाववृत्तिः सामान्ये वृत्तिस्तु सामान्यत्वे सतीति विशेषणाद्व्यवच्छिन्ना । पक्षविपक्षैकदेशवृत्तिः सपक्षावृत्तिश्च । यथाऽस्मदादिबाह्यकरणप्रत्यक्षे वाङ्मनसे सामान्यविशेषवत्त्वे सति नित्यत्वात् । नित्यत्वं हि पक्षैकदेशे मनसि वर्तते, न वाचि विपक्षे चास्मदादिबाह्यकरणाप्रत्यक्षे गगनादौ, न सुखादौ सपक्षे च घटादावस्यावृत्तेः । सपक्षावृत्तित्वं सामान्यस्य च सपक्षत्वं सामान्यविशेषवत्त्वे सतीति विशेषणाद्व्यवच्छिन्नं योगिबाह्यकरणप्रत्यक्षस्य चाकाशादेरस्मदादिग्रहणादसपक्षत्वम् । पक्षैकदेशवृत्तिः सपक्षावृत्तिर्विपक्षव्यापको यथा—नित्ये वाङ्मनसे उत्पत्तिधर्मकत्वात्, उत्पत्तिधर्मकत्वं हि पक्षैकदेशे वाचि वर्तते, न मनसि । सपक्षे चाकाशादौ नित्ये न वर्तते विपक्षे तु घटादौ सर्वत्र वर्तत इति । एवमसत्यपि सपक्षे चत्वारो विरुद्धाः । पक्षविपक्षव्यापकोऽविद्यमानसपक्षो यथा—आकाशविशेषगुणः शब्दः प्रमेयत्वात् । प्रमेयत्वं हि पक्षे शब्दे वर्तते । विपक्षे चानाकाशविशेषगुणे घटादौ । ननु सपक्षे तस्यैवाभावान्न ह्याकाशे शब्दादन्यो विशेषगुणः कश्चिदस्ति यः

सपक्षः स्यात्परममहापरिणामादेरन्यत्रापि वृत्तितः साधारणगुणत्वात् । पक्षविपक्षैकदेशवृत्तिरविद्यमानसपक्षो यथा—सत्तासम्बन्धिनः षट्पदार्था उत्पत्तिमत्त्वात् । अयं हि हेतुः पक्षीकृतषट्पदार्थैकदेशेऽनित्यद्रव्यगुणकर्मण्येव वर्तते न नित्यद्रव्यादौ । विपक्षे चासत्त्वासंबन्धिनि प्रागभावाद्येकदेशैकप्रध्वंसाभावे वर्तते । ननु प्रागभावादौ सपक्षस्य वा संभवादेव तत्रास्या अवृत्तिः सिद्धा । पक्षव्यापको विपक्षैकदेशवृत्तिरविद्यमानसपक्षो यथा—आकाशविशेषगुणः शब्दो बाह्येन्द्रियग्राह्यत्वात् । अयं हि हेतुः पक्षीकृते शब्दे वर्तते । विपक्षस्य चानाकाशविशेषगुणस्यैकदेशे रूपादौ वर्तते, न तु सुखादौ सपक्षस्य चासम्भवादेव तत्रास्या वृत्तिः सिद्धा । पक्षैकदेशवृत्तिर्विपक्षव्यापकोऽविद्यमानसपक्षो यथा—आकाशविशेषगुणः शब्दोऽपदात्मकत्वात् । अयं हि हेतुर्जलदगर्जितादौ पक्षीकृतशब्दस्यैकदेशे वर्तते न पुनः षट्पदस्वरूपे, विपक्षे वानाकाशविशेषगुणे कुम्भादौ सर्वत्र वर्तते । सपक्षे चावृत्तिस्तस्याभावात्सुप्रसिद्धा । न त्वन्योपीष्टविघातकृद्विरुद्धो धर्मविशेषविपरीतसाधनाख्योऽस्ति । यथा साङ्ख्यस्य सौगतादिकं प्रतिपुरुषं प्रसाधयतः '[1] **परार्थाश्चक्षुरादयः सङ्घातत्वाच्छयनासनाद्यंगवत्**' इति । अयं हि हेतुर्यथा शयनासनादिदृष्टान्तबलाच्चक्षुरादीनां पारार्थ्यं साधयति तथेष्टा, असंहतपरार्थत्वविपरीतं संहतपरार्थत्वमपीतीष्टविघातकृद्विरुद्धो धर्मविशेषविपरीतसाधन इति चोच्यते । कथं चास्य संग्रह इति चेत् । उक्तलक्षणेनैवेति ब्रूमः । साध्यविपर्ययेणैवान्यथानुपपन्नं हि विरुद्धस्य लक्षणं तच्चात्राप्यक्षूणम् । साध्यं ह्युक्तमनुक्तं चाभीप्सितं भवति प्रकृतप्रयोगे चाभीप्सितमनुक्तं च साध्यमसंहतपारार्थ्यं तद्विपरीतं च संहतपारार्थ्यसंघातत्वहेतुर्दृष्टान्तबलेन साधयतीति कथं नास्य प्रोक्तलक्षणेन सङ्ग्रहः । एतेन यदाह कश्चित्—'[2] **पर्याप्तमस्य संग्रहाभियोगेन स्वरूपस्यैवासम्भवात्**,

१ न्या. बि. पृ. १०३ पं. ९ । २ न्या. बि. पृ. १३३ पं. १९ ।

उक्तसाध्यविपर्ययसाधकत्वेनैव हि हेतुर्विरुद्धतामधिरोहति नानुक्तसाध्यविपर्ययसाधकत्वेनापि' इति तत्परास्तमवसेयम्। साध्यविपर्ययसाधकत्वस्योभयत्र तुल्यत्वात्। साध्यत्वं चानुक्तस्यापि प्रसाधितमधस्तृतीयपरिच्छेदे। ननु विशेषविपरीतसाधकस्यापि विरुद्धत्वस्वीकारे सकलानुमानमुद्राभङ्गप्रसङ्गः। धूमस्यापि हि धरणीधरकन्धराधिकरणस्य सिषाधयिषितधनंजयविशेषविपर्ययसाधकत्वेन विरुद्धत्वमभिधातुं सुशकमेवेति चेत्। अभिधीयतां यत्र धूमसामान्योपन्यासेन जिज्ञासितः कृशानुविशेषस्तस्माद्विशेषमुक्तमनुक्तं वा साध्यमभिलषता विशिष्ट एव हेतुरुपन्यसनीयस्तथा च न प्रकृतदोषावकाश इति। यस्तु धर्मिस्वरूपविपरीतसाधनो धर्मिविशेषविपरीतसाधनश्च विरुद्धः। स न युक्तः। साध्यस्वरूपविपर्ययसाधकस्यैव विरुद्धत्वेनाभिधानात्। इतरथा समस्तानुमानोच्छेदापत्तिः। न हि तथाविधो हेतुरिह जगति कश्चिदवाप्यते यः साध्यसिद्धयेऽभिधीयमानो धर्मिणः स्वरूपं विशेषं कंचन बाधते। तथा ह्यनित्यः शब्दः कृतकत्वादिति सकलतार्किकगृहप्रसिद्ध एष हेतुरनित्यतां साधयन्नपि यो यः कृतकः स शब्दो न भवति, यथा घटः। यो यः कृतकः स भाषावर्गणाहेतुको न भवति। यथा स एवेति धर्मिणः स्वरूपं विशेषं च बाधत एवेत्यहेतुः स्यात्। न चैवं युक्तमिति। तथा वह्निमानयं पर्वतो धूमवत्त्वादित्ययमपि लौकिकपरीक्षकप्रसिद्धो हेतुर्वह्निमतां साधयन्नपि यो यो धूमवान्स पर्वतो न भवति यथा पाकप्रदेशः। यो यो धूमवान्स शिखरश्रेणिरम्यो न भवति। यथा स एवेति धर्मिणः स्वरूपं विशेषं च तिरस्करोत्येवेति हेतुर्न भवेन्न चैतदुपपन्नमिति न धर्मिस्वरूपविशेषविपरीतसाधनौ नाम सौगताभ्युपगतौ विरुद्धहेत्वाभासौ स्तः।

---

१ 'द्वयो रूपयोर्विपर्ययसिद्धौ विरुद्धः' 'कयोर्द्वयोः सपक्षे सत्त्वस्यासपक्षे चासत्त्वस्य। यथा कृतकत्वं प्रयत्नानन्तरीयकत्वं च नित्यत्वे साध्ये विरुद्धो हेत्वाभासः' 'अनयोः सपक्षेऽसत्त्वमसपक्षे च सत्त्वमिति विपर्ययसिद्धिः' 'एतौ च साध्यविपर्ययसाधनाद्विरुद्धौ' इति। न्या. बि. पृ. १०२।

एवं च—

सिषाधयिषितादर्थाद्वैपरीत्येन निश्चिता ।
व्याप्तिर्यस्य विरुद्धोऽसौ प्रसिद्धिपदमाययौ ॥ ७०५ ॥ ५३ ॥

अथानैकान्तिकलक्षणप्रकटनार्थमाह—

**यस्यान्यथानुपपत्तिः सन्दिह्यते सोऽनैकान्तिक इति ॥ ५४ ॥**

यस्य हेतुत्वेनाभिमतस्य धर्मस्य, अन्यथानुपपत्तेः सन्दिह्यते दोलायमानत्वान्न निर्णीयते सोऽनैकान्तिको हेत्वाभासः ॥ ५४ ॥

तद्भेदसङ्ख्यामाह—

**स द्वेधा निर्णीतविपक्षवृत्तिकः सन्दिग्धविपक्षवृत्तिकश्चेति ॥ ५५ ॥**

स इत्यनैकान्तिकः । निर्णीता विपक्षे वृत्तिर्यस्य निर्णीतविपक्षवृत्तिकः । सन्दिग्धा विपक्षे वृत्तिर्यस्यासौ सन्दिग्धविपक्षवृत्तिकः । अयं च सन्दिग्धविपक्षव्यावृत्तिक इति, सन्दिग्धान्यथानुपपत्तिक इति सन्दिग्धव्यतिरेक इति चोच्यते ॥ ५५ ॥

तत्राद्यं भेदमुदाहर्तुमाह—

**निर्णीतविपक्षवृत्तिको यथा नित्यः शब्दः प्रमेयत्वादिति ॥ ५६ ॥**

शब्दनित्यत्वैकान्तवादी जैमिनीयादिरस्य हेतुत्वमुपन्यस्तवान् । तस्यायं विपक्षेऽपि निर्णीतवृत्तिकत्वादनैकान्तिकः । तथा हि—प्रमेयत्वं सपक्षभूते नित्ये व्योमादौ यथा प्रतीयते । तथा विपक्षभूतेऽप्यनित्ये घटादौ प्रतीयत एव । ततश्चोभयत्रापि प्रतीयमानत्वाविशेषात्किमिदं नित्यत्वेनाविनाभूतमुताहो अनित्यत्वेनेत्येवमन्यथानुपपत्तेः सन्दिह्यमानत्वादनैकान्तिकतां स्वीकुरुते ॥ ५६ ॥

अथ द्वितीयं भेदमुदाहर्तुमाह—

**सन्दिग्धविपक्षवृत्तिको यथा विवादपदापन्नः पुरुषः सर्वज्ञो न भवति वक्तृत्वादिति ॥ ५७ ॥**

वक्तृत्वं हि विपक्षे सर्वज्ञे सन्दिग्धवृत्तिकम् । सर्वज्ञः किं वक्ता, आहोस्विन्न वक्तेति सन्देहात् । ननु सर्वज्ञः केनचिद् ब्रुवाणो न दृष्टोऽदर्शनाच्च । ततो वचनस्य व्यावृत्तिर्निश्चीयत एवेति चेत् । मैवम् । अस्मादृशैरनतिशयप्रज्ञैः सर्वज्ञस्य भगवतो भाषमाणस्य साक्षादनीक्षणेऽपि तत्र वचनव्यावृत्तेर्निश्चेतुमशक्यत्वेन सन्दिग्धत्वात् । अथ सर्वज्ञत्वेन सह वचनस्य विरुद्धत्वात्ततो व्यावृत्तिस्तस्य निश्चीयत एवेति चेत् । तदप्यपेशलम् । तेन सह तस्य विरोधसाधनानवधारणात् । विवक्षालक्षणस्य वक्तृत्वकारणस्य रागस्वभावतया सर्वज्ञत्वेन विरुद्धत्वात्तत्कार्यस्य वक्तृत्वस्यापि तेन सह विरोधः सिध्यतीति तु बुद्धिः कस्यचित्साधीयसी सुप्तमत्तप्रभृतिषु विवक्षामन्तरेणापि वक्तृत्वस्योपलम्भात्तस्यास्तत्कारणत्वस्यैवासिद्धेः । तत्रापि सा समस्त्येवेति न सम्भावनीयं यथानुभवस्याभावात्प्रबोधमदापगमादिदशासु प्रजल्पितस्य स्मरणानुपलब्धेः । तथापि विवक्षापरिकल्पनायामतिव्याप्तिरपरस्या अपि विवक्षायाः परिकल्पनापत्तेः कचिदवसरे केसरिकिशोरविवक्षायां करिशावकशब्दप्रयोगदर्शनाच्च नावश्यं वक्तृत्वं प्रति कारणत्वं विवक्षायाः । तत्राप्यन्तरालवर्तिनी करिशावकविवक्षा विद्यत इति न मन्तव्यं प्रमाणाभावात् । तच्छब्दप्रयोगान्यथानुपपत्तिरेव प्रमाणमिति न परामर्शनीयम् । किमपान्तराले करिशावकविवक्षा समस्ति न वेति संशयस्यानुलङ्घनीयत्वाद्विवक्षां विनापि तदुपपत्तौ विरोधाभावात् । तदभावे निर्निबन्धनतया नित्यमेव तच्छब्दप्रयोगप्रसक्तिरिति न तर्कणीयमसिद्धत्वान्निर्निबन्धनतायास्तथाविधभाषाद्रव्यं रूपं तथाविधात्मप्रयत्नसहकृतमुपादानभूतम् । अस्ति हि प्रमाणप्रतिपन्नं निबन्धनं करिशावकशब्दप्रयोगस्य तथाविधत्वं च भाषाद्रव्यात्ममनःप्रयत्नानामदृष्टविशेषादिनिमित्तम-

ङ्गीकर्तव्यम् । एवमनङ्गीकारे विवक्षाया अपि सदा सद्भावप्रसङ्गान्नित्यं तच्छब्दप्रयोगापत्तिः । अमनस्कत्वाच्च । विवादास्पदस्य पुरुषस्येच्छासामान्यस्यैवासम्भवात्कुतस्तद्विशेषभूतविवक्षायाः सम्भवः । तादृशस्तु तस्य वचनव्यापारश्चेष्टामात्रम् । न पुनर्विवक्षापूर्वकवक्तृत्वस्वभावः । अस्तु वा विप्रतिपत्तिपात्रे पुंसि शुद्धेच्छा तथापि न रागस्वभावत्वमस्य लोकशुभेच्छाया रागत्वेन प्रतीतेरभावात् । अतः कथमपि वक्तृत्वस्य सर्वज्ञत्वेन समं न विरोधः सिध्यतीति सर्वज्ञभावे साध्ये सान्दिग्धविपक्षवृत्तिकाख्यानैकान्तिकत्वमस्य सुव्यवस्थितम् । दूषितं च वक्तृत्वाख्यं साधनं सर्वज्ञसिद्धौ प्रबन्धेनेत्यलमतिप्रसङ्गेन । एवं स श्यामो मैत्रीतनयत्वात्परिदृश्यमानमैत्रीतनयस्तोमवदित्यपि सन्दिग्धविपक्षवृत्तिकानैकान्तिकस्योदाहरणं द्रष्टव्यम् । तथा हि मैत्रीतनयश्च भविष्यति देशान्तरवर्ती पुमान्श्यामश्च न भविष्यति विपक्षेण श्यामत्वाभावेन समं मैत्रीतनयत्वस्य विरोधाभावादिति । नैयायिकास्तु सोपाधिकत्वेनास्य हेतोरगमकत्वमाहुः—निरुपाधिकः किल हेतुः स्वसाध्यसाधनप्रावीण्यमास्तिघ्नुते । मैत्रीतनयत्वस्य तु श्यामत्वे साध्ये शाकाद्याहारपरिणतिपूर्वकत्वमुपाधिरस्ति । तत्कथमस्य गमकत्वं सत्यपि हि मैत्रीतनयत्वे यः शाकाद्याहारपरिणतिकारणकः स एव श्यामो न त्वपर इति । उपाधेश्चैतल्लक्षणम् — साधनाव्यापकत्वे सति साध्यव्यापको यः स उपाधिरिति । यो हि साधनं न व्याप्नोति साध्यं तु व्याप्नोति स उपाधिरित्यर्थः । यथा लोहलेख्यं वज्रं पार्थिवत्वात्परिदृश्यमानदारुवदित्यत्र पार्थिवत्वाख्यस्य हेतोर्लोहलेख्यत्वे साध्ये सुकुमारावयवसन्निवेशवत्त्वम् । तद्धि पार्थिवत्वाख्यं साधनं न व्याप्नोति । न हि यत्र यत्र पार्थिवत्वं तत्र तत्र सुकुमारावयवसन्निवेशवत्त्वमिति व्याप्तिरस्ति । सुकुमारावयवसन्निवेशवत्त्वमन्तरेणापि पार्थिवत्वस्य वज्रादावुपलम्भात् । साध्यस्य तु लोहलेख्यस्य व्यापकं सुकुमारावयवसन्निवेशवत्त्वं, यत्र यत्र लोहलेख्यत्वं तत्र तत्र सुकुमारावय-

वसन्निवेशवत्त्वमिति व्याप्तेः सद्भावात् । न खलु सुकुमारावयवसन्निवेशवत्त्वं विना लोहलेख्यत्वं काप्युपलब्धमिति सुव्यवस्थितं सुकुमारावयवसन्निवेशत्वस्योपाधित्वम् । एवं शाकाद्याहारपरिणतिपूर्वकत्वस्यापि । तथाहि – मैत्रीतनयत्वाख्यस्य साधनस्य न व्यापकं शाकाद्याहारपरिणतिपूर्वकत्वम् । न हि यत्र यत्र मैत्रीतनयत्वं तत्र तत्र शाकाद्याहारपरिणतिपूर्वकत्वं सम्भवति । तदन्तरेणापि मैत्रीतनयत्वस्य सद्भावाविरोधात् । साध्यस्य तु श्यामत्वाख्यस्य व्यापकं शाकाद्याहारपरिणतिपूर्वकत्वम् । यत्र यत्र श्यामत्वं तत्र तत्र शाकाद्याहारपरिणतिपूर्वकत्वमिति व्याप्तेः सम्भवात् । न खलु शाकाद्याहारपरिणतिपूर्वकत्वमन्तरेण श्यामत्वं कदाचनाप्युपलब्धम् । तदित्थं यथोक्तोपाधिलक्षणयोगतः शाकाद्याहारपरिणतिपूर्वकत्वस्याप्युपाधित्वं सुव्यक्तम् । ननु शाकाद्याहारपरिणतिपूर्वकत्वे संपूर्णमुपाधिलक्षणं नास्त्येव । तथाहि–साध्यव्यापकः साधनाव्यापकश्चोपाधिरभिधीयते । न च शाकाद्याहारपरिणतिपूर्वकत्वस्य साधनव्यापकत्वं विद्यते । मैत्रीतनयत्वाख्यसाधनव्यापकत्वादस्य । यो हि मैत्रीतनयः स शाकाद्याहारपरिणतिपूर्वक एव दृष्टो यथा परिदृश्यमानमैत्रीतनयस्तोमः । न च देशान्तरवर्तिनि मैत्रीतनये संशय इति मन्तव्यम् । परिदृश्यमानमैत्रीतनयस्तोमे व्याप्तौ गृहीतायां तत्रापि शाकाद्याहारपरिणतिपूर्वकत्वानुमानात् । ततः सम्पूर्णोपाधिलक्षणयोगित्वासम्भवाच्छाकाद्याहारपरिणतिपूर्वकत्वयोर्वह्निधूमवद्व्याप्तिः प्रतिपन्ना स्यात् । सैव तु नास्ति । तथा ह्यनौपाधिकः सम्बन्धो व्याप्तिः । मैत्रीतनयत्वशाकाद्याहारपरिणतिजत्वसम्बन्धे च श्यामत्वमेवोपाधिरस्ति । सत्यपि हि मैत्रीतनयत्वे यः श्यामः स एव शाकाद्याहारपरिणतिपूर्वको न सर्व इति । ततः सम्पूर्णोपाधिलक्षणयोगित्वाच्छाकाद्याहारपरिणतिपूर्वकत्वस्योपाधित्वकीर्तनं न्याय्यमेव । तदित्थं शाकाद्याहारपरिणतिपूर्वकत्वलक्षणत्वेनोपाधिना मैत्रीतनयत्वाख्यहेतोः सोपाधिकत्वान्न श्यामत्वाख्यं

स्वसाध्यं प्रति गमकत्वम् । अयमेव चाप्रयोजको हेत्वाभासः कथ्यते । परप्रयुक्तव्याप्त्युपजीवी हि हेतुरप्रयोजकः । परश्चोपाधिः स चात्रास्तीति तैरप्यनेन न्यायेन मैत्रीतनयत्वादेः सन्दिग्धविपक्षवृत्तिकानैकान्तिकमेव कोऽप्य ( अगत्या ) गत्या परमार्थवृत्त्या प्रकाशितं भवतीति न कश्चिद्विशेष इति । पराभ्युपगतश्च पक्षत्रयव्यापकादिरनैकान्तिकभेदप्रपञ्चः प्रकृतलक्षणलक्षितत्वाविशेषान्नातोऽर्थान्तरमित्युदाह्रियते । तत्र पक्षत्रयव्यापको यथा—अनित्यः शब्दः प्रमेयत्वात् । अयं हि पक्षे सपक्षे विपक्षे च सर्वत्र वर्तते । पक्षव्यापकसपक्षविपक्षैकदेशवृत्तिर्यथा—नित्यः शब्दोऽमूर्तत्वात् । अमूर्तत्वं हि पक्षीकृते शब्दे सर्वत्र वर्तते । सपक्षैकदेशे च व्योमादौ न परमाणुषु । विपक्षैकदेशे च सुखादौ न घटादाविति । पक्षसपक्षव्यापको विपक्षैकदेशवृत्तिर्यथा गौरयं विषाणित्वात् । विषाणित्वं हि पक्षीकृते गोपिण्डविशेषे वर्तते, सपक्षे च गोत्वधर्माध्यासिते सर्वत्र व्यक्तिविशेषे वर्तते । विपक्षस्य चागोरूपस्यैकदेशे महिष्यादौ वर्तते न पुनर्मनुष्यादाविति । पक्षत्रयैकदेशवृत्तिर्यथा—अनित्ये वाङ्मनसे अमूर्तत्वात् । अमूर्तत्वं हि पक्षैकदेशभूतायां वाचि वर्तते न मनसि । सपक्षस्य चैकदेशे सुखादौ न घटादौ । विपक्षस्य च नित्यस्यैकदेशे गगनादौ न परमाणुष्विति । पक्षसपक्षैकदेशवृत्तिर्विपक्षव्यापको यथा द्रव्याणि दिक्कालमनांसि, अमूर्तत्वात् । अमूर्तत्वं हि पक्षैकदेशभूतयोर्दिक्कालयोर्वर्तते न मनसि । सपक्षस्य च द्रव्यरूपस्यैकदेश आत्मादौ वर्तते न घटादौ । विपक्षे चाद्रव्यरूपे गुणादौ सर्वत्रेति । सपक्षविपक्षैकदेशवृत्तिः सपक्षव्यापको यथा—न द्रव्याणि दिक्कालमनांस्यमूर्तत्वात् । अत्रापि प्राक्तनमेव व्याख्यानमद्रव्यरूपस्य गुणादेस्तु सपक्षतेति विशेषः । सपक्षविपक्षव्यापकः पक्षैकदेशवृत्तिर्यथा—पृथिव्यप्तेजांस्यनित्यान्यगन्धवत्त्वात् । अगन्धवत्त्वं हि पृथिवीतोऽन्यत्र पक्षैकदेशे वर्तते । न तु पृथिव्यां सपक्षे चानित्ये गुणादौ सर्वत्र विपक्षे चात्मादौ नित्ये सर्वत्रेति । असाधारणमपि हेतुं

संशयजनकत्वादनैकान्तिकत्वेन **सौगताः** स्वीकुर्वन्ति । यथा नित्यः शब्दः श्रावणत्वादिति **प्राभाकरः** शब्दनित्यत्वसिद्ध्यर्थममुं हेतुं प्रयुक्तवान् । अयं च व्योमादौ सपक्षे घटादौ च विपक्षे न क्वापि वर्तत इत्यसाधारणत्वेन संशयजनकत्वादनैकान्तिकः । तथा हि—नित्यानित्यविनिर्मुक्तस्य पक्षान्तरस्यासम्भवात्, किं भूतस्य शब्दस्य श्रावणत्वं किं नित्यस्याहोस्विदनित्यस्येति । तदेतदसङ्गतम् । श्रावणत्वाद्धि शब्दस्य सर्वथैव नित्यत्वं यदि साध्यते, तदायं विरुद्ध एव हेतुः कथंचिदनित्यत्वसाधनात्प्राच्याश्रावणत्वस्वभावत्यागेनोत्तरश्रावणत्वस्वभावोत्पत्तेः कथंचिदनित्यत्वमन्तरेण शब्देऽनुपपत्तेः । अथ कथंचिन्नित्यत्वमस्माच्छब्दे साध्यते तदासौ सम्यग्घेतुरेव कथंचिन्नित्यत्वेन सहान्यथानुपपत्तिसद्भावादिति । नायमनैकान्तिकः, सात्मकं जीवच्छरीरं प्राणादिमत्त्वादित्ययं तर्ह्यसाधारणानैकान्तिको भविष्यति । प्राणादिसत्त्वस्य जीवच्छरीर एवोपलभ्यमानत्वादात्मनश्चानुपलब्धिलक्षणप्राप्तत्वात्सात्मकानात्मकराशिविवेकाभावात् । घटादीनां सात्म ..........

.... णादीनामनुभूतेः प्राणादिमत्त्वाख्यस्य हेतोः सात्मकत्वेनान्यथानुपपत्तिनिश्चयसद्भावात्, स्वपरप्रकाशकस्वभावस्य परिणामिचैतन्यस्यात्मत्वात्, अनुपलब्धिलक्षणप्राप्तविभुत्वादिगुणोपेतेनात्मना सात्मकत्वे साध्ये ........ स्य निरुपचरितस्य तत्रानुपपद्यमानत्वादिति । एतेन **वैशेषिको**ऽप्यसाधारणहेत्वाभासमनध्यवसितसंज्ञयाऽभिदधानः प्रतिषिध्यते स्म । तथा ह्ययं तल्लक्षणमाह—साध्यासाधकः पक्ष एव वर्तमानोऽनध्यवसायहेतुत्वादन ........... विपक्षः पक्षव्यापको यथा—सर्वमनित्यं सत्त्वात् । अत्र सर्वस्य वस्तुनः पक्षीकृतत्वेन सपक्षविपक्षयोर-

---

१ यस्मान्न साध्यस्य न विपर्ययस्य निश्चयोऽपि तु तद्विपरीतः संशयः साध्येतरयोः संशयहेतुरनैकान्तिक उक्तः । न्या. बिं. टी. पृ. ९३ पं. ९ ।

२ ' यश्चानुमेये विद्यमानस्तत्समानासमानजातीययोरसन्नेव सोऽन्यतरासिद्धोऽनध्यवसायहेतुत्वादनध्यवसितः; यथा सत्कार्यमुत्पत्तेरिति ' प्र. पा. भा. पृ. १२०.

भावः । पक्षीकृते च सर्वत्र हेतोर्वर्तमानत्वात्तद्व्यापकम् । अविद्यमानसपक्षविपक्षः पक्षैकदेशवृत्तिर्यथा सर्वमनित्य....स्य पक्षैकदेशवृत्तित्वम्। विद्यमानसपक्षविपक्षः पक्षव्यापको यथा—ध्वनिरनित्यो व्योमविशेषगुणत्वात् । अत्र ध्वनेरनित्यत्वे साध्ये सपक्षाः कुम्भादयो विपक्षाश्चान्तरिक्षप्रभृतयः सन्ति ( ? ) शब्दजातीये च सर्वत्र व्योमविशेषगुणत्वं वर्तत इति । पक्ष .... .... .... .... .... .... .... दयः सपक्षविपक्षाः सन्ति । क्रियावत्त्वस्य च पृथ्वीपयःपावकपवनमनस्स्वेव मूर्तिमत्सु द्रव्येषु भावात्पक्षैकदेशवृत्तित्वम् । अविद्यमानविपक्षो विद्यमानसपक्षः पक्षव्यापको यथा—सर्वं कार्यं नित्यमुत्पत्तिधर्मकत्वात्..........ते पक्षव्यापकत्वमस्य । अविद्यमानविपक्षो विद्यमानसपक्षः पक्षैकदेशवृत्तिर्यथा सर्वं कार्यं नित्यं सावयवत्वात् । अत्रापि सपक्षविपक्षयोर्भावाभावौ प्राग्वत् । सावयवत्वं च कार्येषु द्रव्याश्रितद्रव्येष्वेवास्ति । न पुनः का........त्तिरस्ति न वा। अस्ति चेत्, कथमयं न साध्यसाधको, हेतुलक्षणालङ्कृतत्वात् । तथा च तल्लक्षणे साध्यासाधक इति विशेषणमनुपपन्नम् । नास्ति चेन्ननु तदभावः किमप्रतीतेर्विपरीतोपस्थापकप्रमाणवृत्तेः संशीतेर्वास्या........नाम तदन्योऽनध्यवसितनामा हेत्वाभासः परीक्षकाणां भिन्नलक्षणलक्षणीयः स्यात् । यानि पुनस्तन्निदर्शनानि प्रदर्शितानि तेषु सत्त्वकार्यत्वोत्पत्तिधर्मकत्वसावयवत्वहेतूनामनेकान्ते साध्ये साधुत्वम् । एकान्ते तु विरुद्धत्वं तद्विपरीतानेकान्तेनान्यथानुपपन्नत्वात्........पक्षान्तरप्रयुक्तत्वाविशेषात् । द्वितीये पुनरन्यथानुपपत्तेर्निश्चयाभावः । किमनध्यवसायाद्विपर्ययात्संशयाद्वा । पक्षत्रयेऽपि यथाक्रममसिद्धविरुद्धानैकान्तिकत्वमेवेति, न यथोक्तहेत्वाभासेभ्यः पृथक्कश्चिदकिंचित्करश्चतुरचेतसामङ्गीकर्तुमुचित इति । न त्वपरैः प्ररूपितमपरमपि हेत्वाभासद्वयमस्ति कालात्ययापदिष्टः प्रकरणसमश्चेति । तथा च प्रथमस्य लक्षकं

**न्यायसूत्रं** '[1]**कालात्ययापदिष्टः कालातीतः**' इति । यथा प्राप्तं हेतुप्रयोगकालमतीत्य, यो हेतुरपदिश्यते स कालात्ययापदिष्टः कालातीत उच्यते । इदमिह रहस्यं–हेतोः प्रयोगकालः प्रत्यक्षागमानुपहतपक्षपरिग्रहसमयस्तमतीत्य प्रयुज्यमानः प्रत्यक्षागमबाधिते विषये वर्तमानः कालात्ययापदिष्टो भवतीति । तस्योदाहरणमनुष्णस्तेजोऽवयवी कृतकत्वाद्घटादिवत् । ब्राह्मणेन सुरा पेया द्रवत्वात्क्षीरनीरवदिति । अत्र प्रथमेऽनुमाने प्रत्यक्षबाधितत्वं पक्षस्य । द्वितीये पुनरागमबाधितत्वमिति । तथाविधपक्षप्रयोगानन्तरं प्रयुक्तस्य कृतकत्वद्रवत्वाख्यहेतुयुग्मस्य स्पष्टं कालात्ययापदिष्टत्वमिति । प्रकरणसमस्य तु लक्षकमेत**न्न्यायसूत्रम्**—'[2]**यस्मात्प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः**' इति विचार्यमाणौ पक्षप्रतिपक्षौ प्रकरणशब्देनात्राभिधीयेते । पक्षप्रतिपक्षयोश्चैतल्लक्षणम्—

"[3]**एकाधिकरणौ धर्मौ तुल्यकालौ विरोधिनौ ।
पृथक्परिग्रहौ पक्षप्रतिपक्षावुदाहृतौ ॥**" इति ।

ततश्च प्रकरणस्य चिन्ता संशयात्प्रभृत्यानिर्णयाद्यद्यपि भवति तथापीह विमर्शात्मिकैव गृह्यते । सा यस्माद्भवति । कस्माच्च सा भवति विशेषानुपलम्भात्स एव विशेषानुपलम्भो यदा निर्णयार्थमपदिश्यते तदा प्रकरणमनतिवर्तमानत्वात्प्रकरणसमो भवति प्रकरणे पक्षे प्रतिपक्षे च समस्तुल्य इत्यर्थः । तस्योदाहरणम्–अनित्यः शब्दो नित्यधर्मानुपलब्धेर्घटादिवत् । यत्तु पुनर्नित्यं तन्नानुपलभ्यमाननित्यधर्मकं यथात्मादि । एवमेकेनान्यतरानुपलब्धेरनित्यत्वप्रसिद्धौ साधकत्वेनोपन्यासे सति द्वितीयः प्राह–यद्यनेन प्रकारेणानित्यत्वं साध्यते तर्हि नित्यतासिद्धिरप्यस्तु, अन्यतरानुपलब्धेस्तत्रापि सद्भावात् । तथा हि–नित्यः शब्दोऽनित्यधर्मानुपलब्धेरात्मादिवत् । यत्पुनर्न नित्यं तन्नानु-

१ गौ. सू. १।२।९.

२ गौ. सू. १।२।७. ३ न्या. मं. पृ. ५९०।

पलभ्यमानानित्यधर्मकं यथा घटादीति । तदित्थं कालात्ययापदिष्टप्रकरणसमाख्यहेत्वाभासद्वयस्य **नैयायिक**लक्षितस्यासिद्धादिभ्यः पृथग्भूतस्यापरस्यापि संभवात्कथं त्रय एव हेत्वाभासाः प्ररूपिता इति । अत्रोच्यते——कालात्ययापदिष्टस्तावत्प्रत्यक्षादिनिराकृतसाध्यविषये प्रवर्तमानत्वादकिंचित्करदूषणेनैव दूषित इति नासिद्धादिभ्यः पृथक्प्ररूपयितुं युक्त इति । प्रकरणसमस्तु हेत्वाभासो न संभवत्येव । यतोऽत्र नित्यधर्मानुपलब्धिस्तावत्प्रसज्यरूपा पर्युदासरूपा वा हेतुः स्यात् । न तावदाद्यः पक्षः । तुच्छाभावस्य निषिद्धत्वेनासिद्धत्वात् । द्वितीयपक्षे पुनरनित्यधर्मोपलब्धिरेव हेतुः । सा च शब्दे यदि सिद्धा कथं नानित्यतासिद्धिः । अथ चिन्तासंबन्धिना पुरुषेणासौ प्रयुज्यत इति न तत्र निश्चिता तर्हि कथं न संदिग्धासिद्धो हेतुर्वादिनं प्रति । प्रतिवादिनस्त्वसौ स्वरूपासिद्ध एव । नित्यधर्मोपलब्धेस्तत्रास्य सिद्धेः । एवमनित्यधर्मानुपलब्धिरपि परिक्षणीया । तन्न प्रकरणसमनामा परप्ररूपितः कश्चिद्धेत्वाभासः परीक्षापथमवतरतीति तल्लक्षणप्रणयनं वायसदशनश्रेणिश्लाघनप्रायमेवेति स्थितम् । इह च **श्रीसिद्धसेनदिवाकरसूरिः** ' सर्वमेवैकान्तवादिना समुपन्यस्यमानं .... .... .... ....कः प्रतिबन्धः । विशेषयोस्तु नियतदेशकालयोः प्रतिबन्धग्रहेऽपि तत्रैव तयोर्ध्वंसात्साध्यधर्मिण्यगृहीतप्रतिबन्ध एवान्यो विशेषो हेतुत्वेनोपादीयमानः कथं नानैकान्तिक ' इति । ततः **समन्तभद्राचार्य**मतेन समस्तः परोपन्यस्तो हेतुरनैकान्तिक एवेति स्थितम् । तथा चोक्तम्——

**' असिद्धः सिद्धसेनस्य विरुद्धो मल्लवादिनः ।**
**द्वेधा समन्तभद्रस्य हेतुरेकान्तसाधने ॥** ' इति ।

तदेतच्चिरन्तनाचार्यीयं मतत्रितयमपि संमतमेवास्माकमतिसंक्षेपापेक्षया । यथोक्तविवक्षयासिद्धादिहेत्वाभासेष्वन्यतमस्यैव युज्यमानत्वात् । शिष्यमतिविकासार्थं तु तद्भेदप्रपञ्चोपदर्शनम्

तथा कैश्चिदाचार्यैस्तीर्थिकोपन्यस्तः सर्वोऽपि हेतुः प्रत्येकमसिद्धो विरुद्धोऽनैकान्तिकश्च विवक्षया मन्यते । तथाहि—अनित्य एव शब्दः कृतकत्वाद्घटवदित्यत्र कृतकत्वमसिद्धम् । एकान्तानित्ये ध्वनौ तस्यासंभवात् । नित्यानित्यात्मकस्यैव कार्यस्योपपादितत्वात् । विरुद्धमप्येतद्भवति । एकान्तानित्यविपरीतनित्यानित्यात्मकस्यैव शब्दस्य साधकत्वात् । अनैकान्तिकं चैतत् । विपक्षेऽपि नित्ये वर्तमानत्वात् । एतदपि न्यायोपपन्नत्वादनुमन्यत एव ।

हेत्वाभासास्तत्त्रयोऽपि प्रसिद्धा । न चत्वारः पञ्च वा न्यायतोऽत्र ।
हेयाश्चैते वादिभिः स्वप्रयोगे । ज्ञात्वोद्भाव्यः साधने त्वन्यदीये ।।७०४।।

।। ५७ ।।

मन्दमतीन्प्रति दृष्टान्तादियोगोऽप्यनुजज्ञ इति तदाभासानामप्यभिधेयत्वे प्राप्ते दृष्टान्ताभासांस्तावदभिधत्ते—

**साधर्म्येण दृष्टान्ताभासो नवप्रकार इति ॥ ५८ ॥**

दृष्टान्तो हि द्विप्रकारः साधर्म्यवैधर्म्याभ्यामभिहित इति मूलभेदापेक्षया तदाभासोऽपि द्विप्रकार एव संभवति साधर्म्यदृष्टान्ताभासो वैधर्म्यदृष्टान्ताभासश्चेति । तत्र यः साधर्म्येण दृष्टान्त उक्तलक्षणस्तद्वदाभासत इति दृष्टान्ताभासो दृष्टान्तप्रतिरूपक इत्यर्थः । स नवप्रकारः ॥ ५८ ॥

प्रकारानेव कीर्तयन्नाह—

**साध्यधर्मविकलः, साधनधर्मविकलः, उभयधर्मविकलः, संदिग्धसाध्यधर्मा, संदिग्धसाधनधर्मा, संदिग्धोभयधर्मा, अनन्वयोऽप्रदर्शितान्वयो विपरीतान्वयश्चेति ॥ ५९ ॥**

साध्यधर्मेण विकलो रहितः साध्यधर्मविकलः । एवं साधनधर्मविकलोभयधर्मविकलावपि । तथा संदिग्धः साध्यो धर्मो यस्मिन्नसौ संदिग्धसाध्यधर्मा । एवं संदिग्धसाधनधर्मसंदिग्धोभयधर्माणामपि । तथा न विद्यतेऽन्वयो यत्रासावनन्वयः । एवमप्रदर्शितान्वयविपरीतान्वयावपि । चशब्दः समुच्चये । इतिशब्दः प्रकारपरिसमाप्तौ । न चैवैते साधर्म्यदृष्टान्ताभासप्रकारा इत्यर्थः ॥ ५९ ॥

अथैतेषां क्रमेणोदाहरणान्याह——

**तत्रापौरुषेयः शब्दोऽमूर्तत्वाद्दुःखवदिति साध्यधर्मविकल इति ॥ ६० ॥**

दुःखं हि पौरुषेयं, पुरुषव्यापाराभावे दुःखानुभवायोगात् । ततोऽयं दृष्टान्तोऽपौरुषेयत्वाख्यो न साध्यधर्मेण विकल इति ॥ ६० ॥

**तस्यामेव प्रतिज्ञायां तस्मिन्नेव हेतौ परमाणुवदिति साधनधर्मविकल इति ॥ ६१ ॥**

परमाणौ हि साध्यधर्मोऽपौरुषेयत्वमस्ति । साधनधर्मस्त्वमूर्तत्वं नास्ति मूर्तत्वात्परमाणोः ॥ ६१ ॥

**कलशवदित्युभयधर्मविकल इति ॥ ६२ ॥**

अपौरुषेयः शब्दोऽमूर्तत्वादित्यस्मिन्नेव प्रयोगे कलशवदिति दृष्टान्त उभयधर्माभ्यां साध्यसाधनलक्षणाभ्यां विकलः पौरुषेयत्वान्मूर्तत्वाच्च कलशस्य ॥ ४२ ॥

**रागादिमानयं वक्तृत्वाद्देवदत्तवदिति संदिग्धसाध्यधर्मेति ॥ ६३ ॥**

देवदत्ते हि रागादयः संदिग्धाः किं सन्त्याहोस्विन्नेति पुरुषान्तरगतानां चेतोविकाराणां परोक्षत्वेनास्मादृशानां तत्र संदेहात् । रागाद्यव्यभिचारिलिङ्गादर्शनाच्च ॥ ६३ ॥

**मरणधर्माऽयं रागादिमत्त्वान्मैत्रवदिति संदिग्धसमानधर्मेति ॥ ६४ ॥**

मैत्रे हि साधनधर्मो रागादिमत्त्वाख्यः संदिग्धः ॥ ६४ ॥

**नायं सर्वदर्शी सरागत्वान्मुनिविशेषवदिति ॥६५॥**

संदिग्धोभयधर्मेति मुनिविशेषे ह्यसर्वदर्शित्वसरागत्वाख्यावुभावपि साध्यसाधनधर्मौ संदिग्धौ । पुरुषान्तराधिकरणधर्मकदम्बकस्यार्वाग्दर्शिनामप्रत्यक्षत्वात् । असर्वदर्शित्वसरागत्वाव्यभिचारिलिङ्गादर्शनात्सर्वदर्शित्ववीतरागत्वनिश्चायकलिङ्गादर्शनाच्च ॥ ६५ ॥

**रागादिमान्विवक्षितः पुरुषो वक्तृत्वादिष्टपुरुषवदित्यनन्वय इति ॥ ६६ ॥**

यद्यपि किलेष्टपुरुषे रागादिमत्त्वं च वक्तृत्वं च साध्यसाधनधर्मौ दृष्टौ तथापि यो यो वक्ता स स रागादिमानिति व्याप्त्यसिद्धेरनन्वयत्वम् ॥ ६६ ॥

**अनित्यः शब्दः कृतकत्वाद्धटवदित्यप्रदर्शितान्वय इति ॥ ६७ ॥**

अत्र यद्यपि वास्तवोऽन्वयोऽस्ति तथापि वादिना वचनेन प्रकाशित इत्यप्रदर्शितान्वयत्वम् ॥ ६७ ॥

**अनित्यः शब्दः कृतकत्वात्, यदनित्यं तत्कृतकं घटवदिति विपरीतान्वय इति ॥ ६८ ॥**

साधर्म्यप्रयोगे हि साधनं साध्याक्रान्तमुपदर्शनीयम् । इह तु विपर्यासदर्शनाद्विपरीतता । नन्वेवमप्यव्यभिचारान्न किंचिदनुपपन्नं पश्यामः। न खल्वनित्यत्वं क्वापि कृतकत्वं व्यभिचरतीति चेत् । न्याय्यमिदं समव्याप्तिषु साधनेषु न पुनर्विषमव्याप्तिषु । तथा हि—यदनित्यं तत्प्रयत्नानन्तरीयकमित्यत्र व्याप्तिर्नास्त्येव । विद्युदादेरनित्यस्याप्यप्रयत्ना-

नन्तरीयकत्वात् । ततः सकलहेतुगताव्यभिचरीतव्याप्त्यसिध्द्यर्थं साधर्म्यनिदर्शने साधनं साध्याक्रान्तमेव दर्शनीयमिति ॥ ६८ ॥

अथ वैधर्म्यदृष्टान्ताभासं प्रपञ्चयन्नाह——

**वैधर्म्येणापि दृष्टान्ताभासो नवधेति ॥ ६९ ॥**

वैधर्म्येणापि न केवलं साधर्म्येण ॥ ६९ ॥

तानेव प्रकारानुद्दिशन्नाह——

**असिद्धसाध्यव्यतिरेकः, असिद्धसाधनव्यतिरेकः, असिद्धोभयव्यतिरेकः, संदिग्धसाध्यव्यतिरेकः, संदिग्धसाधनव्यतिरेकः, संदिग्धोभयव्यतिरेकः, अव्यतिरेकः, अप्रदर्शितव्यतिरेकः, विपरीतव्यतिरेकश्चेतीति ॥ ७० ॥**

असिद्धोऽप्रतीतः साध्यस्य व्यतिरेकोऽभावो यस्मादसावासिद्धसाध्यव्यतिरेकः । एवमसिद्धसाधनव्यतिरेकादिष्वपि निरुक्तिः कार्या । चशब्देतिशब्दौ पूर्ववत् ॥ ७० ॥

अथैतेषामेव प्रकाराणां यथाक्रममुदाहरणान्युपदर्शयन्नाह——

**तेषु भ्रान्तमनुमानं प्रमाणत्वात् । यत्पुनर्भ्रान्तं न भवति न तत्प्रमाणम् । यथा स्वप्नज्ञानमित्यसिद्धसाध्यव्यतिरेकः स्वप्नज्ञानाभ्रान्तत्वस्यानिवृत्तेरिति ॥ ७१ ॥**

**निर्विकल्पकं प्रत्यक्षं प्रमाणत्वात् । यत्तु सविकल्पकं न तत्प्रमाणम् । यथा लैङ्गिकमित्यसिद्धसाधनव्यतिरेकः । लैङ्गिकात्प्रमाणत्वस्यानिवृत्तेः ॥ ७२ ॥**

**नित्यानित्यः शब्दः सत्त्वाद्यस्तु न नित्यानित्यः स न सन् । तद्यथा स्तम्भ इत्यसिद्धोभयव्यतिरेकः**

**स्तम्भान्नित्यानित्यत्वस्य[1] चाव्यावृत्तेरिति ॥७३ ॥**

उत्तानार्थमिदं सूत्रत्रयमपि ॥ ७१ ॥ ७२ ॥ ७३ ॥

**असर्वज्ञोऽनाप्तो वा कपिलः । अक्षणिकैकान्तवादित्वात् । यः सर्वज्ञ आप्तो वा स क्षणिकैकान्तवादी यथा सुगत इति संदिग्धसाध्यव्यतिरेकः सुगतेऽसर्वज्ञतानाप्ततयोः साध्यधर्मयोर्व्यावृत्तेः संदेहादिति ॥ ७४ ॥**

अयं च परमार्थतोऽसिद्धसाध्यव्यतिरेक एव । क्षणिकैकान्तस्य प्रमाणबाधितत्वेन तदभिधातुरसर्वज्ञत्वानाप्तत्वप्राप्तेः । केवलं तत्प्रतिक्षेपकप्रमाणमाहात्म्यपरामर्शनशून्यानां प्रमातॄणां संदिग्धसाध्यव्यतिरेकत्वेनाभासत इति तथैव कथितः । तथा हि यद्यपि **सुगतः** क्षणिकैकान्तमभिहितवांस्तथापि सर्वज्ञत्वाप्तत्वे तस्य न सिध्द्यतः । ताभ्यां सह क्षणिकैकान्ताभिधानस्यान्यथानुपपत्त्यसिद्धेः । असर्वज्ञानाप्तेनापि परप्रतारणाशयप्रवृत्तशठपुरुषेण तथाविधाभिधानस्य कर्तुं शक्यत्वात् । ततः **सुगता**दसर्वज्ञत्वानाप्तत्वलक्षणस्य साध्यस्य व्यावृत्तिः संदिग्धेति संदिग्धसाध्यव्यतिरेकत्वमिति ॥ ७४ ॥

**अनादेयवचनः कश्चिद्विवक्षितः पुरुषो रागादिमत्त्वात्, यः पुनरादेयवचनः स वीतरागः, तद्यथा शौद्धोदनिरिति संदिग्धसाधनव्यतिरेकः शौद्धोदनो रागादिमत्त्वस्य निवृत्तेः संशयादिति ॥ ७५ ॥**

इदमत्र तात्पर्यम्—यद्यपि तद्दर्शनानुरागिणां शौद्धोदनेरादेयवचनत्वं प्रसिद्धम् । तथा हि—रागादिमत्त्वाभावस्तन्निश्चायकप्रमाणवैक-

---

1 सत्त्वस्येत्यधिकं रत्नाकरावतारिकासूत्रेषु ।

स्यतः संदिग्ध एव । ततः शौद्धोदनेः सकाशाद्रागादिमत्त्वव्यावृत्तेः संशयात्संदिग्धसाधनव्यतिरेकत्वमिति ॥ ७५ ॥

**न वीतरागः कपिलः, करुणास्पदेष्वपि परमकृपयानर्पितनिजपिशितशकलत्वात् । यस्तु वीतरागः स करुणास्पदेषु परमकृपया समर्पितनिजपिशितशकलस्तद्यथा तपनबन्धुरिति संदिग्धोभयव्यतिरेक इति तपनबन्धौ वीतरागत्वाभावस्य करुणास्पदेष्वपि परमकृपयानर्पितनिजपिशितशकलत्वस्य च व्यावृत्तेः संदेहादिति ॥ ७६ ॥**

अत्रापीदं रहस्यम् । तपनबन्धुरितिशब्देन किल बुद्धौ वैधर्म्यदृष्टान्ततया यः समुपन्यस्तः स न ज्ञायते । किं रागादिमानुत वीतरागस्तथा करुणास्पदेषु परमकृपया निजपिशितशकलानि समर्पितवान्न वा । तन्निश्चायकप्रमाणाभावात् । ततः सिद्धमत्र संदिग्धोभयव्यतिरेकत्वमिति ॥ ७६ ॥

**न वीतरागः कश्चिद्विवक्षितः पुरुषो वक्तृत्वात् । यः पुनर्वीतरागो न स वक्ता यथोपलखण्ड इत्यव्यतिरेक इति ॥ ७७ ॥**

यद्यपि किलोपलखण्डादुभयं व्यावृत्तं तथापि व्याप्त्या व्यतिरेकासिद्धेरव्यतिरेकत्वमिति ॥ ७७ ॥

**अनित्यः शब्दः कृतकत्वादाकाशवदित्यप्रदर्शितव्यतिरेक इति ॥ ७८ ॥**

अत्र यदनित्यं न भवति तत्कृतकमपि न भवतीति विद्यमानोऽपि व्यतिरेको वादिना वचनेनोद्भावित इत्यप्रदर्शितव्यतिरेकत्वमिति॥७८॥

**अनित्यः शब्दः कृतकत्वात् । यदकृतकं तन्नित्यं यथाकाशमिति विपरीतव्यतिरेक इति ॥ ७९ ॥**

वैधर्म्यप्रयोगे हि साध्याभावः साधनाभावाक्रान्तो दर्शनीयः । न चैवमत्र साधनाभावस्य साध्याभावव्याप्ततयाभिधानादिति विपरीतव्यतिरेकत्वम् । एवं च व्याप्तौ क्रियमाणायां विषमव्याप्तिषु हेतुषु दुष्परिहारो व्यभिचारः । तथा हि—यदप्रयत्नानन्तरीयकं तन्नित्यमित्यत्र दुरापा व्याप्तिः । तडिदादेरप्रयत्नानन्तरीयकस्याप्यनित्यत्वात् । यद्यपि चाप्रदर्शितान्वयविपरीतान्वयाप्रदर्शितव्यतिरेकविपरीतव्यतिरेकेषु वस्तुनिष्ठो न कश्चिद्दोषस्तथापि परार्थानुमाने वचनगुणदोषानुसारेण वक्तुर्गुणदोषौ परीक्षणीयाविति भवत्येषां वाचनिकं दुष्टत्वमिति ।

एवमष्टादश स्पष्टं दृष्टान्तस्य व्यवस्थिताः ।
दोषाः सन्न्यायमाहात्म्याज्ज्ञातव्यास्तर्ककर्कशैः ॥७०५ ॥७९॥

अथोपनयनिगमनाभासौ लक्षयन्नाह—

**उक्तलक्षणोल्लङ्घनेनोपनयनिगमनयोर्वचने तदाभासाविति ॥ ८० ॥**

हेतोः साध्यधर्मिण्युपसंहरणमुपनयः । साध्यधर्मस्य पुनर्निगमनमिति ह्युपनयनिगमनयोर्लक्षणमाचचक्षे तदतिक्रमेण तयोर्वचसी तदाभासावुपनयाभासो निगमनाभासश्च वेदितव्यावित्यर्थः ॥ ८० ॥

तत्रोपनयाभासं तावदुदाहरन्नाह—

**यथा परिणामी शब्दः कृतकत्वात् । यः कृतकः स परिणामी यथा कुम्भ इत्यत्र परिणामी च शब्द इति कृतकश्च कुम्भ इति चेति ॥ ८१ ॥**

इह कश्चन भ्रान्त्योपनयप्रयोगं रचयितुकामः साध्यधर्ममेव साध्यधर्मिण्युपसंहरति न पुनः साधनधर्मम् । परिणामी च शब्द इत्युल्लेखेन

साधनधर्मं वा दृष्टान्तधर्मिण्युपसंहरति न पुनः साध्यधर्मिणि कृतश्च कुम्भ इत्युल्लेखेन ताविमौ द्वावपि यथोक्ततल्लक्षणोल्लङ्घित्वादुपनयाभासाविति ॥ ८१ ॥

अथ निगमनाभासनिदर्शनमाह—

**तस्मिन्नेव प्रयोगे तस्मात्कृतकः शब्द इति तस्मात्परिणामी कुम्भ इति चेति ॥ ८२ ॥**

अत्रापि कश्चिन्मूढमतिस्तस्मिन्नेव प्रयोगे परिणामी शब्द इत्यादौ कृतकश्च शब्द इत्युपनयानन्तरं निगमनप्रयोगचिकीर्षया तस्मात्कृतकः शब्द इत्युल्लेखेन साधनधर्ममेव साध्यधर्मिण्युपसंहरति न पुनः साध्यधर्मम् । तस्मात्परिणामी कुम्भ इत्युल्लेखेन वा साध्यधर्मं दृष्टान्तधर्मिण्युपसंहरति न पुनः साध्यधर्मिणि । द्वावप्येतौ प्ररूपिततल्लक्षणाननुषंगित्वान्निगमनाभासाविति । एवं पक्षशुद्ध्याद्यवयवपञ्चकस्य भ्रान्त्या वैपरीत्यप्रयोगे तदाभासपञ्चकमपि तर्कणीयम् ।

अनुमानाभासमिदं पक्षाभासादिसंभवं वादे ।
नो वादिभिर्विधेयं जयलक्ष्मीसंगमाकाङ्क्षैः ॥ ७०६ ॥८२॥

इत्थमनुमानाभासं प्रबन्धेनाभिधायाधुना क्रमायातमागमाभासमाह—

**अनाप्तवचनप्रभवं ज्ञानमागमाभासमिति ॥ ८३ ॥**

प्राग्लक्षितस्वरूपादाप्ताद्विपरीतोऽनाप्तस्तस्य संबन्धि यद्वचनं ततः प्रभव उत्पत्तिर्यस्य तत्तथा ॥ ८३ ॥

अत्रोदाहरणमाह—

**यथा मेकलकन्यकायाः कूले तालहिन्तालयोर्मूले सुलभाः पिण्डखर्जूराः सन्ति त्वरितं गच्छत गच्छत शावका इति ॥ ८४ ॥**

रागाक्रान्तो ह्यनाप्तः पुरुषः क्रीडापरवशः सन्नात्मनो विनोदार्थं किंचन वस्त्वन्तरमलभमानः शावकैरपि समं क्रीडाभिलाषेणेदं वाक्य-

मुच्चारयति । अथवा प्रयोजनान्तरनिबद्धमनोवृत्तिर्डिम्भकदर्थनामसहिष्णुर्द्वेषाक्रान्तः कश्चित्पुमानात्मीयस्थानात् डिम्भोच्चाटनाभिलाषेणैतद्वाक्यमभिधत्ते । एतस्माच्च वाक्यात्प्रवर्तमाना विप्रलम्भभाज एव जायन्ते । इत्याप्तोक्तेरन्यत्वादस्यागमाभासत्वम् ।

स्वरूपाभास एवं च प्रमाणस्य प्रदर्शितः ।
सम्यग्बोधाविधायित्वाद्धेयोऽयं नियमाद्बुधैः ॥ ७०७ ॥८४॥

अथ प्रमाणस्य संख्याभासोपदर्शनार्थमाह—

**प्रत्यक्षमेवैकं प्रमाणमित्यादि संख्यानं तस्य संख्याभासमिति ॥ ८५ ॥**

प्रत्यक्षपरोक्षभेदाद्धि प्रमाणस्य द्वैविध्यमुक्तम् । तद्वैपरीत्येन प्रत्यक्षमेव प्रत्यक्षानुमानेनैव प्रत्यक्षानुमानागमा एव प्रमाणमित्यादिकं **चार्वाकवैशेषिकसौगतसांख्यादि**तीर्थान्तरीयाणां संख्यानम् । तस्य पूर्वोक्तप्रमाणस्य संख्याभासं संख्याप्रतिरूपकम् । न खलु नास्तिकः परबुद्ध्यादिकमनुमानं विना प्रत्यक्षत एव प्रतिपत्तुं समर्थः । तस्यास्तद्गोचरत्वात् । अनुमानतस्तु तत्प्रतिपत्तिस्वीकारे दुर्वारः प्रमाणान्तराङ्गीकारः । तस्य तथा चाभ्युपगता प्रत्यक्षमेवैकं प्रमाणमिति प्रमाणसंख्या संख्याभासतां नातिक्रामति । **सौगतकाणादकापिलनैयायिकप्राभाकरभाट्टा** अपि द्वित्रिचतुष्पञ्चषट्प्रमाणवादिनस्तर्काख्यं प्रमाणान्तरमन्तरेण स्वाभ्युपगतप्रमाणविशेषादेव साध्यसाधनयोर्न व्याप्तिमवसातुं पटीयांसः । प्रत्यक्षाद्यविषयत्वात्तस्याः । अतर्कप्रमाणतश्च तयोर्व्याप्त्यवसायस्वीकारे स्वाभ्युपगतप्रमाणसंख्याभङ्गप्रसङ्गस्तेषाम् । न च प्रत्याक्षादिष्वेव तर्कस्यानुप्रवेश इति मन्तव्यम् । तेभ्यस्तस्य स्वरूपादिभिः पार्थक्येन पुरा प्रतिष्ठितत्वात् । कृतं च विस्तरतः पराभ्युपगतप्रमाणसंख्याप्रत्याख्यानं द्वितीयपरिच्छेद इत्यलमिह प्रसंगेन ॥ ८५ ॥

अथ विषयाभासं प्रकाशयन्नाह—

**सामान्यमेव विशेष एव तद्द्वयं वा स्वतन्त्रमित्यादिस्तस्य विषयाभास इति ॥ ८६ ॥**

सामान्यमात्रं सत्ता द्वैतवादिनो, विशेषमात्रं **सौगतस्य,** तदुभयं च स्वतन्त्रं **नैयायिका**देरित्यादिरेकान्तस्तस्य प्रमाणस्य विषयाभासः । न सम्यग्विषय इत्यर्थः । आदिशब्दान्नित्यमेवानित्यमेव तद्द्वितयं वा परस्परनिरपेक्षमित्याद्येकान्तपरिग्रहः । यथा च सामान्याद्येकान्तस्य न प्रमाणविषयत्वं तथा प्रागेव विषयपरिच्छेदे प्रपञ्चितमिति नात्र भूयान्प्रयासः ॥ ८६ ॥

फलाभासमाह—

**अभिन्नमेव भिन्नमेव वा प्रमाणात्फलम् । तस्य तदाभासमिति ॥ ८७ ॥**

अभिन्नमेव प्रमाणात्फलं **बौद्धा**भ्युपगतम् । भिन्नमेव च **नैयायिका**दिस्वीकृतम् । तस्य प्रमाणस्य तदाभासं फलाभासमित्यर्थः । अत्यन्ताभेदे हि प्रमाणफलयोरिदं प्रमाणमिदं फलमिति विभागस्यानुपपत्तिः । प्रमाणमात्रस्यैव तात्त्विकत्वानुषंगात् । अप्रमाणव्यावृत्त्यफलव्यावृत्तिभ्यां पुनस्तयोर्विभागकल्पनायां प्रमाणान्तरव्यावृत्तिफलान्तरव्यावृत्तिभ्यामप्रमाणत्वाफलत्वयोरपि प्रसक्तिः । एकान्तभेदे पुनः प्रमाणफलयोर्विवक्षितपुरुषसंबन्धिप्रमाणस्यैव पुरुषान्तरसंबन्धिप्रमाणस्यापि विवक्षितं फलं प्रसज्येताविशेषात् । यत्रैवात्मनि यत्प्रमाणं समवेतं तत्फलमपि तत्रैवेति समवायलक्षणया प्रत्यासत्त्या प्रमाणफलयोर्व्यवस्थासिद्धेर्नात्मान्तरप्रमाणस्य विवक्षितफलप्रसंग इति संगतं समवायस्य सर्वगतत्वाच्च सर्वात्मप्रत्यासत्तिसंभवेन व्यवस्थाहेतुत्वासिद्धेः । तस्मादेकान्तेनाभिन्नं भिन्नं च प्रमाणात्फलं तीर्थिकाभ्यु-

पगतं फलाभासमेव । एतच्च सर्वमत्रैव परिच्छेदे विस्तरतोऽभिहित-मिति न भूयः प्रतन्यत इति ।

आभासानां स्वरूपं तदिदमविचलं किंचिदेवं प्रणीतं
ज्ञात्वा चैतत्समग्रं स्फुरितमतिगुणैर्वर्जनीयं स्वपक्षे ।
उद्भाव्यं त्वन्यपक्षे झगिति सहृदयप्राश्निकानां समक्षं
येन स्याच्छासनस्य त्रिजगति महतां माननीया यशःश्रीः ॥७०८॥

मूलतोऽत्र फलं तावत्प्रमाणस्य परीक्षितम् ।
आभासास्तत्स्वरूपादेर्दर्शितास्तदनन्तरम् ॥ ७०९ ॥

यस्याप्राप्य जिनेश्वरस्य समयारामोदरं सुन्दरं
भ्राम्यन्तः कुविकल्पदुस्तरमरोर्मार्गेषु दुस्तीर्थिकाः ।
मुह्यन्ति प्रमितिप्रमेयमितिषु क्षीणप्रमोदाश्चिरं
सारङ्गा मृगतृष्णिकास्विव स वः श्वःश्रेयसानि क्रियात् ॥ ७१० ॥

दूरादपास्य दुरितानि पुरार्जितानि
श्रीसुव्रतः प्रतनुतां कुशलानि देवः ।
यत्प्रक्रमाम्बुजयुगं सुधियः स्मरन्तः
किं नाम नैव परमं पदमाप्नुवन्ति ॥ ७११ ॥

श्रीसुव्रतक्रमयुगारुणकान्तिजाल-
किञ्जल्कपुञ्जपरिचुम्बनभृङ्गपत्नी ।
देवी नरेश्वरशतप्रणताङ्घ्रियुग्मा
भूयादभीप्सितकरीह सुदर्शना नः ॥ ७१२ ॥

यः क्षेत्रं कान्तिलक्ष्म्योरमृतरसमुचां यः कलानां निधानं
सद्वृत्तेषु प्रधानं य इह निरवधिस्तारकाणां पतिर्यः ।
नालीकानां न सोढा शिरसि कृतकरस्तुङ्गभूमीधराणा-
मज्ञानध्वान्तबन्धं विघटयतु स नः पूर्णचन्द्रो मुनीन्द्रः ॥७१३॥ ८७॥

इत्युपदेशपदप्रासादप्रद्योतनप्रदीपश्रीमन्मुनिचन्द्रसूरिपदसरसिजोपजीविना **श्रीदेवाचार्येण** विरचिते स्याद्वादरत्नाकरे **प्रमाणनयतत्त्वालोकालङ्कारे** फलस्वरूपनिर्णयो नाम षष्ठः **परिच्छेदः** समाप्तः ॥ ६ ॥

# अथ सप्तमः परिच्छेदः ।

( ऐतावता प्रमाणत्वं व्यवस्थाप्येदानीं नयतत्त्वं व्यवस्थापयन्ति- )

**नीयते येन श्रुताख्यप्रमाणविषयीकृतस्यार्थस्यांशस्तदितरांशौदासीन्यतः स प्रतिपत्तुरभिप्रायविशेषो नयः ॥ १ ॥**

.... .... .... .... .... .... .... ....

... नैगमादिप्रभेद इति । ननु नयस्य प्रमाणोद्भेदेन लक्षणप्रणयनमयुक्तम् । स्वार्थव्यवसायकत्वेन तस्य प्रमाणस्वरूपत्वात् । तथा हि— नयः प्रमाणमेव स्वार्थव्यवसायकत्वादिष्टप्रमाणवत् । स्वार्थव्यवसायकस्याप्यस्य प्रमाणत्वानभ्युपगमे प्रमाणस्यापि तथाविधस्य प्रमाणत्वं न स्यादिति कश्चित् । तदसत् । नयस्य स्वार्थैकदेशनिर्णीतलक्षणत्वेन स्वार्थव्यवसायकत्वासिद्धेः । ननु नयविषयतया संमतोऽर्थैकदेशोऽपि यदि वस्तु तदा तत्परिच्छेदी नयः प्रमाणमेव । वस्तुपरिच्छेदलक्षणत्वात्प्रमाणस्य । स न चेद्वस्तु तर्हि तद्विषयो नयो मिथ्याज्ञानमेव स्यात् । तस्यावस्तुज्ञानविषयत्वलक्षणत्वादिति चेत् । तदप्यवद्यम् । अर्थैकदेशस्य वस्तुत्वावस्तुत्वपरिहारेण वस्त्वंशतया प्रतिज्ञानात् । तथा चावाचि विपश्चिद्भिः—

' नायं वस्तु न चावस्तु वस्त्वंशः कथ्यते बुधैः ।
नासमुद्रः समुद्रो वा समुद्रांशो यथोच्यते ॥
तन्मात्रस्य समुद्रत्वे शेषांशस्यासमुद्रता ।
समुद्रबहुता ( त्वं ) वा स्यात्तचेत्कास्तु समुद्रवित् ॥' इति ।

---

१ रत्नाकरावतारिकात इदमवतरणमुध्दृतम् । २ त.श्लो.वा. पृ. ११८श्लो. ५-६.

यथैव हि समुद्रांशस्य समुद्रत्वे शेषसमुद्रांशानामसमुद्रत्वप्रसंगात्समुद्रबहुत्वापत्तेर्वा तेषामपि प्रत्येकं समुद्रत्वात् । तस्यासमुद्रत्वे वाऽशेषसमुद्रांशानामप्यसमुद्रत्वात्कचिदपि समुद्रव्यवहारायोगात्समुद्रांशः समुद्रांश एवोच्यते । तथा स्वार्थैकदेशो नयस्य न वस्तु, स्वार्थैकदेशान्तराणामवस्तुत्वप्रसंगाद्वस्तुबहुत्वानुषक्तेर्वा । नाप्यवस्तु, विशेषांशानामप्यवस्तुत्वेन कचिदपि वस्तुव्यवस्थानुपपत्तेः । किं तर्हि वस्त्वंश एवासौ तादृक्प्रतीतेर्बाधकाभावात् । ततो वस्त्वंशे प्रवर्तमानो नयः स्वार्थैकदेशव्यवसायलक्षणो न प्रमाणम् । नापि मिथ्याज्ञानमिति । ननु च यथांशो न वस्तु नाप्यवस्तु किं तर्हि वस्त्वंश एवेति मतं, तथांशी न वस्तु नाप्यवस्तु, तस्यांशित्वादेव वस्तुनोऽशांशिसमूहलक्षणत्वात् । ततोऽशेष्विव प्रवर्तमानं ज्ञानमंशिन्यपि नयोऽस्तु । नो चेद्यथा यथा तत्र प्रवृत्तं ज्ञानं प्रमाणं तथांशेष्वपि, विशेषाभावात् । तथोपगमे च न प्रमाणादपरो नयः समस्ति । तदुक्तम्—

**' यथांशिनि प्रवृत्तस्य ज्ञानस्येष्टा प्रमाणता ।**
**तथांशेष्वपि किं न स्यादिति मानात्मको नयः '** ॥ इति ।

एतदप्ययुक्तम् । यतो गुणीभूताखिलांशोंऽशिनिर्ज्ञानं नय एव, तत्र द्रव्यार्थिकनयस्य व्यापारात् । प्रधानभावार्पितसकलांशे तु प्रमाणमिति नानिष्टापत्तिः । अंशिमात्रज्ञानस्य प्रमाणत्वानभ्युपगमात् । ततः प्रमाणादपर एव नय इति । तथा चोक्तम्—

**' अंशिन्यपि हि निःशेषधर्माणां गुणतागतौ ।**
**द्रव्यार्थिकनयस्यैव व्यापारान्मुख्यरूपतः ॥**
**धर्मिधर्मसमूहस्य प्राधान्यार्पणया विदः ।**
**प्रमाणत्वेन निर्णीतिः प्रमाणादपरो नयः ॥ '** इति ।

---

१ त. श्लो. वा. पृ. १२३ श्लो. १८.
२ त. श्लो. वा. पृ. १२३ श्लो. १९-२०—

नन्वेवमप्रमाणात्मको नयः कथं सम्यक्प्रतिपत्तिनिबन्धनं स्यान्मिथ्याज्ञानवत् । तथा हि—प्रमाणादपरश्चेन्नयस्तर्ह्यप्रमाणमेवासावितरथा व्याघातः । सकृदेकस्य प्रमाणत्वाप्रमाणत्वनिषेधासंभवात्, प्रमाणत्वनिषेधिना प्रमाणविधानादप्रमाणत्वविरोधाभावादिति । तदपि न पीडाकरम् । प्रमाणैकदेशस्य राश्यन्तरस्य सद्भावात् । न खलु नयस्य प्रमाणत्वमेव प्रमाणादेकान्तेनाभिन्नस्यानिष्टेः । नाप्यप्रमाणत्वम् । भेदस्यैवानभ्युपगमात्, देशदेशिनोः कथंचिद्भेदस्य साधनात् । येनात्मना प्रमाणात्तदेकदेशस्य भेदस्तेनाप्रमाणत्वम् । येन त्वभेदस्तेन प्रमाणत्वमेव स्यादिति चेत् । हन्त । किमनिष्टं देशतः प्रमाणत्वाप्रमाणत्वयोर्नयस्येष्टत्वात्सामस्त्येन तन्निषेधात्समुद्रैकदेशस्य तथा समुद्रत्वासमुद्रत्वनिषेधवत् । यथोक्तम्—

**' नाप्रमाणं प्रमाणं वा नयो ज्ञानात्मको मतः ।**
**स्यात्प्रमाणैकदेशस्तु सर्वथाप्यविरोधतः ॥ '** इति ।

ननु कार्त्स्न्येन प्रमाणं नयः संवादकत्वात्स्वेष्टप्रमाणवदिति चेत् । मैवं वादीः । नयस्यैकदेशेन संवादकत्वात्कार्त्स्न्येन तदसिद्धेः । कथमेवं प्रत्यक्षादेस्तत्प्रमाणत्वासिद्धिः। तस्यैकदेशेन संवादकत्वादिति चेत् । न । कतिपयपर्यायात्मकद्रव्ये प्रत्यक्षादेः संवादकत्वोपगमात् । एवंविधस्यैव सकलादेशित्वस्य प्रमाणतया पूर्वसूरिभिरभिधानात् ' **सकलादेशः प्रमाणाधीन** ' इति । न च सकलादेशित्वमेव सत्यत्वम् । विकलादेशिनो नयस्यासत्त्वप्रसंगात् । न च नयोऽपि सकलादेशी ' **विकलादेशो नयाधीन** ' इति वृद्धवचनात् । नाप्यसत्यो नयः । सुनिश्चितासंभवाद्बाधकत्वात्प्रमाणवत् ।

---

१ त. श्लो. पृ. १२३ श्लो. २१.

तदेवं नयस्य प्रमाणाद्भेदेन प्रसिद्धेस्तल्लक्षणप्रणयनमनुपपन्नमेवेति ।

तथा च—

श्रुतार्थांशांश एवेह योऽभिप्रायः प्रवर्तते ।
इतरांशाप्रतिक्षेपी स नयः सुव्यवस्थितः ॥ ७१४ ॥

इति नयनगरद्वारे मङ्गलकलशोपमं प्रथमसूत्रम् ।
सद्युक्तिसुधानिभृतं सुवर्णघटितं चिरं स्थेयात् ॥ ७१५ ॥ १ ॥

उक्तं नयस्य सामान्यलक्षणमिदानीं नयाभासस्य तद्दर्शयितुमाह—

## स्वाभिप्रेतादंशादितरांशापलापी पुनर्नयाभास इति ॥ २ ॥

स्वाभिप्रेतात्स्वगोचरीकृतादंशाच्छ्रुतार्थस्यैकदेशादितरांशापलापी, अपरैकदेशप्रतिक्षेपी पुनःशब्दो नयादस्य विशेषं द्योतयति । नयाभासो नयप्रतिबिम्बमात्रं दुर्नय इत्यर्थः । यथा तीर्थिकानां नित्याद्येकान्तप्रदर्शकं सकलं वाक्यमिति ॥ २ ॥

अथ नयप्रकारसूचनायाह—

## स व्याससमासाभ्यां द्विप्रकार इति ॥ ३ ॥

स प्राकरणिको नयो व्यासो विस्तरः समासः संक्षेपस्ताभ्यां द्विप्रकारो व्यासनयः समासनयश्चेत्यर्थः ॥ ३ ॥

व्यासनयप्रकारप्रकाशनायाह—

## व्यासतोऽनेकविकल्प इति ॥ ४ ॥

व्यासतो विस्तरतो यो नयः सोऽनेकविकल्पोऽनेकप्रकारः । एकांशे गोचरस्य हि प्रतिपत्त्रभिप्रायविशेषस्य नयस्वरूपत्वमभिहितम् । ततश्चानन्तांशात्मके वस्तुन्येकैकांशपर्यवसायिनो यावन्तः प्रतिपत्तॄणामभिप्रायास्तावन्तो नयास्ते च ( नियतसंख्यया संख्यातुं न शक्यन्त इति व्यासतो नयस्यानेकप्रकारत्वमुक्तम् ) ॥ ४ ॥

**सामान्यतस्तु द्विभेदो द्रव्यार्थिकः पर्यायार्थिकश्चेति ॥ ५ ॥**

........स्य पृथक्त्वेन द्रव्यादनुपपत्तितः सादृश्यपरिणामस्य तथा व्यञ्जनपर्यायान्वैसादृश्यविवर्तस्य विशेषस्य च पर्यायोऽन्तर्भावाद्विभाव्येत । द्वौ तन्मूलं नयाविति । सामान्यस्येति, ऊर्ध्वतासामान्यस्येत्यर्थः । सादृश्यपरिणामस्येति तिर्यक्सामान्यस्येत्यर्थः । तन्मूलमिति तेषां नैगमादीनां मूलम् । एतेन नामादिचतुष्टयद्वारतो द्रव्यक्षेत्रादिचतुष्टयद्वारतश्च तन्मूलनयचतुष्टयप्रसंजनं प्रत्युक्तम् । नामादीनां द्रव्यक्षेत्रादीनां च द्रव्यपर्याययोरेवान्तर्गतत्वादिति ।

तदित्थं न्यायतः सिद्धौ द्रव्यपर्यायगोचरौ ।
द्वावेव नैगमादीनां मूलभूतौ नयाविह ॥ ७१६ ॥ ५ ॥

अथ द्रव्यार्थिकभेदाविर्भावनायाह—

**आद्यो नैगमसंग्रहव्यवहारभेदात्त्रेधेति ॥ ६ ॥**

आद्यो द्रव्यार्थिकनयः ॥ ६ ॥

तत्र नैगमप्ररूपणायाह—

**धर्मयोर्धर्मिणोर्धर्मधर्मिणोश्च प्रधानोपसर्जनभावेन यद्विवक्षणं स नैकगमो नैगम इति ॥ ७ ॥**

धर्मयोः पर्याययोर्धर्मिणोर्द्रव्यपर्याययोश्च समुच्चयः प्रधानोपसर्जनभावेन मुख्यामुख्यरूपतया यद्विवक्षणं योऽभिप्रायः स एवंरूपः । नैके गमा बोधमार्गा यस्यासौ नैकगमोऽनेकमार्गोऽनेकप्रकार इति निरुक्तान्नैगमो नैगमनामाऽनयोर्द्रव्यार्थिकस्य प्रथमो भेदः । एवं धर्मद्वयविषयो धर्मियुग्मगोचरो धर्मधर्म्यालम्बनश्चेति त्रिभेदत्वं नैगमस्योक्तं भवति । एतेन गुणगुणिनोरवयवावयविनोः क्रियाक्रियावतोर्जातितद्वतोश्च प्रधानोपसर्जनभावेनाभिसंधिर्नैगम इत्यप्ययुक्तं द्रष्टव्यम् । गुणगुण्यादीनां धर्मधर्मिणोरेवान्तर्भावात् ॥ ७ ॥

अथास्योदाहरणत्रयीं सूत्रत्रयेणाह—

## सच्चैतन्यमात्मनीति धर्मयोरिति ॥ ८ ॥

प्रधानोपसर्जनभावेन विवक्षणमितीहोत्तरत्र च सूत्रद्वये योगः। अत्र च चैतन्याख्यस्य व्यञ्जनपर्यायस्य प्राधान्येन विवक्षणं विशेष्यत्वात्। सत्ताख्यस्य तु व्यञ्जनपर्यायस्योपसर्जनभावेन तस्य चैतन्यविशेषणत्वादिति सुस्पष्ट एवायं धर्मद्वयगोचरो नैगमस्य प्रथमो भेदः ॥ ८ ॥

## वस्तुपर्यायवद्द्रव्यमिति धर्मिणोरिति ॥ ९ ॥

अत्र हि पर्यायवद्द्रव्यं वस्तु वर्तत इति विवक्षायां पर्यायवद्द्रव्याख्यस्य धर्मिणो विशेष्यत्वेन प्राधान्यम्। वस्त्वाख्यस्य तु विशेषणत्वेन गौणत्वम्। यद्वा किं वस्तुपर्यायवद्द्रव्यमिति विवक्षायां वस्तुनो विशेष्यत्वात्प्राधान्यं पर्यायवद्द्रव्यस्य विशेषणत्वाद्गौणत्वमिति धर्मियुग्मगोचरोऽयं नैगमस्य द्वितीयो भेदः ॥ ९ ॥

## क्षणमेकं सुखी विषयासक्तजीव इति धर्मधर्मिणोरिति ॥ १० ॥

अत्र हि विषयासक्तजीवाख्यस्य धर्मिणो मुख्यता, विशेष्यत्वात्। सुखलक्षणस्य तु धर्मस्याप्रधानता, तद्विशेषणत्वेनोपात्तत्वादिति धर्मधर्म्यालम्बनोऽयं नैगमस्य तृतीयो भेदः। न चास्यैवंप्रमाणकत्वानुषङ्गो धर्मधर्मिणोः प्राधान्येनात्र ज्ञप्तेरसंभवात्। तयोरन्यतर एव हि नैगमनयेन प्रधानतयानुभूयते प्राधान्येन द्रव्यपर्यायद्वयात्मकं चार्थमनुभवद्विज्ञानं प्रमाणं प्रतिपत्तव्यं नान्यत्।

तदुक्तम्—

'[1] प्रमाणात्मक एवायमुभयग्राहकत्वतः।
इत्ययुक्तमिह ज्ञप्तेः प्रधानगुणभावतः ॥

---

1 त. श्लो. वा. पृ. २६९ श्लो. २२.

प्राधान्येनोभयात्मानमर्थं गृह्णद्विवेदनम् ।
प्रमाणं नान्यदित्येतत्प्रपञ्चेन निवेदितम् ॥ ' इति ।

अन्ये पुनरित्थं नैगमस्य त्रैविध्यमभिसंधाय नवधा तं वर्णयांबभूवुः । तथा हि--पर्यायनैगमो द्रव्यनैगमो द्रव्यपर्यायनैगमश्चेति त्रयो मूलभेदाः । तत्र प्रथमस्त्रेधा । अर्थपर्यायद्वयनैगमो व्यञ्जनपर्यायद्वयनैगमोऽर्थव्यञ्जनपर्यायनैगमश्चेति । द्वितीयो द्वेधा शुद्धाशुद्धद्रव्यनैगमोऽशुद्धद्रव्यद्वयनैगमश्चेति । तृतीयश्चतुर्धा शुद्धद्रव्यार्थपर्यायनैगमः, शुद्धद्रव्यव्यञ्जनपर्यायनैगमः, अशुद्धद्रव्यार्थपर्यायनैगमः, अशुद्धद्रव्यव्यञ्जनपर्यायनैगमश्चेति .... .... .... .... .... .... .... णी पुरुष इत्यशुद्धद्रव्यव्यञ्जनपर्यायनैगमः । अत्र पुरुषस्याशुद्धद्रव्यस्य विशेष्यत्वान्मुख्यत्वम् । गुणित्वस्य तु व्यञ्जनपर्यायस्य तद्विशेषणत्वादमुख्यत्वम् । गुणित्वपुरुषयोः सर्वथा पार्थक्याभिसंधिः पुनरेतदाभास इति । भवन्ति चात्र **पूर्वाचार्यकारिकाः**—

**' तत्र पर्यायगस्त्रेधा नैगमो द्रव्यगो द्विधा ।**
**द्रव्यपर्यायगः प्रोक्तश्चतुर्भेदो ध्रुवं बुधैः ॥**
**अर्थपर्याययोस्तावद्गुणमुख्यस्वभावतः ।**
**क्वचिद्वस्तुन्यभिप्रायः प्रतिपत्तुः प्रजायते ॥**
**यथा प्रतिक्षणध्वंसिसुखसंविच्छरीरिणः ।**
**इति सत्तार्थपर्यायो विशेषणतया गुणः ॥**
**संवेदनार्थपर्यायो विशेष्यत्वेन मुख्यताम् ।**
**प्रतिगच्छन्नभिप्रेतो नान्यथैवं वचोगतिः ॥**
**सर्वथा सुखसंवित्त्योर्नानात्वेऽभिमतिः पुनः ।**
**स्वाश्रयाच्चार्थपर्यायनैगमाभो प्रतीतितः ॥**
**कश्चिद्व्यञ्जनपर्यायो विषयीकुरुतेऽञ्जसा ।**
**गुणप्रधानभावेन धर्मिण्येकत्र नैगमः ॥**

---

१ त. श्लो. वा. पृ. २६९ श्लो. २१. २ त. श्लो ,. पृ. २६९.

सचैतन्यं नरीत्येवं सत्त्वस्य गुणभावतः ।
प्रधानभावतश्चापि चैतन्यस्याभिसिद्धितः ॥
तयोरत्यन्तभेदोक्तिरन्योन्यं स्वाश्रयादपि ।
ज्ञेयो व्यञ्जनपर्यायनैगमाभो विरोधतः ।
अर्थव्यञ्जनपर्यायौ गोचरीकुरुते परः ।
धार्मिके सुखजीवित्वमित्येवमनुरोधतः ॥
भिन्ने तु सुखजीवित्वे योऽभिमन्येत सर्वथा ।
सोऽर्थव्यञ्जनपर्यायनैगमाभास एव नः ॥
शुद्धद्रव्यमशुद्धं च तथाभिप्रैति यो नयः ।
स तु नैगम एवेह संग्रहव्यवहारजः ॥
सद्द्रव्यं सकलं वस्तु तथान्वयविनिश्चयात् ।
इत्येवमवगन्तव्यस्तद्भेदोक्तिस्तु दुर्नयः ॥
यस्तु पर्यायवद्द्रव्यं गुणवद्वेति निर्णयः ।
व्यवहारनयाज्जातः सोऽशुद्धद्रव्यनैगमः ॥
तद्भेदैकान्तवादस्तु तदाभासोऽनुमन्यते ।
तथोक्तेर्बहिरन्तश्च प्रत्यक्षादिविरोधतः ॥
शुद्धद्रव्यार्थपर्यायनैगमोऽस्ति परो यथा ।
सत्सुखं क्षणिकं शुद्धं संसारेऽस्मिन्नितीरणम् ॥
सत्त्वं सुखार्थपर्यायाद्भिन्नमेवेति संमतिः ।
दुर्नीतिः स्यात्सबाधत्वादिति नीतिविदो विदुः ॥
गोचरीकुरुते शुद्धो द्रव्यव्यञ्जनपर्ययौ ।
नैगमोऽन्यो यथा सच्चित्सामान्यमिति निर्णयः ॥
सच्चित्सामान्ययोर्भेदं सर्वथा यानुमन्यते ।
दुर्नीतिरेव मन्तव्या सा मनीषा मनीषिभिः ॥
क्षणमेकं सुखी जीवो विषयीति विनिश्चयः ।

१ एतच्छ्लोकमेकं तु नोपलभ्यते तत्त्वार्थश्लोकवार्तिके ।

विनिर्दिष्टोऽर्थपर्यायाशुद्धद्रव्यगनैगमः ॥
सुखजीवभिदोक्तिस्तु सर्वथा मानबाधिता ।
दुर्नीतिरेव बोद्धव्या शुद्धबोधैरसंशयात् ॥
विद्यते चापरोऽशुद्धद्रव्यव्यञ्जनपर्ययौ ।
अर्थीकरोति यः सोऽत्र नागुणीति निगद्यते ॥
भेदाभिसंधिरत्यन्तं प्रतीतेरपलापतः ।
पूर्ववन्नैगमाभासः प्रत्येतव्यौ तयोरपि ।
नवधा नैगमस्यैवं ख्यातेः पञ्चदशोदिताः ।
नयाः प्रतीतिमारूढाः संग्रहादिनयैः सह ॥ ' इति ।

एते च नवापि नैगमनयभेदा अस्मदुक्तनैगमनयभेदत्रयमध्य एवावतरन्तीति न पृथक् सूत्रिताः । तथा हि–पर्यायनैगमस्तावत्त्रिविधोऽपि धर्मद्वयविषयाख्ये नैगमप्रथमभेदेऽन्तर्भवति । द्रव्यनैगमस्तु द्विभेदोऽपि धर्मियुग्मगोचराख्ये नैगमद्वितीयभेदेऽनुप्रविशति । द्रव्यपर्यायनैगमः पुनश्चतुःप्रकारोऽपि धर्मधर्म्यालम्बनाख्ये नैगमतृतीयभेदे निमज्जतीति । एवं चैतद्व्यवस्थितम् ।

धर्मयोर्धर्मिणोर्धर्मधर्मिणोश्च विवक्षणम् ।
गुणप्रधानभावेन नैगमस्तद्विदां मतः ॥ ७१७ ॥

अथवेदं नैगमस्य लक्षणं द्रष्टव्यम् । ' अनिष्पन्नार्थसंकल्पमात्रग्राही नैगमः ' इति । निगमो हि संकल्पस्तत्र भवस्तत्प्रयोजनो वा नैगमः । यथा कश्चित्पुरुषो गृहीतकुठारः पथि गच्छन्किमर्थं भवान् गच्छतीति केनचित्पृष्टः प्रतिवक्ति प्रस्थमानेतुमिति । एधोदकाद्याहरणे वा कश्चित्पुमान्व्याप्रियमाणः किं करोति भवानिति केनापि पर्यनुयुक्तः प्राह ओदनं पचामीति । न च प्रस्थपर्याय ओदनो वा निष्पन्नस्तन्निष्पत्तये संकल्पमात्रे प्रस्थादिव्यवहारात् । यथोक्तम्—

'[1] संकल्पो निगमस्तत्र भवोऽयं तत्प्रयोजनः ।

१ त. श्लो. वा. पृ. २६९ श्लो. १८.

तथा प्रस्थादिसंकल्पस्तदभिप्राय इष्यते ॥ ' इति ।

इत्येष नैगमनयः कथितोऽत्र किंचित्
द्रव्यार्थिकप्रथमभेदतया प्रतीतः ।
अस्य स्वरूपमखिलं श्रुतकेवलिभ्यः
शक्तः परः कथयितुं निपुणोऽपि नैवम् ॥ ७१८ ॥ १० ॥

अथ नैगमाभासं कथयन्नाह—

**धर्मद्वयादीनामैकान्तिकपार्थक्याभिसंधिर्नैगमाभास इति ॥ ११ ॥**

धर्मद्वयमादिर्येषां ते धर्मद्वयादयस्तेषां धर्मद्वयादीनां धर्मद्वयधर्मिद्वयधर्मधर्मिद्वयानामित्यर्थः । ऐकान्तिकपार्थक्याभिसंधिरात्यान्तिकभेदाभिप्रायो नैगमाभासो नैगमदुर्नय इत्यर्थः ॥ ११ ॥

अत्रोदाहरणमाह—

**यथात्मनि सत्त्वचैतन्ये परस्परमत्यन्तं पृथग्भूते इत्यादिरिति ॥ १२ ॥**

इयं सत्त्वचैतन्यलक्षणयोर्धर्मयोरैकान्तिकभेदेनोक्तिर्नैगमाभासत्वेन दर्शिता । आदिशब्दाद्वस्त्वाख्यपर्यायवद्द्रव्याख्ययोर्धर्मिणोः सुखजीवलक्षणयोर्धर्मधर्मिणोश्च सर्वथा पार्थक्येन कथनं तदाभासत्वेन द्रष्टव्यम् । नैयायिकवैशेषिकयोर्दर्शनं चैतदाभासतया ज्ञेयम् । प्रमाणबाधितं धर्मधर्म्यादीनामैकान्तिकभेदं पुरःसरीकृत्य तस्य प्रवृत्तत्वात् । प्रमाणबाधा च धर्मधर्म्यादिविषयस्य सर्वथा भेदस्य प्रागेव विषयपरिच्छेदे दर्शितेति ॥ १२ ॥

उक्तो नैगमाभासः संप्रति संग्रहनयस्वरूपमुपदर्शयन्नाह—

**सामान्यमात्रग्राही परामर्शः संग्रह इति ॥ १३ ॥**

सामान्यमात्रमशेषविशेषरहितं सत्त्वद्रव्यत्वादिकं गृह्णातीत्येवंशीलः सामान्यमात्रग्राही परामर्शः प्रतिपत्तुरभिप्रायविशेषः । सम्—एकी-

भावेन पिण्डीभूततया विशेषराशिं गृह्णातीति संग्रहः । संग्रहनामा नयो द्रव्यार्थिकाख्यमूलनयस्य द्वितीयो भेदः । इदमुक्तं भवति– स्वजातेर्दृष्टेष्टाभ्यामविरोधेन विशेषाणामेकरूपतया यद्ग्रहणं स संग्रहनय इति । तदुक्तम्—

'ऐकध्येन विशेषाणां ग्रहणं संग्रहो नयः ।
स्वजातेरविरोधेन दृष्टेष्टाभ्यां कथंचन ॥
समेकीभावसम्यक्त्वे वर्तमानो हि गृह्यते ।
निरुक्त्या लक्षणं तस्य तथा सति विभाव्यते ॥'[1]

ऐकध्येनेति एकत्वेन । एतच्च विशेषणं श्रुतप्रमाणस्य संग्रहत्वव्यपोहाय श्रुतप्रमाणेनैकतया समस्तार्थग्रहणाभावान्नानेकात्मकाशेषार्थविषयतया तस्य समर्थनात् । संग्रहस्य त्वेकत्वार्पणे सर्वार्थपरिच्छेदकत्वात्सम एकीभावार्थत्वात् .... .... .... ॥१३॥

( अमुं भेदतो दर्शयन्ति–

**अयमुभयविकल्पः परोऽपरश्च ॥ १४ ॥**

तत्र परसंग्रहमाहुः–

**अशेषविशेषेष्वौदासीन्यं भजमानः शुद्धद्रव्यं सन्मात्रमभिमन्यमानः परसंग्रहः ॥ १५ ॥**

परामर्श इत्यग्रेतनेऽपि योजनीयम् ॥ १५ ॥

उदाहरन्ति–

**विश्वमेकं सदविशेषादिति यथा ॥ १६ ॥**

अस्मिन्नुक्ते हि सदितिज्ञानाभिधानानुवृत्तिलिङ्गानुमितसत्ताकत्वेनैकत्वमशेषार्थानां संगृह्यते ॥ १६ ॥

एतदाभासमाहुः–

---

१ त. श्लो. वा. पृ. २७० श्लो. ४९-५०.

**सत्ताऽद्वैतं स्वीकुर्वाणः सकलविशेषान्निराचक्षाणस्तदाभासः ॥ १७ ॥**

अशेषविशेषेष्वौदासीन्यं भजमानो हि परामर्शविशेषः संग्रहाख्यां लभते, न चायं तथेति तदाभासः ॥ १७ ॥

उदाहरन्ति —

**यथा सत्तैव तत्त्वं ततः पृथग्भूतानां विशेषाणामदर्शनात् ॥ १८ ॥**

अद्वैतवादिदर्शनान्यखिलानि सांख्यदर्शनं चैतदाभासत्वेन प्रत्येयम् । अद्वैतवादस्य सर्वस्यापि दृष्टेष्टाभ्यां विरुद्ध्यमानत्वात् ॥ १८ ॥

अथापरसंग्रहमाहुः—

**द्रव्यत्वादीन्यवान्तरसामान्यानि मन्वानस्तद्भेदेषु गजनिमीलिकामवलम्बमानः पुनरपरसंग्रहः ॥१९॥**

द्रव्यत्वमादिर्येषां पर्यायत्वप्रभृतीनां तानि तथा, अवान्तरसामान्यानि सत्ताख्यमहासामान्यापेक्षया कतिपयव्यक्तिनिष्ठानि तद्भेदेषु द्रव्यत्वाद्याश्रयभूतविशेषेषु द्रव्यपर्यायादिषु गजनिमीलिकामुपेक्षाम् ॥ १९ ॥

उदाहरन्ति—

**धर्माधर्माकाशकालपुद्गलजीवद्रव्याणामैक्यं द्रव्यत्वाभेदादित्यादिर्यथा ॥ २० ॥**

अत्र द्रव्यं द्रव्यमित्यभिन्नज्ञानाभिधानलक्षणलिङ्गानुमितद्रव्यत्वात्मकत्वेनैक्यं षण्णामपि धर्मादिद्रव्याणां संगृह्यते । आदिशब्दाच्चेतनाचेतनपर्यायाणां सर्वेषामेकत्वं पर्यायत्वाविशेषादित्यादीन्यप्युदाहरणानि सूचितानीति ॥ २० ॥

अत्रैतदाभासमाह —

**द्रव्यत्वादिकं प्रतिजानानस्तद्विशेषान्निह्नुवानस्तदाभास इति ॥ २१ ॥**

तदाभासोऽपरसंग्रहाभासः । शेषं सुगमम् । विशेषेष्वौदासीन्यं समाश्रयमाणो ह्यभिप्रायविशेषोऽपरसंग्रहत्वेन लक्षितः । यः पुनर्द्रव्यत्वादीनि स्वीकुर्वाणोऽपि तद्विशेषानपह्नुते स तदाभासः प्रतीतिविरोधादिति ॥ २१ ॥

उदाहरणमाह—

**यथा द्रव्यत्वमेव तत्त्वं ततोऽर्थान्तरभूतानां द्रव्याणामनुपलब्धेरित्यादिरिति ॥ २२ ॥**

एतद्धि वाक्यं द्रव्यत्वस्यैव तात्त्विकतां प्रख्यापयति । तद्विशेषभूतानि तु धर्मादिद्रव्याण्यपह्नुत इत्यपरसंग्रहाभासनिदर्शनत्वेन दर्शितम् । तथा धर्मत्वमेवाधर्मत्वमेवाकाशत्वमेव कालत्वमेव पुद्गलत्वमेव जीवत्वमेव तत्त्वम् । ततोऽर्थान्तरभूतानां धर्माधर्माकाशपुद्गलजीवाख्यानां विशेषाणामनुपलम्भात् । एवं पर्यायत्वमेव तत्त्वम् । तद्व्यतिरिक्तपर्यायाणामनुपलब्धेः क्रमभाविपर्यायत्वमेव । तस्माद्भिन्नानां क्रमभाविपर्यायविशेषाणामदर्शनात्सहभाविगुणत्वमेव तत्त्वम् । ततः पृथग्भूतानां सहभाविपर्यायस्वरूपाणां गुणानां प्रमाणतोऽप्रतिपत्तेरित्येवमादीन्यप्यपरसंग्रहाभासोदाहरणान्यादिशब्दात्सूचितानि द्रष्टव्यानि । सर्वत्र चापरसंग्रहाभासत्वे कारणं प्रमाणविरोध एवावधारणीयः । द्रव्यत्वपर्यायत्वादिसामान्येभ्यः कथंचिदर्थान्तरभूतानां तद्विशेषाणां द्रव्यपर्यायादीनामपि प्रमाणबलतत्तात्त्विकत्वेन विषयपरिच्छेदे व्यवस्थापितत्वात् । एवमपरापरद्रव्यपर्यायभेदप्रभेदसामान्यमेव तात्त्विकानीत्यभिप्रायाः सर्वेऽप्यपरसंग्रहाभासाः प्रत्येयाः प्रतीत्यविरुद्धस्यैवापरसंग्रहप्रपञ्चस्यावस्थितत्वादिति ।

निमित्तनिमित्तीभावो न विरुध्यते । न चैवमनवस्थापत्तिः कार्यकारणभावेन तत्सन्तानस्यानादेरविरोधात् । मिथ्याश्रद्धानादिजीवपरिणामनिमित्तत्वाच्च नानिमित्तानि कर्माणीति । यत्तु परलोकाननुसरणं कर्मणां प्रासञ्ज्यत तदपि नोपपद्यते । यतः फलावसानानि कर्माणि । न च तानि कर्माण्यद्यापि निष्पादितफलानीति यावत्फलं तदनुवृत्तिरविरुद्धा । बाह्यं तु शरीरादिकं कर्मफलमिति, कृतफलत्वात्तत्कारणकर्मापगमे तन्निवृत्तिर्भवत्येव । मूर्तद्रव्यान्तरप्रतिघातोऽपि कर्मणां नोपपन्नः । सूक्ष्मपरिणामापन्नत्वेन तेषां केनचिदप्रतीघातादतिकठिनायःपिण्डान्तःप्रविष्टपावकवत् । अदृश्यमानं चैतद्यदि नोत्पादयितुं शक्येत तदा भवतामपि मते कथमुत्पाद्येत । अदृश्योऽपि गुणः समुत्पाद्यते न पुनर्द्रव्यमिति स्वेच्छामात्रम् । मूर्तं मूर्तेनैव विनाशनीयमित्यपि नियमो नास्ति । ध्यानावेशवशात्केनचिद्घटादिस्फोटनदर्शनादशक्तिसौधाधिरूढा तत्पुद्गलप्रचयात्मता स्वीकर्तुं कर्मणो योग्या शक्ताद्यात्मकता । ननु—

तस्माच्चैतन्यसंज्ञं सततमविकलं स्वस्वरूपं दधानः
साक्षाद्भोक्ता स्वकर्मक्षितिरुहनिवहो जृम्भितानां फलानाम् ।
देहे देहे विभिन्नः परिणतिरसिकः स्वीयकायप्रमाणः
सिद्धः कर्ता यमात्मा प्रमितिपरिकरादस्तनिःशेषदोषात्
॥ ८०७ ॥ ५५ ॥

अथात्मन एव विशेषणोत्तराभिधित्सया प्राह—

**तस्योपात्तपुंस्त्रीशरीरस्य सम्यग्ज्ञानक्रियाभ्यां कृत्स्नकर्मक्षयस्वरूपासिद्धिरिति ॥ ५६ ॥**

तस्यानन्तरनिरूपितस्वरूपस्यात्मना उपात्तपुंस्त्रीशरीरस्य स्वीकृतपुरुषयोषिद्वपुषः । एतेन स्त्रीनिर्वाणद्वेषिणः काष्ठाम्बरान् शिक्षयति । सम्यग्ज्ञानं च यथावस्थितवस्तुतत्त्वावबोधः, क्रिया च तपश्चर-

णादिका ताभ्याम् । ननु सम्यग्दर्शनमपि कृत्स्नकर्मक्षयकारणमेव । यदाहुः—' **सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः** '[1] इति, तत्कथमिह नोपदिष्टम् । उच्यते—सम्यग्ज्ञानोपादानेनैव तस्याक्षिप्तत्वात् । न खलु सम्यग्दर्शनमन्तरेण सम्यग्ज्ञानं संभवति । द्वयोरप्यनयोः सहचरत्वात् । सम्यग्ज्ञानपूर्विका सैव ( तत्कारणम् । न पुनर्मिथ्यात्वमलपटलावलुप्तविवेकविकलानां मिथ्याज्ञानपूर्विका कन्दफलमूलशैवालकवलनादिका । कृत्स्नस्याष्टप्रकारस्यापि, न तु कतिपयस्य, जीवनमुक्तेरनभिधित्सितत्वात् । कर्मणो ज्ञानावरणादेरदृष्टस्य, न तु बुद्ध्यादिगुणानामपि, नापि ज्ञानमात्रसंतानस्य । क्षयः सामस्त्येन प्रलयः स्वरूपं यस्याः सा तथा । एतेन **नैयायिकसौगतो**पकल्पितमुक्तिप्रतिक्षेपः । एवंविधा सिद्धिर्मोक्षो भवति । इह केचिज्ज्ञानादेव मोक्षमास्थिषत, तथाह्येते ब्रुवते—सम्यग्ज्ञानमेव फलसंपादनप्रत्यलम्, न क्रिया; अन्यथा मिथ्याज्ञानादपि क्रियायां फलोत्पादप्रसङ्गात् । यदुक्तम्—

"विज्ञप्तिः फलदा पुंसां न क्रिया फलदा मता ।
मिथ्याज्ञानात् प्रवृत्तस्य फलाऽसंवाददर्शनात्"॥ १ ॥

तथा—

"श्रियः प्रसूते विपदो रुणद्धि यशांसि दुग्धे मलिनं प्रमार्ष्टि ।
संस्कारशौचेन परं पुनीते शुद्धा हि बुद्धिः कुलकामधेनुः" ॥१॥

**क्रियावादिन**स्तु वदन्ति—क्रियैव फलहेतुर्न ज्ञानाम्, भक्ष्यादिविज्ञानेऽपि क्रियामन्तरेण सौहित्यादिफलानुत्पादात् । यदवाचि—

"क्रियैव फलदा पुंसां न ज्ञानं फलदं मतम् ।
यतः स्त्रीभक्ष्यभोगज्ञो न ज्ञानात् सुखितो भवेत्" ॥ १ ॥

तथा—

"शास्त्राण्यधीत्यापि भवन्ति मूर्खा यस्तु क्रियावान् पुरुषः स विद्वान् ।

---

1 तत्त्वार्थ. 1 - 1

संचिन्त्यतामौषधमातुरं हि न ज्ञानमात्रेण करोत्यरोगम् ” ॥ १ ॥

अत्र ब्रूमहे — यदुक्तं सम्यग्ज्ञानमेव फलसंपादनप्रत्यलमित्यादि तत्तात्पर्यवृत्त्या क्रियावादिनैव प्रतिक्षिप्तमित्युपेक्षणीयमेव । यथेनाविनाभावीत्यत्र प्रयोगे तु किं सम्यग्ज्ञानेनैवाविनाभावित्वं हेत्वर्थः किंवा सम्यग्ज्ञानेनापि । प्रथमपक्षे सिद्धता मोक्षस्य क्रिययापि सार्धमविनाभावप्रसिद्धेः । संप्रयुक्ते एव हि सम्यग्ज्ञानक्रिये समीहितफलसिद्धिनिबन्धनं भवतः पङ्ग्वन्धवन्न पुनरनयोरन्यतरत् । तथा चोपनिषत्—‘[1] हयं नाणं कियाहीणं हया अन्नाणओ किया । पासंतो पंगुलो दड्ढो धावमाणो य अंधओ ॥ १ ॥ संजोगसिद्धीए फलं वयन्ति न हु एगचक्केण रहो पयाइ । अंधो य पंगू य वणे समेच्चा ते संपउत्ता नगरं पविट्ठा ॥ ’ द्वितीयपक्षे तु विरुद्धता, सम्यग्ज्ञानेनाप्यविनाभावित्वस्य हेतोः । सम्यग्ज्ञाननिबन्धनत्वेनैव साध्येन विरुद्धस्य सम्यग्ज्ञानक्रियारूपोभयनिबन्धनत्वस्य प्रसाधकत्वात् । यदप्युक्तम् ‘ यतः स्त्रीभक्ष्यभोगज्ञो न ज्ञानात्सुखितो भवेत् ’ इति । तदप्ययुक्तम् । यतः सम्यग्ज्ञानकारणैकान्तवादिनामेवायमुपालम्भो न पुनरस्माकम् । सम्यग्ज्ञानक्रिययोरुभयोरपि परस्परापेक्षयोः कारणत्वस्वीकारात् । न च नितम्बिनीमोदकादिगोचरायां प्रवृत्तौ तद्विज्ञानं सर्वथा नास्त्येव । अतः क्रियाया एव तत्कारणता कल्पेत । तद्गोचरविज्ञानसनाथैव हि तत्र प्रवृत्तिः प्रीतिपरम्परोत्पादनप्रत्यया, अन्यथोन्मत्तमूर्च्छितादेरपि प्रौढप्रेमपरायणप्रणयिनीनिबिडाश्लेषक्रियापि तदुत्पादाय किं न स्यात् । अथासौ [2]क्रियैव तत्त्वतो न भवति । सैव हि क्रिया तात्त्विकी या स्वकीयकार्यो-

---

[1] हतं ज्ञानं क्रियाहीनं हताऽज्ञानतः क्रिया । पश्यन् पंगुर्दग्धो धावमानश्चान्धकः ॥ ११५९ ॥ संयोगसिद्धौ फलं वदन्ति न खल्वेकचक्रेण रथः प्रयाति । अन्धश्च पंगुश्च वने समेत्य तौ संप्रयुक्तौ नगरं प्रविष्टौ॥११६५॥ इति छाया । विशे.

[2] क्रियैव फलदा पुंसां न ज्ञानं फलदं मतम् । इति पूर्वार्धम् । शास्त्र. स. ११ स्त. ३५ श्लो. क्रियावादिमतप्रदर्शने ।

व्यभिचारिणी । हन्त तर्हि तदेव तात्त्विकं ज्ञानं यत्स्वकीयकार्याव्यभिचारीति कथं स्त्रीभक्ष्यभोगज्ञ इत्युपालम्भः शोभेत । ततः कार्यमर्जयन्ती यथा निश्चयनयेन क्रिया क्रियोच्यते तथा ज्ञानमपीति । क्वचिदव्यभिचाराभावाद् द्वयमेवैतत्फलोत्पत्तौ कारणमनुगुणम् । यच्चाजल्पि—'या तु क्रियायाः सम्यग्ज्ञानापेक्षा' इत्यादि तत्र मा भूत्सम्यक्क्रियोत्पादकसम्यग्ज्ञानस्य फलोत्पत्तौ प्राधान्यं व्यवधानात् । क्रियाकाले तु यत्सम्यग्ज्ञानं तत् फलोत्पादाय कल्पिष्यते । ननु जलं जलत्वेनानवबुध्यमानमपि पीयमानं नालिकेरद्वीपवासिनं धिनोतीति कथं सम्यग्ज्ञानस्य तत्कारणतेति चेत् । मा भून्नाम जलावबोधः । न हि तद्बोधस्तन्निबन्धनमभिदध्महे किन्तु शीतस्पर्शादिवेदनमिति कथं न बोधोऽपि तत्कारणं स्यात् । यापि शुचिरोचिरित्यादिना मतिमतामपि सेवादिक्रियाप्राधान्येनैव फलावाप्तिरुक्ता साप्ययुक्ता । एवमपि क्रियैकान्तासंगतेर्विमलकेवलालोकविलोकितलोकालोकोऽयं भगवानित्येतावतैव रभसभरोद्भवत्प्रभूतपुलकाङ्कुरकोटिसङ्कटविसंकटाङ्गयष्टिभिः प्रकृष्टाष्टमहाप्रातिहार्यप्रमुखपूजनीया मनुजदनुजनिर्जरेन्द्रचन्द्रैः पूज्यते न पुनः क्रियावशादित्यपि वक्तुं शक्यत्वात् । अथास्त्येव तत्रापि कलक्कणद्वेणुवीणानुगामिमञ्जुगुञ्जन्मृदङ्गसंगिनं तुम्बुरुनिकुरम्बप्रपञ्च्यमानपञ्चमोद्गारसारसंगीतकप्रबन्धमधरयन्त्यायोजनप्रमाणपृथिवीप्रदेशे च प्रसरन्त्या वाचो व्यापारः । स एव च तथाविधपूजादिफलहेतुरिति चेत् । एवं तर्हि सेवादावप्यस्त्येव सभासभापतिपरिज्ञानमिति तदेव तत्फलोत्पत्तिहेतुः किं न स्यात् । अथैवं दृष्टाबाधासेवकत्वेनैव नृपतिनास्य फलदानदर्शनात्, अन्यत्रापि किं नासौ स्यात् । केवलज्ञानवानयमित्येतावतैव तैस्तत्पूजाविधानस्य विलोकनात् । तस्मात्तत्त्वं चेत् पृच्छसि तदा द्वयमप्येतत् कारणं किंतु क्वचित् किंचित् प्राचुर्येण व्याप्रियर्ति क्वचित्तूभयमपि तुल्यकक्षतयेति न क्रियैकान्तः । यच्चोक्तम् 'केवलो-

स्यतात्रापि ' इत्यादि तदप्ययुक्तम् । केवलस्यापि शैलेशीदशायाः कारणत्वानपायात् । ततः सुबोधक्रिययोः संयोगात् पुंस्त्रियोरिव जायते.... .... .... .... .... .... .... ....

.... .... .... .... क्षयलक्षणस्य तल्लक्षणस्य सद्भावात् । न चेदमव्यापकम् । सकलमुक्तेषु सद्भावात् । नाप्यतिव्यापकम् । संसारिष्वसंभवात् । नाप्यसंभवि । प्रमाणतस्तत्प्रसिद्धेः । तथा हि—क्वचित् कर्महानिः सामस्त्येन संभवति प्रकृष्यमाणत्वात् । कञ्चन काञ्चने कालिकादिहानिवत् । न च कर्मण एवासत्त्वाद्धानेरसिद्धेराश्रयासिद्धो हेतुः । तस्यानन्तरमेव प्रसाधितत्वात् । यदप्युक्तम्—' परलोकसिद्धौ प्रमाणाभावात् ' इति तदपि नोपपन्नम् । अनुमानागमयोस्तत्सद्भावावेदकयोर्विद्यमानत्वात् । तथा हि—प्राणिनामाद्यं चैतन्यं चैतन्योपादानकारणकं चैतन्यत्वात् मध्यचैतन्यवत् । तथा अन्त्यं चैतन्यं चैतन्यकार्यकं तत एव तद्वदित्यनुमानद्वयं पूर्वोत्तरभवोपलम्भकमस्त्येव । विशेषचर्चा त्वत्र प्रागेव सर्वज्ञसिद्धौ कृतेति नेह प्रतायते । आगमोऽपि स्वर्गकेवलार्थिना तपोध्यानादि कर्तव्यमिति प्रामाण्यं चास्य प्रागेव प्ररूपितमिति नेहाभिधीयते । यच्चावाचि—' परलोकिनोऽभावः परलोकाभावः ' इति तदपि परिफल्गु । परलोकिनः । .... .... .... .... .... .... ....

प्रसाधितत्वात् । यच्चोक्तम्—' परलोकि चैतन्यं निरवयवत्वात् ' इति तत्रापि चैतन्यं द्रव्यरूपं पर्यायरूपं वा धर्मित्वेनाभिधित्सितम् । द्रव्यरूपं चेत्तर्हि हेतोरसिद्धिः । आत्मद्रव्यस्यास्माभिः सप्रदेशत्वेन स्वीकृतत्वात् । पर्यायरूपं चेत्तदा सिद्धसाध्यता, मरणसमयावच्छिन्नचैतन्यपरिणामस्य भवान्तरानुसरणासंभवात् । अस्तु वा यथाकथंचि-

---

१ शैलेशी—शैलस्येव मेरोरिव अचलता स्थिरता अस्यामवस्थायां सा शैलेशी । अथवा शीलं समाधानं तच्च निश्चयतः प्रकर्षप्राप्तसमाधानरूपत्वात्सर्वसंवरः । ततस्तस्य सर्वसंवररूपस्य शीलस्येशः शीलेशः तस्येयमवस्था शैलेशीति ।

द्धर्मी तथापि हेतुरप्रयोजकः । परलोकाभावस्यानात्मत्वप्रयुक्तत्वाद्घटादौ तथैव विलोकनात् । चैतन्ये च तदभावादात्मरूपत्वादस्य साधनवैकल्यं च दृष्टान्तस्य, शब्दस्य सावयवत्वेन प्रमाणतः प्रसिद्धेः । यदप्यमूर्तत्वमसर्वगतद्रव्यपरिमाणाभावरूपत्वं व्याख्यातम्, तत्रापि हेतोरसिद्धिरात्मनोऽसर्वगतत्वेन मूर्तत्वात् । यदि पुना रूपादेर्मत्वाभावो (?) मूर्तत्वमुच्यते । तदा प्राग्वदप्रयोजको हेतुः । एतेन रूपादिरहितत्वादित्यपि चिन्तितम् । एवं च—

त्वदुक्तयुक्तिविध्वंसात् स्वयुक्तिपरिकीर्तनात् ।
कृत्स्नकर्मक्षयो मोक्षः सिद्धिमध्यास्त नास्तिक ॥ ८०८ ॥

ततश्च न्याय्यमस्माकं तत्कारणपरीक्षणम् ।
हेत्वभावेन यत्कार्यं किंचित् क्वचन वीक्ष्यते ॥ ८०९ ॥

योगास्तु संगिरन्ते—सत्यमस्ति मोक्षस्तथापि न च नामात्मविशेषगुणानां योऽत्यन्तमुच्छेदस्तद्रूप एव स्वीकर्तव्यो न पुनर्निःशेषकर्मक्षयलक्षणः । तथा च तत्सिद्धौ व्योमशिवादयः प्रमाणयन्ति । न च नामात्मविशेषगुणानां संतानोऽत्यन्तमुच्छिद्यते सन्तानत्वात्, यो यः संतानः स सोऽत्यन्तमुच्छिद्यमानो दृष्टो यथा प्रदीपसंतानस्तथा चायं संतानस्तस्मादत्यन्तमुच्छिद्यत इति संतानत्वस्य च व्याप्त्या बुद्ध्यादिषु संभवात्पक्षधर्मतयाऽसिद्धत्वाभावः । तत्समानधर्मिणि त्वप्रदीपादावुपलम्भादविरुद्धत्वम् । न च विपक्षे परमाण्वादावस्ति संतानवत्त्वमित्यनैकान्तिकत्वाभावः । विपरीतार्थोपस्थापकयोः प्रत्यक्षागमयोरनुपलम्भान्न कालात्ययापदिष्टः । न चायं सत्प्रतिपक्ष इति पञ्चरूपत्वात्प्रमाणम् । आगमश्चात्र 'न ह वै सश-

---

१ अत्र 'यावदात्मगुणाः सर्वे नोच्छिन्ना वासनादयः । तावदात्यन्तिकी दुःखव्यावृत्तिर्न विकल्प्यते' ॥ इति न्या. मं. पृ. ५०८ पं. ८ स्थः श्लोको रत्नाकरावतारिकायामुद्धृतः ।

२ छां. उ. अ. ८ । १२.

रीरस्य सतः प्रियाप्रिययोरपहतिरस्ति । अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः ' इति । अत्रोच्यते—यत्तावदुक्तम् 'न वाऽनात्मविशेषगुणानां ' इत्यादि । तत्र पक्षैक .... .... .... .... .... मपरिम्लानतत्संवेदनसामर्थ्यं चतुर्थं पुरुषार्थमाचक्षतेविचक्षणाः। यदि तु जडपाषाणनिर्विशेष एव । तस्यामवस्थायामात्मा भवेत् । तत्कृतमपवर्गेण संसार एव वरमस्तु । यत्र तावदन्तरान्तरापि दुःखकलुषितमपि स्वल्पमपि सुखमुपभुज्यते । चिन्त्यतां तावदिदम् । किमल्पसुखानुभवो भव्य उत सर्वसुखोच्छेद एव । किं च—

समस्ति वार्तापि न यत्र शर्मण-
श्चकास्ति बुद्धेर्न कणोऽपि कश्चन ।
स्यात्सोऽपि मोक्षोऽपि यदि भोस्तदा न
किं स्युर्ग्रावमुख्या अपि मोक्षलक्षिताः ॥ ८१० ॥

अथास्त्येव तथाभूते मोक्षलोभातिरेकः प्रेक्षाणां तर्ह्येवंविधे चयन्ति दुःखसंस्पर्शशून्यशाश्वतिकसुखसंभोगासंभवाद्दुःखस्य चावश्यहातव्यत्वाद्विवेकहानस्य चाशक्यत्वाद्विषमधुनी इवैकत्रामत्रे पतिते उभे अपि सुखदुःखे त्यजे यतोऽयमित्यतश्च संसारान्मोक्षः श्रेयान्, यत्रायमियानतिदुःसहो दुःखप्रबन्धोऽवलुप्यते वरमियती कादाचित्कसुखकणिका त्यक्ता । नतु तस्याः कृते दुःखभार इयानुत्साह इति । तत्र दुःखसंस्पर्शशून्यशाश्वतिकसुखसंभोगासंभवादित्यत्र शाश्वतिकमनादिनिबन्धनं यद्वादिमदपि प्रध्वंसवदपर्यवसानं सुखं विवक्षितम् । तत्रादिपर्यवसानशून्यं सुखं तावत्प्रेक्षाणामुपादित्सागोचर एव न भवति सदैव प्राप्तत्वादिति कुतस्तदभावस्तत्राप्रवृत्तौ प्रेक्षाकारिणोऽकारणमभिधीयेत । द्वितीयं तु सुखं भवत्येव तत्प्रवृत्तिनिमित्तम् । न च तस्यासंभवः । बाधकप्रमाणाभावात् । साधकं तु सुखसंवेदनयोस्तलानुमानमपरिम्लानसामर्थ्यमभिहितमेव । अनन्तता च तत्र तयोर्विनाशकारणाभावादस्खलिता । तद्विनाशकारणं हि कर्म ।

न च तदानीं तदस्ति । तस्य समूलमुन्मूलितत्वात् । मिथ्यात्वाविरतिकषाययोगलक्षणस्य तत्कारणस्याभावाच्च न पुनरपि कर्मनिर्माणं कारणाभावात्तादृशसुखोत्पाद एव नास्तीति चेत् । न । सकलकर्मोपरमस्यैव तत्कारणस्य सद्भावात् । न चैतदनागमिकम् । कृत्स्नकर्मविमोक्षाच्च '**मोक्षे सुखमनुत्तमम्**' इत्यागमसद्भावात् । यच्चोक्तम्—'**विवेकहानस्य चाशक्यत्वात्**' इति । तदेवमेव सांसारिकसुखस्यैतादृशत्वात्तद्विषमधुदिग्धधाराकरालमण्डलाग्रग्रासवद्दुःखात्करोतीति युक्ता मुमुक्षूणां तज्जिहासा । किंत्वात्यन्तिकसुखविशेषलिप्सूनामेव ये अपि विषमधुनी एकत्रामत्रे संपृक्ते परित्यज्येते ते अपि सुखविशेषलिप्सयैव । तथा हि—पामरप्राया अपि प्रजल्पन्ति—

काळकूटघटनाकलङ्कितां मित्र नाम्निनवगोस्तनीमपि ।
अन्तलः शशि .... .... .... ॥ ८११ ॥
.... .... स्त्र्याद्यादानेऽपि किं न तत् ।
विषयग्रहणं कार्यं मूर्च्छा स्यात्तस्य कारणम् ।
न च कारणविध्वंसे जातु कार्यस्य संभवः ॥
विषयः कारणं मूर्च्छा तत्कार्यमिति यो वदेत् ।
तस्य मूर्च्छोदयोऽसत्त्वे विषयस्य न सिध्यति ॥
तस्मान्मोहोदयान्मूर्च्छा स्वार्थे तस्य ग्रहस्ततः ।
स यस्यास्ति स्वयं तस्य नैर्ग्रन्थ्यं न कदाचन ॥ इति ।

तदवद्यम् । आहारपेच्छिकादावप्यखिलस्यास्य समानत्वात् । अपि च । ननु मुमुक्षूणां स्त्रीनवक्षुः मातजादेरुपादानं ( ? ) संभवति । तस्य संयमानुपकारित्वात्तदुपभोगे प्रभूततरं तदभिलाषभावेन संयमबाधोपपत्तेः श्र्यासं ( ? ) हि वर्धन्ते विषयाः कौशलानि चेन्द्रियाणां न च वस्तुमपि ( ? ) संयमानुपकारि । तस्य तदुपकारितया प्रोक्तत्वात् । एवं च वस्त्रस्य ग्रन्थत्वासिद्धे रागाद्यपचयनिमित्तनैर्ग्रन्थ्यपरिपन्थित्वं साधनमसिद्धमेवेति नास्मादपि वस्त्रस्य चारित्रबाधकत्वसिद्धिः ।

नाप्यागमः । प्रतिषिद्धत्वात् । तत्प्रतिषेधाद्यस्य कस्यचिदप्यागमस्याभावात् । स हि भवन् किमचीवरास्तीर्थकृत इत्ययमुताजेनकल्पोपदेशो (?) जिताचेलपरीषहो मुनिरिति वा । न तावदाद्यो विकल्पः । तत्र हि तीर्थकृतामचीवरत्वं कादाचित्कमुक्तं शाश्वतिकं वा । यदि कादाचित्कं तदा पर्यायपरम्परापरिहाण्या तदनुकारिण्याः परापरपर्यायपरम्परायाः समुत्पादात् । न च संसारित्वपर्यायस्याप्युत्पादः प्राप्नोति । तत्कारणस्य कर्मणः सहकारिणः सकलस्य प्रलयात् । एवं च तथाविधपर्यायप्रवाहात्मकात्मरूपतयाऽयमनन्त एवेति कथं न पुरुषार्थः स्यात् । अथ मोक्षेऽनन्तं सुखं यदि स्यात्तदा तद्रागेण प्रयतमानो मुमुक्षुर्न मोक्षमधिगच्छेत् । न हि रागिणां मोक्षोऽस्तीति मोक्षविदस्तस्य बन्धनात्मकत्वात् । तदयुक्तम् । यो हि सुखसाधनेषु शब्दादिविषयेष्वभिष्वङ्गः सरागो बन्धनात्मकस्तस्य विषयार्जनरक्षणादिप्रवृत्तिद्वारेण संसारहेतुत्वात् । अनन्ते तु सुखे यद्यपि रागस्तस्याप्यसौ सर्वविषयार्जनादिनिवृत्तिमोक्षोपायप्रवृत्त्योरेव हेतुः । अन्यथा तस्य सुखस्य प्राप्तुमशक्यत्वात् । न हि तद्विषयसाध्यं नापि तत्क्षीयते येन विषयसुखार्थमिव पुनः पुनस्तदर्थं हिंसादिष्वपि प्रवर्तेत । तत्र बन्धहेतुर्मुमुक्षोरस्ति रागः । स्पृहामात्ररूपोऽपि चासौ परां कोटिमारूढस्यास्य निवर्तते । '**मोक्षे भवे च सर्वत्र निःस्पृहो मुनिसत्तमः**' इति वचनात् । अन्यथा दुःखनिवृत्त्यात्मकेऽपि मोक्षे प्रयतमानस्य दुःखद्वेषकषायकालुष्यं किं न स्यात् । अथ नास्त्येव मुमुक्षोर्द्वेषः । रागद्वेषौ हि संसारकारणमिति च जानाति मुमुक्षुर्द्वेष्टि च दुःखमिति कथमिदं संगच्छेतेति चेत् । तदितरत्रापि तुल्यम् । अथ मोक्षसुखेऽभिष्वङ्गाभावे प्रवृत्तिरेव न भवेदतः कथमेकान्तिकात्यन्तिकानन्दसंपद्रूपमिदं मोक्षमहं साधयिष्यामीति हि तत्र पुंसः प्रवृत्तिः संभाव्यते । तदप्यन्यत्र समानमेव । सांसारिकदुःखे द्वेषाभावे तज्जिहासानुपपत्तेः । आः कथमेषां नानाविधाधिव्याधिप्रबन्धसंबन्धादिसांसारि-

कदुःखसंदोहस्यात्यन्तमुत्थितिर्मे स्यादिति हि तत्रापि प्रवृत्तिः संभाव्यते । अथ स्वर्गे तावद्रागपूर्विका प्रवृत्तिः प्रेक्षितचरीति तदतिशायिप्रीतावपवर्गे तदतिशायिरागपूर्विकैव प्रवृत्तिः संभाव्यत इति चेत् । नैवम् । रागातिशयस्य विषयातिशयहेतुकत्वासंभवात् । जरत्कपर्दकशकलमात्रेऽपि केषांचिन्मूषकादीनां प्राणापहारपर्यन्तस्य रागस्य दर्शनात् । अपरेषां तु केषांचिन्महात्मनां निःशेषनम्रसामन्तमौलिमालालालिताङ्घ्रिसरोरुहे साम्राज्येऽप्यवज्ञाविलोकनात् । अपि च । एवं निःशेषदुःखमये संसारेऽपि द्वेषातिशयः किं न स्यान्मशकमत्कुणदंशदंशावेशसमुत्थे दुःखे स्तोकस्य विकटभ्रुकुटिपुटोट्टङ्कितललाटपट्टकप्रत्यर्थिमुक्तकृपाणप्रहारप्रभवे तदतिरिक्तस्य च द्वेषस्य दर्शनात् । यथा तु कस्यचिन्महात्मनो न तत्र द्वेषमात्रापि तथा सुखे न रागमात्रापीति कुतस्तादृशि मोक्षे रागः स्यात् । ततः सिद्धं निःशेषकर्मक्षयान्मोक्षे परमानन्दसंवेदनस्वभाव आत्मा च तिष्ठते न तु जडरूप इति । **भूषणो**ऽपि मोक्षे सुखतत्संवेदनसनाथमात्मानमातिष्ठमानोऽस्मदनुचर एव । अनादितां तु तयोरुपेयमानो मुक्तिसंसारावस्थयोरविशेषप्रसंगेन परमाणुयतो ( ? ) यत्पुनरविशेषप्रसंगपरिहारायोवाच—'[1] **न चक्षुर्घटयोः कुड्यादेरिव सुखसंवेदनयोर्विषयविषयिसंबन्धप्रत्यनीकस्याधर्मसुखादेः संसारावस्थायां सद्भावात्तन्नाशे च मुक्त्यवस्थायां भवति सुखसंवेदनयोः संबन्धः । कुड्यादिनाशे चक्षुर्घटसंबन्धवदिति ।** ' तदप्यसंबद्धम् । विषयपरामर्शमन्तरेण ज्ञानस्वरूपस्यैवासंभवात् । घटोऽयं पटोऽयमित्यादि गोचरावधारणमेव हि तस्य स्वरूपम् । तदभावे किमन्यदवतिष्ठेत । एवं संसारावस्थायां सुखसंवेदनस्यापि सुखस्वरूपगोचरपरामर्शमन्तरेण संवेदनरूपत्वमेव न भवेत् । एवं च दुःखाभावस्वभावस्य मोक्षस्य प्रतिक्षेपात्सुखसंवेदनरूपस्य च साधनात् ' **न ह वै** '

---

१ आचार्यभासर्वज्ञः । न्यायसारे आगमपरिच्छेदे पृ. ४० पं. १६.

इत्याद्यागमो बाधितत्वात्तदाभास एवेत्यवगन्तव्यम् । यत्तु **जयन्तो** जगाद—

> ' अर्हत्पक्षेऽपि यद्रूपमन्यसापेक्षमात्मनः ।
> न केवलस्य तद्रूपमित्यस्मन्मततुल्यता ॥ ' इति ।

तदप्यस्मन्मतापरिज्ञानविजृम्भितम् । अन्यानपेक्षत्वेनात्मरूपयोरनन्तानन्तज्ञानप्रवाहयोरस्मन्मते मोक्षेऽवस्थानात् ।

यच्चोक्तमनेनैव——

> ' विकारित्वं तु जीवानामत्यन्तमसमञ्जसम् ।
> शब्दपुद्गलवच्चैतत्प्रत्याख्येयमसंभवात् ॥
> तद्विकारित्वं न जीवानां न कथंचिदसमञ्जसम् ।
> शब्दपुद्गलवच्चैतत्समाख्येयं सुयुक्तिभिः ॥'

इत्यनेन प्रतिविहितम् ।

> जडत्वमात्मन्यवधीर्य धैर्याद्यथोदितानन्दचिदात्मकं तत् ।
> मोक्षस्वरूपं परिकल्पनीयं परैः परित्यज्य कुमार्गमार्गम् ॥८१२॥

**ब्रह्मवादिनस्तु** वदन्ति—— ' आत्मनः परमानन्दस्वरूपेऽवस्थानं मोक्षः ' इति । एतेऽस्मदनुजीविन एव तत्त्वत इति स्खलिता अपि क्वापि किंचिदभ्युद्धरणीया एव तपस्विनः । तथा हि—स्खलितमिदममीषामनादिनिधनं नित्यैकरूपं तत्सुखमित्यप्रयासापसारणीयं चेत् । तत्संसाधकप्रमाणाभावात् । तथा हि—तस्य ग्राहकं प्रत्यक्षमनुमानमागमो वा स्यात् । प्रत्यक्षं चेत् किमैन्द्रियं मानसं स्वसंवेदनं नैःश्रेयसं वा । तत्राद्यविकल्पो न पेशलः । इन्द्रियाणां प्रतिनियतरूपादिगोचरचारितया तत्प्रभवप्रत्यक्षस्य ततोऽन्यत्र प्रवृत्त्यनुपपत्तेः । द्वितीयविकल्पोऽप्यनुपपन्नः । न हि मानसप्रत्यक्षेऽनवच्छिन्नदेशकालकलापमनादिनिधनं नित्यैकरूपं सुखं कदाचिदनुभवामः । तृतीयकल्पोऽप्यकल्प-

---

१ न्या. मं. पृ. ५१२ पं. २५ । २ न्या. मं. पृ. ५१२ पं. २७ ।

नार्हः । स्वसंवेदनस्य ज्ञानरूपपरामर्शमात्रपर्यवसितत्वेनानन्द इति कथं प्रेक्षाकारिणामयमुपादेयः स्यात् । निःश्रेयसप्रत्यक्षं तथाभूतं तद्वेत्तीति तु तवोक्तिर्बधिरस्य परानुवादमनुकरोति । न खलु भवानद्यापि तत्स्वरूपग्राहकप्रमाणे विवादपङ्कमग्ने तत्प्रतिपत्तुमर्हति । तत्र प्रत्यक्षं तथाभूतसुखग्राहकम् । नाप्यनुमानम् । तदनादिनिधननित्यैकरूपत्वाविनाभाविनः कस्यचिल्लिङ्गस्यासंभवात् । नाप्यागमः तथाविधसुखप्रतिपादकस्य तस्याप्यप्रतीतेः । अस्तु वा यत्किंचित्तद्ग्राहकं तथापि तन्नित्यमनित्यं वा । न तावदनित्यम् । यतः कुतोऽस्योत्पत्तिः स्यादनित्यस्यानुत्पत्तिधर्मकत्वानुपपत्तेः । इन्द्रियादिभ्यश्च तदुत्पत्त्यभ्युपगमे सुखविषयत्वं न प्राप्नोतीत्युक्तमनन्तरमेव । अथ योगजधर्मानुगृहीत आत्ममनःसंयोग एव तज्जनकः । ननु योगजधर्मस्य मुक्तावसंभवात्कथमसौ तत्संयोगेनापेक्ष्येत । यतस्तत्र ततस्तदुत्पत्तिः स्यात् । अथाद्यं ज्ञानं योगजधर्मापेक्षस्तत्संयोगो जनयति तच्चापेक्ष्योत्तरोत्तरं ज्ञानमसौ जनयतीति । तदप्यसांप्रतम् । अपसिद्धान्तप्रसंगात् । शरीरसंबन्धापेक्षस्यैव ज्ञानस्य ज्ञानान्तरोत्पत्तौ त्वत्कृतान्ते सहकारिकारणत्वोपवर्णनात् । अथ नित्यं तत्तदा मुक्तेतरावस्थयोरविशेषप्रसंगः । सुखतत्संवेदनयोरनादिनिबन्धननित्यैकरूपत्वेनोभयत्र सद्भावाविशेषात् । वैषयिकसुखेन चास्य संसारावस्थायां साहचर्यानुभवप्रसंगात्सुखद्वयोपलम्भः स्यात् । प्रतिबद्धत्वात्तदा तस्यानुपलम्भ इति चेत् । केनास्य प्रतिबद्धत्वं शरीरेणाविद्यया वैषयिकसुखाद्यनुभवेन बाह्यविषयव्यासंगेन वा । अमीभिश्चतुर्भिरपि विकल्पचतुष्टयोक्तैः पदार्थैर्न सुखस्य तदनुभवस्य वा प्रतिबन्धो विनाशलक्षणोऽनुत्पत्तिस्वरूपो वा कर्तुं शक्यः । तयोर्द्वयोरपि नित्यत्वाभ्युपगमात् । यत्तु कथं शरीरेण तत्प्रतिबन्धः साधीयांस्तस्योपभोगार्थत्वात् । न हि यद्यदर्थं तत्तस्यैव प्रतिबन्धकं युक्तिमदतिप्रसंगादिति केनापि शरीरप्रतिबन्धकत्वापराकरणमुच्यते । तन्न संगच्छते । वैषयिकसु-

खोपभोगार्थमेव शरीरमिति तं प्रत्येवास्य प्रतिबन्धकमयुक्तं न पुनः परमानन्दोपभोगं प्रति । यथा चटुचटुलचटुलाक्षीकटाक्षलक्षस्य स्वो (?) जन्यमानप्रमोदं प्रत्येव प्रतिबन्धकत्वमबन्धुरम् । न पुनरकृत्रिमत्रपाप्रधानमुग्धाङ्गनालोकनसुखं प्रतीतिसमाधानेनानवकाशत्वात् । तस्मादिदमिह तत्पराकरणं साधीयः । शरीरस्य परमानन्दप्रतिबन्धकत्वे प्राणिशरीरापहन्तुः पुंसो हिंसकत्वं न स्यात् । परमानन्दमहोदयान्तरायस्य शरीरस्यापसारकत्वेनोपकारकत्वात् । यत्खल्वतिशयाभिमतवस्तुप्रतिबन्धकापसारकं तदुपकारकमेव विलोकितम् । यथा नयनपुटपीयूषवर्षिश्रीसर्वज्ञावलोकनप्रतिबन्धकान्धकारापसारी मार्तण्डमण्डलालोक इति । अथ शरीरविनाशे वैषयिकसुखोत्थितेर्हिंसक एवायमिति चेत् । नैवम् । अस्य त्वन्मतेनाविद्योपप्लवप्रकारत्वेनातात्त्विकत्वात् । परमानन्दस्यैव पारमार्थिकत्वादतात्त्विकसुखबाधकस्यापि पुंसः पारमार्थिकसुखानुकूलाचरणेन हिंस .... .... .... ....

.... कर्तुमशक्तत्वात् । नापि संतानम् । तस्य संतानिव्यतिरिक्तस्य सौगतैरनभ्युपगमात् । ततोऽस्थिरत्वभावनयोर्विरोध एव । कथं चास्थिरत्वे तद्भावनातो मुक्तिः । यो हि निगडादिभिर्बद्धस्तस्यैव तन्मुक्तिकारण .... .... .... .... .... ....

द्धोऽन्यस्य तन्मुक्तिकारणपरिज्ञानमन्यस्य चानुष्ठानाभिसंधिव्यापारश्चेति वैयधिकरण्ये सर्वमनुपपन्नम् । तन्नास्थिरादिभावना श्रेयसी । तथापि नात एव रागादिवियोगः संगतः किं .... .... .... ....

पोऽभ्युपगतम् । न च कायक्लेशस्य तपस्त्वमुपपन्नम् । कायक्लेशस्य कर्मफलतया नारकादिकायक्लेशवत्तपस्त्वायोगात् । विचित्रशक्तिकं च कर्म विचित्रसुखदुःखादिफलदानान्यथानुपपत्तेः । तच्च कथं ....

.... .... .... .... .... .... .... ....

शालिनो योगिनः स्युः कायसंतापाभावात् । न चैतदपि न्याय्यम् । अभ्युपगमादिविरोधादेव । अथ न कायसंतापस्तपोऽपि त्वन्यदेव ।

हन्तैवमपि न तदेकरूपं चित्रशक्तिकस्य कर्मणः क्षयायालम् । अतिप्रसंगादेव । अथ तपःकर्मशक्तीनां संकरेण क्षयकरणशीलमित्येकं रूपादपि तपसश्चिलशक्तिकस्य कर्मणः क्षयः । नन्वेवं स्वल्पक्लेशेनैकोपवासादिना स्तोकेऽपि कर्माणि क्षीणे सर्वस्य तस्य क्षयापत्तिः । उक्तं च—' कर्मक्षयाद्विमोक्षः स च तपसस्तच्च कायसंतापः ।

.... .... .... गिनां चैत्र ।

अन्यदपि चैकरूपं तच्चित्रक्षयनिबन्धनं न स्यात् ।

तच्छक्तिसंकरक्षयकारीत्यपि वचनमात्रं तु ।

अक्लेशात् स्तोकेऽपि क्षीणे सर्वक्षयप्रसंगो यत् ' ॥ इति ।

तदखिलमलीकम् । तत्र भवत्प्रतिपादिततपःस्व .... .... .... .... .... क्षयहेतुर्विशिष्टावबोधकारणं परमपदासंतता (?) कर्तृदैन्यौत्सुक्यवर्जितं पारमार्थिकसुखवृत्तिमहासत्त्वसेवितं सदानुष्ठानहेतुः शुभा.... .... .... .... त्वात्स्यात् । यदि परमार्थसंस्तदात्मैव नामान्तरेणोक्तः स्यात् । अथ संवृतिसंस्तदेकस्य परमार्थसतोऽसत्त्वादन्यो बद्धोऽन्यश्च मुच्यत इत्यायातम् । तथाच बुद्धस्य मुक्त्यर्थं प्रवृत्तिर्न स्यात् । अथात्यन्तनानात्वेऽपि क्षणानां दृढतररूपतयैकत्वाध्यवसायाद्बन्द्धमात्मानं मोचयिष्यामीत्यभिधाय प्रवर्तते कथमेवं नैरात्म्यदर्शनं यतस्तद्भावनाभ्यासाद्रागादिवियोगः स्यात् । अथ शास्त्रसंस्कारप्रभवं तद्दर्शनमस्ति । न तर्ह्येकत्वाध्यवसायोऽस्खलद्रूप इत्येकं संधित्सोरन्यत्प्रच्यवते । अतः कुतो बद्धस्य मुक्त्यर्थं प्रवृत्तिः स्यात् । यत्तूक्तम्—' अन्यथा भावनायां चात्मनि स्थैर्यादिगुणदर्शननिमित्तः स्नेहोऽवश्यंभावी ' इत्यादि तदुपपन्नमेव । किन्त्वन्यो जनो दुःखाननुषक्तसुखसाधनमपश्यन्नात्मस्नेहात्सांसारिकेषु दुःखानुषक्तसुखसाधनेषु प्रवर्तते । हिताहितविवेकज्ञस्तु तादात्विकसुखं योषादिकं परित्यज्यात्मस्नेहादात्यन्तिकसुखसाधने मुक्तिमार्गे प्रवर्तते । यथा पथ्यापथ्यविवेकमजानन्नातुरस्तात्त्विकसुखसाधनं व्याधिविवृद्धि-

निमित्तं दध्यादिकमुपादत्ते । पथ्यापथ्यविवेकज्ञस्तु तत्परित्यज्य पेयादावारोग्यसाधने प्रवर्तते ।

तदुक्तम्—

' तदात्वसुखसंज्ञेषु भावेष्वन्योऽनुरज्यते ।
हितमेवानुरुध्यन्ते प्रपरीक्ष्य परीक्षकाः ॥ '

यच्चोक्तम्—'आत्मनि सति परसंज्ञा' इत्यादि । तदप्यवज्ञास्पदम् । आत्मनि सति स्वपरसत्तामात्रनिमित्तत्वाभावाद्विशिष्टक्षेत्रकालादिसामग्रीसापेक्षकर्मविपाकस्यापि तदुत्पत्तौ सहकारिणो भावात्तस्य च सर्वदाऽसंभवान्निरन्वयनश्वरेष्वितथाप्ययुक्तम् । निरन्वयनश्वरत्वस्य प्रागेव पराकृतत्वान्नैरात्म्याभासोऽप्यसंभाव्य एव । आत्मनोऽनन्तरं प्रसाधितत्वेन नैरात्म्याभासस्यालीकत्वात् । अलीकस्य च परमपदप्राप्तावपर्याप्तात् । यत्पुनरुक्तम्—' उपभोगाश्रयत्वेन गृहीतेषु ' इत्यादि । तदप्यविचारितरमणीयम् । हेयोपादेयतत्त्वज्ञा ह्यात्यन्तिकसुखसाधनमुपभोगाश्रयमात्मीयं चाभिमन्यन्ते । न तादात्विकसुखसाधनम् । तथा च तेषां महात्मनामेकान्ते स्वान्तेन न सार्धं गोष्ठी ।

क्रामन्त्येते क्षितिमसुहृदः सर्वलुण्टाकचेष्टाः
संभाव्योऽस्मिन्नभिमरशरश्रेणिशल्यप्रवेशः ।
इत्थं चिन्ताककचरचनाक्रान्तिरश्रान्तमास्ते
राज्ये यस्मिन् हृदयकणिकाप्यत्र का स्यात्सुखस्य ॥ ८१३ ॥
साम्राज्यं ससुखं सखे भवतु वा कालस्य किन्तूपरि
प्रौढः सैरिभशृङ्गकोटिकुलभूर्विभ्रमो भ्राम्यति ।
अग्रे दुर्गमदुर्गतासु गतिः सा नाम यस्यामहो
वृत्तिर्वैतरणीतरङ्गतरणव्यापारमुख्या परम् ॥ ८१४ ॥
प्रकृतिपिशुनैर्मर्त्यैर्मैत्री किमत्र चलाचला
किमुत मरुता धूतः स्फीतध्वजाञ्चलपल्लवः ।

किमथ चपला तन्तुर्नृत्यन्नवाम्बुदडम्बरे
नहि नहि स्त्रीणां प्रीतिः प्रियं प्रति सर्वथा ॥ ८१५ ॥
फुल्ललोचनचारुपङ्कजवतीं वेणीलताशैवल–
व्याकीर्णां कुचचक्रवाकमिथुनां वल्गद्वलीवीचिकाम् ।
श्रित्वा स्त्रीतटिनीति विध्यथ गुरुर्मोहो जलप्राणिनः
संहर्तुं वितनोति सान्द्रपिशितं दन्तच्छदछद्मना ॥ ८१६ ॥
नो यस्मिन्शतकोटिकोटिकुटिलाकोपात्प्रिया भ्रूकुटिः
क्लेशावेशसमर्थबाह्यविषयापेक्षापि यस्मिन्न हि ॥
नित्यानन्दमयी विमुक्तरमणी सा लभ्यते यद्वशा-
त्संतोषसुखं च यस्य सुतरामभ्यस्य सम्यक्क्रमा ॥ ८१७ ॥
वैराग्यं त्वयि राग संप्रति मम त्वद्वेष (?) विद्वेष्मि भोः
तृष्णेऽत्यन्तवितृष्णता त्वयि बने पैशून्यशून्ये व्रज ।
अस्माकं शमशीलसंयमकलासंपर्कपूतात्मनां
त्वत्संस्पर्शविधौ समस्ति नियतं नैवाधिकारक्रमः ॥ ८१८ ॥

एवं च भावयतो विवेकिनो राज्ययोषाप्रमुखेषु दुःखहेतुषु सुखलेशसाधनत्वसद्भावेऽप्यन्यदात्यन्तिकसुखसाधनं रत्नत्रयं पश्यतः कुतस्तेष्वात्मीयबुद्धिर्यतस्ततो नैर्वृत्तिर्न स्यात् । न ह्यात्मीयबुद्धेस्ततः स्यान्निवृत्तिः । यद्येकान्तेन तेषां दुःखहेतुत्वं स्यात् । न चैवं लेशतः सुखहेतुत्वस्याप्यत्र संभवात् । तेन दुःखहेतुत्वेऽपि येनाकारेण सुखहेतुता तावतांशेन स्वस्योपकारकांस्तान्मन्यमानस्तेषु नात्मीयबुद्धिं जहातीति । तदप्यसांप्रतम् । तेषां सुखलेशसाधनत्वेऽप्यन्यस्यात्यन्तिकसुखसाधनस्य सद्भावेन निर्विषान्नस्येव त्यागसंभवात्, तन्न रागादिवियुक्तज्ञानोत्पत्तिर्निःश्रेयसं संगच्छते । नापि ज्ञानसंतानोच्छेदलक्षणम् । तत्प्रसाधकप्रमाणाभावात् । ननु खाङ्गिनो निराश्रवं चित्तं नोपादेयक्षणमारभते । सहकारिरहितत्वात्सादृग्दीपशिखावदित्यनुमानमस्त्येव तत्सिद्धिसमृद्धमिति चेत् । नैवम् । अत्र हेतो-

बुद्धचित्तेनानेकान्तात् । हितैषित्वाभावे सतीति विशेषणान्नार्थलघु इति चेत् । न । तस्यासिद्धत्वात् । समानं हि हितैषित्वं खड्गिसुगतयोरात्मजगद्विषयम् । जगद्विषयहितैषित्वाभावो विशेषणम् । स च खड्गिनि सिद्ध एवेति चेत् । ननु तथापि न व्यभिचारपरिहारः सुगतस्यापि । कृतकृत्येषु हि .... .... .... भावे वा सुगतस्य यत्किंचनकारित्वम् । प्रवृत्तिनैष्फल्यात् । यत्तु देशतोऽकृतकृत्येषु तस्य हितैषित्वं तत् खड्गिनोऽपि स्वचित्तेषूत्तरेष्वस्तीति न तद्धितैषित्वाभावः सिद्धः । नापि चरमत्वं विशेषणम् । तस्याप्यसिद्धत्वात्प्रमाणाभावाच्चरमं निराश्रवं खड्गिचित्तं स्वोपादेयानारम्भकत्वाद्वर्तिस्नेहादिशून्यदीपादिक्षणवदिति चेत् । नैवम् । अन्योन्याश्रयापत्तेः । सति हि तस्य स्वोपादेयानारम्भकत्वे चरमत्वस्य सिद्धिः । तत्सिद्धौ च स्वोपादेयानारम्भकत्वसिद्धिरिति । किं चान्त्यक्षणस्यानर्थक्रियाकारितायामवस्तुत्वं स्यात्तदवस्तुत्वे चावस्तुजनकत्वात्तज्जनकस्यापीत्यायातमशेषस्य चित्तसंतानस्यावस्तुत्वम् । अथ स्वसंतानवर्तिनो योगिज्ञानस्य जननान्नाशेषस्य तत्संतानस्यावस्तुत्वम् । तदयुक्तम् । रसादेरेककालस्य रूपादेरव्यभिचार्यनुमानाभावानुषङ्गात् । अन्त्यक्षणवद्रूपादेर्विजयकार्यजनकत्वेऽपि सजातीयकार्यजनकत्वासंभवात् । एकसामग्र्यधीनत्वेन रूपरसयोर्नियमेन कार्यद्वयारम्भकत्वेऽन्यत्रापि कार्यद्वयारम्भकत्वं स्यात् । योगिज्ञानान्त्यक्षणयोरप्येकसामग्र्यधीनत्वाविशेषात् । अथ स्वसंतानवर्ति .... ....

.... .... रो दर्शितः । अथ पिच्छिकाद्यग्रहेऽप्रमार्जिताद्युपवेशनादि संभवतः सूक्ष्मसत्त्वव्यापत्तिसद्भावे प्राणातिपातविरमणाख्यमहाव्रतधारणानुपपत्तेस्तदर्थं तद्ग्रहणं धर्मोपक .... .... ....

इति । तदवद्यम् । आहारपिच्छिकादावप्यखिलस्यास्य समानत्वात् । अपि च——ननु मुमुक्षूणां स्त्रीतुरङ्गमातङ्गादेरुपादानं संभवति । तस्य संयमानुपकारित्वात्, तदुपभोगे प्रभूततरं तदभिलाषभावेन संयमबाधोपप

.... .... .... ....भ्यासं हि वर्धन्ते विषयाः। कौशलानि चेन्द्रियाणाम्। न च वसुमपि (?) संयमानुपकारि। तस्य तदुपकारितया प्रोक्तत्वात्। एवं च वस्त्रस्य ग्रन्थत्वासिद्धे रागाद्यपचयनिमित्तनैर्ग्रन्थ्यपरिपन्थित्वं साधनमसिद्धमेवेति नास्मादपि वस्त्रस्य चारित्रबाधकत्वसिद्धिः। नाप्यागमः। प्रतिषिद्धत्वात्। तत्प्रतिषेधे कस्यचिदप्यागमस्याभावात्। स हि भवन् ' किमचीवरास्तीर्थकृतः ' इत्ययमुत जिनकल्पोपदेशो ' जिताचेलपरीषहो मुनिः ' इति वा। न तावदाद्यो विकल्पः। तत्र हि तीर्थकृतामचीवरत्वं कादाचित्कमुक्तं शाश्वतिकं वा। यदि कादाचित्कं तदा न किंचिदनुचितम्। कदाचिदस्माकमप्यस्याभिमतत्वात्। अथ शाश्वतिकम्। तन्न। **' सव्वे वि एगदूसेण निग्गया जिणवरा चउव्वीसम् '** इति वचनात्। अथ तत्र एगदोसेणेति पाठः। सर्वेऽपि संसारदोषेणैकेन निर्गता इति कृत्वा न त्वेवमव्यवस्था। सर्वत्र सर्वैरपि स्वेच्छया पाठानां सुकरत्वात्। अथायमेवात्र पाठ इत्यत्र न किंचिद्भवतां प्रमाणमस्ति। न च तथा पुस्तकोपलम्भः, तथागमिकाम्नायो वाऽत्र प्रमाणम्। अस्य सार्वत्रिकस्यासिद्धत्वात्। प्रादेशिकस्य पुनरितरत्रापि सद्भावादिति चेत्, नन्वेवम् ' अचीवरास्तीर्थकृतः ' इत्यत्रापि पाठे किं प्रमाणं तव स्यात्। तथा च कदाचित्—अचीवरास्तीर्थकृत इत्यागमानिर्णयात्कथमतो वस्त्राभावो निष्प्रत्यूहः प्रसाध्येत। किंच तीर्थकृतामचीवरत्ववचने तेषामेव तद्धर्मानुपकारीति निश्चयोऽस्तु। नापरेषाम्। न हि यत्तीर्थनाथेषु भगवत्सु दृष्टम्। तदखिलमस्मादृशेष्वपि परिकल्पनीयम्। .... .... ....

.... .... .... यथावच्छद्मस्थावस्थायां परोपदेशं दीक्षां वा .... .... .... विवेचनीयः। अथापुण्यपरमप्रकर्ष एव हेतुत्वेन विवक्षितो न परमप्रकर्षमात्रं तर्हि विशेषणं वा .... .... तत्त्वात्पुरुषेभ्यो हीनत्वमपि पुरुषेभ्योऽपकृष्यमाणत्वमेव। तच्च यथा

न मृगाक्षीणां मोक्षप्रतिक्षेप .... .... .... मश्रेयस्त्वमप्यादाय व्यावर्तेत । न चैवमिन्द्रादिशरीरे धर्मनिर्वर्तितेऽपि तदभावात् । अथ जिनकालिकमनुष्यत्वे .... .... .... अत्यन्तदुःखाधारपुरुषशरीरेण रत्नत्रयोपेतात्माश्रयेण व्यक्त एव व्यभिचारः । यतिगृहिदेववन्द्यपदानर्हत्वम .... .... .... क्षस्यानुमानस्यागमस्य स्मरणादेर्वा भावोऽभिधीयेत । यदि प्रत्यक्षस्य स्वसंबन्धिनः सर्वसंबन्ध .... .... .... ....

.... .... त् सर्वसंबन्धिप्रत्यक्षलक्षणसाधकनिर्वृत्तिस्तु भवतोऽप्यसिद्धैव । सर्वपुरुषपरिषत्परिज्ञाने हि तथाविध .... .... पन्नपुरुषवत् । न च मुक्त्यविकलकारणत्वमसिद्धम् । स्त्रियां तदभावो हि तस्यां किं पुरुषेभ्योऽपकृष्यमाणत्वेन निर्वाह .... .... तिं संभवन्मुक्तिव्यक्तिकाप्रव्रज्याधिकारित्वात्तद्वत् । नाप्यागमस्याभावः । तस्य

' **दस य नपुंसएसु वीसं इत्थियासु य** .... ....

यः शब्दोऽन्वयव्यतिरेकाभ्यां वाचकत्वेन दृश्यते स तस्यार्थो । यथा गवादिशब्दानां सास्नादिमदादयो .... .... .... क्वचन स्त्रीशब्दस्य परिभाषितोऽर्थोऽस्ति दृश्यते त्वागमे लोकरूढ एवार्थे स्त्रीशब्दः

.... .... .... .... .... ....

.... .... .... .... .... ....

॥ इति सप्तमः परिच्छेदः ॥ ७ ॥

# अथाष्टमः परिच्छेदः ।

( रत्नाकरावतारिका व्याख्या )

प्रमाणनयतत्त्वं व्यवस्थाप्य संप्रति तत्प्रयोगभूमिभूतं वस्तुनिर्णयाभिप्रायोपक्रमं वादं वदन्ति—

**विरुद्धयोर्धर्मयोरेकधर्मव्यवच्छेदेन स्वीकृततदन्यधर्मव्यवस्थापनार्थं साधनदूषणवचनं वादः ॥ १ ॥**

विरुद्धयोरेकत्र प्रमाणेनाऽनुपपद्यमानोपलम्भयोर्धर्मयोर्मध्यादिति निर्धारणे षष्ठी सप्तमी वा । विरुद्धावेव हि धर्मावेकान्तनित्यत्वकथञ्चिन्नित्यवादी वादं प्रयोजयतः, न पुनरितरौ, तद्यथा--पर्यायवद् द्रव्यं गुणवच्च; विरोधश्चैकाधिकरणत्वैककालत्वयोरेव सतोः संभवति । अनित्या बुद्धिर्नित्य आत्मेति भिन्नाधिकरणयोः; पूर्वं निष्क्रियम्, इदानीं क्रियावद् द्रव्यमिति भिन्नकालयोश्च तयोः प्रमाणेन प्रतीतौ विरोधासंभवात् । अयमेव हि विरोधो यत्प्रमाणेनाऽनुपलम्भनं नाम, अन्यथाऽपि तस्याभ्युपगमे सर्वत्र तदनुषङ्गप्रसङ्गात्, इति विरुद्धत्वान्यथानुपपत्तेरेकाधिकरणत्वैककालत्वयोरवगतौ । यद् न्यायभाष्ये—"वस्तु[1]धर्मावेकाधिकरणौ विरुद्धावेककालावनवसितौ" इति तयोरुपादानम्, तत् पुनरुक्तम्, अपुष्टार्थं वा । यदप्यत्रैवानवसिताविति, तदप्यव्यापकम्, यतो वीतरागविषयवादकथायामनवसितत्वसद्भावेऽपि जिगीषुगोचरवादकथायां तदसद्भावात् । वीतरागवादो ह्यन्यतरसंदेहादपि प्रवर्तते । जिगीषुगोचरः पुनर्वादो न नाम निर्णयमन्तरेण प्रवर्त्तितुमुत्सहते ।

---

१ न्या. भा. पृ. १४६ पं. ११.

तथाहि—वादी शब्दादौ नित्यत्वं स्वयं प्रमाणेन प्रतीत्यैव प्रवर्तमानोऽसमानप्रतिपक्षप्रतिक्षेपमनोरथोऽहमहमिकयाऽनुमानमुपन्यस्यति; प्रतिवाद्यपि तत्रैव धर्मिणि प्रतिपन्नानित्यत्वधर्मस्तथैव दूषणमुदीरयतीति क नाम वादकथाप्रारम्भात् प्रागनवसायस्यावकाशः ? । ततोऽयं सूत्रार्थः—यावेकाधिकरणावेककालौ च धर्मौ विरुध्येते, तयोर्मध्यादेकस्य सर्वथा नित्यत्वस्य कथंचिन्नित्यत्वस्य वा, व्यवच्छेदेन निरासेन, स्वीकृततदन्यधर्मस्य कथंचिन्नित्यत्वस्य सर्वथा नित्यत्वस्य वा, व्यवस्थापनार्थं वादिनः प्रतिवादिनश्च साधनदूषणवचनं वाद इत्यभिधीयते । सामर्थ्याच्च स्वपक्षविषयं साधनम्, परपक्षविषयं तु दूषणम्, साधनदूषणवचने च प्रमाणरूपे एव संभवतः, तदितरयोस्तयोस्तदाऽऽभासत्वात्; न च ताभ्यां वस्तु साधयितुं दूषयितुं वा शक्यमिति । ननु यस्मिन्नेव धर्मिण्येकतरधर्मनिरासेन तदितरधर्मव्यवस्थापनार्थं वादिनः साधनवचनम्, कथं तस्मिन्नेव प्रतिवादिनस्तद्विपरीतं दूषणवचनमुचितं स्यात् ?, व्याघातात्; इति चेत् । तदसत्, स्वाभिप्रायानुसारेण वादिप्रतिवादिभ्यां तथासाधनदूषणवचने विरोधाभावात् । पूर्वं हि तावद् वादी स्वाभिप्रायेण साधनमभिधत्ते, पश्चात् प्रतिवाद्यपि स्वाभिप्रायेण दूषणमुद्भावयति । न खल्वत्र साधनं दूषणं चैकत्रैव धर्मिणि तात्त्विकमस्तीति विवक्षितम्; किन्तु स्वस्वाभिप्रायानुसरणेन वादिप्रतिवादिनौ ते तथा प्रयुञ्जाते, इति तथैवोक्ते ॥ १ ॥

अङ्गनियमभेदप्रदर्शनार्थं वादे प्रारम्भकभेदौ वदन्ति—

## प्रारम्भकश्चात्र जिगीषुः, तत्त्वनिर्णिनीषुश्च ॥२॥

तत्र जिगीषुः प्रसह्य प्रथमं च वादमारभते, प्रथममेव च तत्त्वनिर्णिनीषुः, इति द्वावप्येतौ प्रारम्भकौ भवतः । तत्र जिगीषोः—

"सारङ्गमातङ्गतुरङ्गपूगाः ! पलाय्यतामाशु वनादमुष्मात् ।
साटोपकोपस्फुटकेशरश्रीर्मृगाधिराजोऽयमुपेयिवान् यत्" ॥१॥

इत्यादिविचित्रपत्रोत्तम्भनम् । अयि ! कपटनाटकपटो ! सितपट ! किमेतान् मन्दमेधसस्तपस्विनः शिष्यानलीकतुण्डताण्डवाडम्बरप्रचण्डपाण्डित्याविकारेण विप्रतारयसि ?; क्व जीवः ?, न प्रमाणदृष्टमदृष्टम्, दवीयसी परलोकवार्त्तेति साक्षादाक्षेपो वा, न विद्यते निरवद्यविद्यावदातस्तव सदसि कश्चिदपि विपश्चिदित्यादिना भूपतेः समुत्तेजनं च; इत्यादिर्वादारम्भः । तत्त्वनिर्णिनीषोस्तु सब्रह्मचारिन् ! शब्दः किं कथञ्चिद् नित्यः स्याद् नित्य एव वेति संशयोपक्रमो वा, कथञ्चिद् नित्य एव शब्द इति निर्णयोपक्रमो वा इत्यादिरूपः । वचनव्यक्ती सूत्रेष्वतन्त्रे, क्वचिदेकस्मिन्नपि प्रौढे प्रतिवादिनि बहवोऽपि संभूय विवदेरन् जिगीषवः, पर्यनुयुञ्जीरंश्च तत्त्वनिर्णिनीषवः, स च प्रौढतयैव तांस्तावतोऽप्यभ्युपैति, प्रत्याख्याति च, तत्त्वं चाचष्टे । क्वचिदेकमपि तत्त्वनिर्णिनीषुं बहवोऽपि तथाविधाः प्रतिबोधयेयुः । इत्यनेकवादिकृतः, स्वीकृतश्च वादारम्भः संगृह्यते ॥ २ ॥

तत्र जिगीषोः स्वरूपमाहुः—

**स्वीकृतधर्मव्यवस्थापनार्थं साधनदूषणाभ्यां परं पराजेतुमिच्छुर्जिगीषुः ॥ ३ ॥**

स्वीकृतो धर्मः शब्दादेः कथञ्चिद् नित्यत्वादिर्यः, तस्य व्यवस्थापनार्थम्, यत्सामर्थ्यात् तस्यैव साधनं परपक्षस्य च दूषणम्, ताभ्यां कृत्वा परं पराजेतुमिच्छुर्जिगीषुरित्यर्थः । एतेन यौगिकोऽप्ययं जिगीषुशब्दो वादाधिकारिनिरूपणप्रकरणे योगरूढ इति प्रदर्शितम् ॥ ३ ॥

अथ तत्त्वनिर्णिनीषोः स्वरूपं निरूपयन्ति—

**तथैव तत्त्वं प्रतितिष्ठापयिषुस्तत्त्वनिर्णिनीषुः ॥ ४ ॥**

तथैव स्वीकृतधर्मव्यवस्थापनार्थं साधनदूषणाभ्याम्, शब्दादेः कथञ्चिद् नित्यत्वादिरूपं तत्त्वम्, प्रतिष्ठापयितुमिच्छुस्तत्त्वनिर्णिनीषुरित्यर्थः ॥ ४ ॥

अस्यैवाङ्गेयतावैचित्र्यहेतवे भेदावुपदर्शयन्ति–

## अयं च द्वेधा स्वात्मनि परत्र च ॥ ५ ॥

अयमिति तत्त्वनिर्णिनीषुः, कश्चिद् खलु सन्देहाद्युपहतचेतोवृत्तिः स्वात्मनि तत्त्वं निर्णेतुमिच्छति, अपरस्तु परानुग्रहैकरसिकतया परत्र तथा, इति द्वेधाऽसौ तत्त्वनिर्णिनीषुः। सर्वोऽपि च धात्वर्थः करोत्यर्थेन व्याप्त इति स्वात्मनि परत्र च तत्त्वनिर्णयं चिकीर्षुरित्यर्थः। अथ परं प्रति तत्त्वनिर्णिनीषोरप्यस्य तन्निर्णयोपजनने जयघोषणमुद्घोषयन्त्येव सभ्या इति चेत्, ततः किम्?। जिगीषुता स्यादिति चेत्, कथं यो यदनिच्छुः स तदिच्छुः परोक्तिमात्राद् भवेत्?। तत् किं नासौ जयमश्नुते?, बाढमश्नुते। न च तमिच्छति च, अश्नुते चेति किमपि कैतवं तवेति चेत्, स्यादेवम्, यद्यनिष्टमपि न प्राप्येत। अवलोक्यन्ते चानिष्टान्यप्यनुकूलप्रतिकूलदैवोपकल्पितानि जनैरुपभुज्यमानानि शतशः फलानि। तदिदमिह रहस्यम्–परोपकारैकपरायणस्य कस्यचिद् वादिवृन्दारकस्य परत्र तत्त्वनिर्णिनीषोरानुषङ्गिकं फलं जयः, मुख्यं तु परतत्त्वावबोधनम्। जिगीषोस्तु विपर्यय इति ॥ ५ ॥

स्वात्मनि तत्त्वनिर्णिनीषुमुदाहरन्ति–

## आद्यः शिष्यादिः ॥ ६ ॥

आद्य इति स्वात्मनि तत्त्वनिर्णिनीषुरित्यर्थः। आदिग्रहणादिहोत्तरत्र च सब्रह्मचारिसुहृदादिरादीयते ॥ ६ ॥

परत्र तत्त्वनिर्णिनीषुमुदाहरन्ति–

## द्वितीयो गुर्वादिः ॥ ७ ॥

द्वितीय इति परत्र तत्त्वनिर्णिनीषुः ॥ ७ ॥

द्वितीयस्य भेदावभिदधति–

## अयं द्विविधः क्षायोपशमिकज्ञानशाली केवली च ॥ ८ ॥

अयमिति परत्र तत्त्वनिर्णिनीषुर्गुर्वादिः, ज्ञानावरणीयस्य कर्मणः क्षयोपशमेन निर्वृत्तं ज्ञानं मतिश्रुतावधिमनःपर्यायरूपं व्यस्तं समस्तं वा यस्यास्ति स तावदेकः; द्वितीयस्तु तस्यैव क्षयेण यज्जनितं केवलज्ञानं तद्वान्। तदेवं चत्वारः प्रारम्भकाः—जिगीषुः, स्वात्मनि तत्त्वनिर्णिनीषुः, परत्र तत्त्वनिर्णिनीषू च क्षायोपशमिकज्ञानशालिकेवलिनाविति। तत्त्वनिर्णिनीषोर्हि ये भेदप्रभेदाः प्रदर्शिताः, न ते जिगीषोः सर्वेऽपि संभवन्ति। तथाहि—न कश्चिद् विपश्चिदात्मानं जेतुमिच्छति। न च केवली परं पराजेतुमिच्छति, वीतरागत्वात्। गौडद्रविडादिभेदस्तु नाङ्गनियमभेदोपयोगी, प्रसञ्जयति चानन्त्यम्; इति पारिशेष्यात् क्षायोपशमिकज्ञानशाली परत्र जिगीषुर्भवतीत्येकरूप एवासौ न भेदप्रदर्शनमर्हति। यौ च परत्र तत्त्वनिर्णिनीषोर्भेदावुक्तौ, न तौ द्वावपि स्वात्मनि तत्त्वनिर्णिनीषोः संभवतः, निर्णीतसमस्ततत्त्वज्ञानशालिनः केवलिनः स्वात्मनि तत्त्वनिर्णयेच्छानुपपत्तेः, इति पारिशेष्यात् क्षायोपशमिकज्ञानवानेव स्वात्मनि तत्त्वनिर्णिनीषुर्भवतीत्यसावप्येकरूप एवेति॥ ८॥

वादिप्रतिवादिनोर्हस्तिप्रतिहस्तिन्यायेन प्रसिद्धेर्यावद् वादिनः, तावद् वैव प्रतिवादिभिरपि भवितव्यम्? इत्याहुः—

## एतेन प्रत्यारम्भकोऽपि व्याख्यातः॥ ९॥

आरम्भकं प्रति प्रतीपं चाऽऽरभमाणः प्रत्यारम्भकः, सोऽयमेतेन प्रारम्भकभेदप्रभेदप्ररूपणेन व्याख्यातः। प्रदर्शितभेदप्रभेदः सहृदयैः स्वयमवगन्तव्यः। एवं च प्रत्यारम्भकस्यापि जिगीषुप्रभृतयश्चत्वारः प्रकारा भवन्ति। तत्र यद्यप्येकैकशः प्रारम्भकस्य प्रत्यारम्भकेण सार्धं वादे षोडश भेदाः प्रादुर्भवन्ति, तथापि जिगीषोः स्वात्मनि तत्त्वनिर्णिनीषुणा, स्वात्मनि तत्त्वनिर्णिनीषोर्जिगीषुणा, स्वात्मनि तत्त्वनिर्णिनीषोः स्वात्मनि तत्त्वनिर्णिनीषुणा च, केवलिनश्च केवलिना सह वादो न संभवत्येव; इति चतुरो भेदान् पातयित्वा द्वादशैव तेऽत्र गण्यन्ते। तद्यथा—वादी जिगीषुः, प्रतिवादी तु जिगीषुः स्वात्मनि तत्त्व-

निर्णिनीषुर्न, परत्र तत्त्वनिर्णिनीषुः क्षायोपशमिकज्ञानशाली, केवली च । तथा वादी स्वात्मनि तत्त्वनिर्णिनीषुः, प्रतिवादी तु जिगीषुर्न स्वात्मनि तत्त्वनिर्णिनीषुर्न, परत्र तत्त्वनिर्णिनीषुः क्षायोपशमिकज्ञानशाली, केवली च । तथा वादी परत्र तत्त्वनिर्णिनीषुः क्षायोपशमिकज्ञानशाली प्रतिवादी तु जिगीषुः, स्वात्मनि तत्त्वनिर्णिनीषुः, परत्र तत्त्वनिर्णिनीषुः क्षायोपशमिकज्ञानशाली, केवली च । तथा वादी परत्र तत्त्वनिर्णिनीषुः केवली च प्रतिवादी तु जिगीषुः, स्वात्मनि तत्त्वनिर्णिनीषुः, परत्र तत्त्वनिर्णिनीषुः क्षायोपशमिकज्ञानशाली, केवली च न । एवमेते चत्वारश्चतुष्काः षोडश । नञुपलक्षितेषु चतुर्षु पातितेषु द्वादश भवन्ति--

"अङ्गनैयत्यनिश्चित्यै वादे वादफलार्थिभिः ।
द्वादशैवाऽवसातव्या एते भेदा मनस्विभिः" ॥ १ ॥ ९ ॥

अङ्गनियममेव निवेदयन्ति--

**तत्र प्रथमे प्रथमतृतीयतुरीयाणां चतुरङ्ग एव, अन्यतमस्याऽप्यङ्गस्यापाये जयपराजयव्यवस्थादिदौःस्थ्यापत्तेः ॥ १० ॥**

उक्तेभ्यश्चतुर्भ्यः प्रारम्भकेभ्यः प्रथमे जिगीषौ प्रारम्भके सति प्रथमस्य जिगीषोरेव, तृतीयस्य परत्र तत्त्वनिर्णिनीषुभेदस्य क्षायोपशमिकज्ञानशालिनः तद्भेदस्यैव, तुरीयस्य केवलिनश्च प्रत्यारम्भकस्य प्रतिवादिनश्चतुरङ्ग एव प्रकरणाद् वादो भवति । वादिप्रतिवादिरूपयोरङ्गयोरभावे वादस्यानुत्थानोपहततैव, इति तयोरयत्नसिद्धत्वेऽप्यपराङ्गद्वयस्यावश्यम्भावप्रदर्शनार्थं चतुरङ्गत्वं विधीयते । प्रसिद्धं च सिद्धांशमिश्रितस्याऽप्यसिद्धस्यांशस्य विधानम् । यथा शब्दे हि समुच्चारिते यावानर्थः प्रतीयते तावति शब्दस्याभिधैव व्यापार इति "निःशेषच्युतचन्दनम्" इत्यादौ वाच्य एवैकोऽर्थ इति प्रत्यवस्थितं प्रति द्वावेतावर्थौ वाच्यः प्रतीयमानश्चेत्येवंरूपतया वाच्यस्य सिद्धत्वेऽपि प्रतीयमान-

पार्थक्यसिद्ध्यर्थं द्वित्वविधानम् । तत्र वादिप्रतिवादिनोरभावे वाद एव न संभवति, दूरे जयपराजयव्यवस्था; इति स्वतःसिद्धावेव तौ । तत्र च वादिवत् प्रतिवाद्यपि चेज्जिगीषुः, तदानीमुभाभ्यामपि परस्परस्य शाठ्यकलहादेर्जयपराजयव्यवस्थाविलोपकारिणो निवारणार्थं लाभाद्यर्थं वाऽपराङ्गद्वयमप्यवश्यमपेक्षणीयम् । अथ तृतीयस्तुरीयो वाऽसौ स्यात्, तथाऽप्यनेन जिगीषोर्वादिनः शाठ्यकलहाद्यपोहाय, जिगीषुणा च प्रारम्भकेण लाभपूजाख्यात्यादिहेतवे तदपेक्ष्यत एवेति सिद्धैव चतुरङ्गता । स्वात्मनि तत्त्वनिर्णिनीषुस्तु जिगीषुं प्रति वादितां प्रतिवादितां च न प्रतिपद्यते, स्वयं तत्त्वनिर्णयानभिमाने परावबोधार्थं प्रवृत्तेरभावात्, तस्मात् तत्त्वनिर्णयासम्भवाच्च; इति नायमिहोत्तरत्र च निर्दिश्यते ॥ १० ॥

अनयैव नीत्या जिगीषुमिव स्वात्मनि तत्त्वनिर्णिनीषुमपि प्रत्यस्य वादिता प्रतिवादिता वा न सङ्गच्छत इति पारिशेष्यात् तृतीयतुरीययोरेवास्मिन् वादः सम्भवतीति तृतीयस्य तावदङ्गनियममभिदधते—

**द्वितीये तृतीयस्य कदाचिद् द्व्यङ्गः, कदाचित् त्र्यङ्गः ॥ ११ ॥**

स्वात्मनि तत्त्वनिर्णिनीषौ वादिनि समुपस्थिते सति तृतीयस्य परत्र तत्त्वनिर्णिनीषोः क्षायोपशमिकज्ञानशालिनः प्रतिवादिनः, कदाचिद् द्व्यङ्गो वादो भवति, यदा जयपराजयादिनिरपेक्षतयाऽपेक्षितस्तत्त्वावबोधो वादिनि प्रतिवादिना कर्तुं पार्यते, तदानीमितरस्य सभ्यसभापतिरूपस्याऽङ्गद्वयस्यानुपयोगात् । न ह्यनयोः स्वपरोपकारायैव प्रवृत्तयोः शाठ्यकलहादिलाभादिकामभावाः सम्भवन्ति । यदा पुनरुत्ताम्यताऽपि क्षायोपशमिकज्ञानशालिना प्रतिवादिना न कथंचित्तत्त्वनिर्णयः कर्तुं शक्यते, तदा तन्निर्णयार्थमुभाभ्यामपि सभ्यानामपेक्ष्यमाणत्वात् कलहलाभाद्यभिप्रायाभावेन सभापतेरनपेक्षणीयत्वात् त्र्यङ्गः ॥ ११ ॥

द्वितीय एव वादिनि चतुर्थस्याङ्गनियममाहुः–

**तत्रैव व्यङ्गस्तुरीयस्य ॥ १२ ॥**

तत्रैव द्वितीये स्वात्मनि तत्त्वनिर्णिनीषौ वादिनि, तुरीयस्य परत्र तत्त्वनिर्णिनीषोः केवलिनः प्रतिवादिनः, व्यङ्ग एव वादः, तत्त्वनिर्णायकत्वाभावासंभवेन सभ्यानामभिहितदिशा सभापतेश्चाऽनपेक्षणात्॥१२॥

तृतीयेऽङ्गनियममाहुः–

**तृतीये प्रथमादीनां यथायोगं पूर्ववत् ॥ १३ ॥**

परत्र तत्त्वनिर्णिनीषौ क्षायोपशमिकज्ञानशालिनि वादिनि, निवेदितरूपाणां प्रथमद्वितीयतृतीयतुरीयाणां प्रतिवादिनाम्, उक्तयुक्त्यैव प्रथमस्य चतुरङ्गः, द्वितीयतृतीययोः कदाचिद् व्यङ्ग, कदाचित् त्र्यङ्गः, तुरीयस्य तु व्यङ्ग एव वादो भवति। निःसीमा हि मोहहतकस्य महिमा, इति कश्चिदात्मानं निर्णीततत्त्वमिव मन्यमानः समग्रपदार्थपरमार्थदर्शिनि केवलिन्यपि तन्निर्णयोपजननार्थं प्रवर्तत इति न कदाचिदसम्भावना, भगवांस्तु केवली प्रबलकृपापीयूषपूरपूरितान्तःकरणतया तमप्यवबोधयतीति को नाम नानुमन्यते ? ॥ १३ ॥

परोपकारैकपरायणस्य भगवतः केवलिनः संभवन्त्यपि परत्र तत्त्वनिर्णिनीषा न केवलकलावलोकितसकलवस्तुतया कृतकृत्ये केवलिनि विलसितुमुत्सहत इति प्रथमादीनां त्रयाणामेवाङ्गनियममाहुः—

**तुरीये प्रथमादीनामेवम् ॥ १४ ॥**

परत्र तत्त्वनिर्णिनीषौ केवलिनि वादिनि, प्रथमद्वितीयतृतीयानामेवमिति पूर्ववत् प्रथमस्य चतुरङ्गः, द्वितीयतृतीययोस्तु व्यङ्ग एव वादो भवतीत्यर्थः।

"प्रारम्भकापेक्षतया यदेवमङ्गव्यवस्था लभते प्रतिष्ठाम्।
संचिन्त्य तस्मादमुमादरेण प्रत्यारभेत प्रतिभाप्रगल्भः"॥१॥१४॥

चतुरङ्गो वाद इत्युक्तम्, कानि पुनश्चत्वार्यङ्गानि ? इत्याहुः–

**वादिप्रतिवादिसभ्यसभापतयश्चत्वार्यङ्गानि ॥ १५॥**

स्पष्टम् ॥ १५ ॥

अथैतेषां लक्षणं कर्म च कीर्तयन्ति--

**प्रारम्भकप्रत्यारम्भकावेव मल्लप्रतिमल्लन्यायेन वादिप्रतिवादिनौ ॥ १६ ॥**

यौ तौ प्रारम्भकप्रत्यारम्भकौ पूर्वमुक्तौ, तावेव परस्परं वादिप्रतिवादिनौ व्यपदिश्येते; यथा द्वौ नियुध्यमानौ मल्लप्रतिमल्लाविति ॥ १६ ॥

**प्रमाणतः स्वपक्षस्थापनप्रतिपक्षप्रतिक्षेपावनयोः कर्म ॥ १७ ॥**

वादिना प्रतिवादिना च स्वपक्षस्थापनं परपक्षप्रतिक्षेपश्च द्वितयमपि कर्तव्यम्, एकतरस्यापि विरहे तत्त्वनिर्णयानुत्पत्तेः । अत एव स्वपक्षेत्यादिद्विवचनेनोपक्रम्यापि कर्मेत्येकवचनम्, यथेन्धनध्मानाधिश्रयणादीनामन्यतमस्याप्यपाये विक्लित्तेरनिष्पत्तेः सर्वेषामपि पाक इत्येकतया व्यपदेश इति । स्वपक्षस्थापनपरपक्षप्रतिक्षेपयोः समासेन निर्देशः क्वचिदेकप्रयत्ननिष्पन्नताप्रत्यायनार्थम् । यदा हि निवृत्तायां प्रथमकक्षायां प्राप्तावसरायां च द्वितीयकक्षायां प्रतिवादी न किञ्चिद् वदति, तदानीं प्रथमकक्षायां स्वदर्शनानुसारेण सत्प्रमाणोपक्रमत्वे स्वपक्षस्थापनमेव परपक्षप्रतिक्षेपः, यदा वा विरुद्धत्वादिकमुद्भावयेत्, तदा परपक्षप्रतिक्षेप एव स्वपक्षसिद्धिः, इति समासेऽपि तुल्यकक्षताप्रदर्शनार्थमितरेतरयोगद्वन्द्वः । यथा स्वपक्षः स्थाप्यते तथा परपक्षः प्रतिक्षेप्यः, यथा चायं प्रतिक्षिप्यते तथा स्वपक्षः स्थाप्यः, न तु सर्वत्र पारिशेष्यात् परितोषिणा भवितव्यम् ।

"मानेन पक्षप्रतिपक्षयोः क्रमात् प्रसाधनक्षेपणकेलिकर्मठौ ।
वादेऽत्र मल्लप्रतिमल्लनीतितो वदन्ति वादिप्रतिवादिनौ बुधाः"॥१।१७।

**वादिप्रतिवादिसिद्धान्ततत्त्वनदीष्णत्वधारणाबाहुश्रुत्यप्रतिभाक्षान्तिमाध्यस्थ्यैरुभयाभिमताः सभ्याः ॥ १८ ॥**

नदीष्ण इति कुशलः, प्राधान्यख्यापनार्थं वादिप्रतिवादिसिद्धान्ततत्त्वनदीष्णत्वस्य प्रथमं निर्देशः । न चैतद् बहुश्रुतत्वे सत्यवश्यं भावि, तस्यान्यथापि भावात्, अवश्यापेक्षणीयं चैतत्, इतरथा वादिप्रतिवादिप्रतिपादितसाधनदूषणेषु सिद्धान्तसिद्धत्वादिगुणानां तद्बाधितत्वादिदोषाणां चावधारयितुमशक्यत्वात् । सत्यप्येतस्मिन् धारणामन्तरेण न स्वावसरे गुणदोषावबोधकत्वमिति धारणाया अभिधानम् । कदाचिद् वादिप्रतिवादिभ्यां स्वात्मनः प्रौढताप्रसिद्धये स्वस्वसिद्धान्ताप्रतिपादितयोरपि व्याकरणादिप्रसिद्धयोः प्रसङ्गतः प्रयुक्तोद्भावितयोर्विशेषलक्षणच्युतसंस्कारादिगुणदोषयोः परिज्ञानार्थं बाहुश्रुत्योपादानम् । ताभ्यामेव स्वस्वप्रतिभयोत्प्रेक्षितयोस्तत्तद्गुणदोषयोर्निर्णयार्थं प्रतिभायाः प्रतिपादनम् । वादिप्रतिवादिनोर्मध्ये यस्य दोषोऽनुमन्यते स यदि कश्चिद् कदाचित् परुषमप्यभिदधीत, तथापि नैते सभासदः कोपपिशाचस्य प्रवेशं सहन्ते, तत्त्वावगमव्याघातप्रसङ्गादिति क्षान्तेरुक्तिः । तत्त्वं विदन्तोऽपि पक्षपातेन गुणदोषौ विपरीतावपि प्रतिपादयेयुरिति माध्यस्थ्यवचनम् । एभिः षड्भिर्गुणैरुभयोः प्रकरणात् वादिप्रतिवादिनोरभिप्रेताः सभ्या भवन्ति । सभ्या इति बहुवचनं त्रिचतुरादयोऽमी प्रायेण कर्तव्या इति ज्ञापनार्थम्, तदभावेऽपि द्वावेको वाऽसौ विधेयः ॥ १८ ॥

**वादिप्रतिवादिनोर्यथायोगं वादस्थानककथाविशेषाङ्गीकारणाऽग्रवादोत्तरवादिनिर्देशः, साधकबाधकोक्तिगुणदोषावधारणम्, यथावसरं तत्त्वप्रकाशनेन कथाविरमणम्, यथासंभवं स-**

## भायां कथाफलकथनं चैषां कर्माणि ॥ १९ ॥

यत्र स्वयमस्वीकृतप्रातिनियतवादस्थानकौ वादिप्रतिवादिनौ समुप्रतिष्ठेते, तत्र सभ्यास्तौ प्रतिनियतं वादस्थानकं सर्वानुवादेन दूष्यानुवादेन वा, वर्गपरिहारेण वा वक्तव्यमित्यादिर्योऽसौ कथाविशेषस्तं चाङ्गीकारयन्ति, अस्याग्रवादोऽस्य चोत्तरवाद इति च निर्दिशन्ति, वादिप्रतिवादिभ्यामभिहितयोः साधकबाधकयोर्गुणं दोषं चावधारयन्ति । यदैकतरेण प्रतिपादितमपि तत्त्वं मोहादभिनिवेशाद् वाऽन्यतरोऽनङ्गीकुर्वाणः कथायां न विरमति, यदा वा द्वावपि तत्त्वपराङ्मुखमुदीरयन्तौ न विरमतः, तदा तत्त्वप्रकाशनेन तौ विरमयन्ति । यथायोगं च कथायाः फलं जयपराजयादिकमुद्धोषयन्ति, तैः खलूद्धोषितं तन्निर्विवादतामवगाहते ।

"सिद्धान्तद्वयवेदिनः प्रतिभया प्रेम्णा समालिङ्गिता-
स्तत्तच्छास्त्रसमृद्धिबन्धुरधियो निष्पक्षपातोदयाः ।
क्षान्त्या धारणया च रञ्जितहृदो बाढं द्वयोः संमताः
सभ्याः शम्भुशिरोनदीशुचिशुभैर्लभ्यास्त एते बुधैः" ॥१॥१९॥

## प्रज्ञाज्ञैश्वर्यक्षमामाध्यस्थ्यसंपन्नः सभापतिः ॥२०॥

यद्यप्युक्तलक्षणानां सभ्यानां शाठ्यं न संभवति, तथापि वादिनः प्रतिवादिनो वा जिगीषोस्तत् संभवत्येवेति सभ्यानपि प्रति विप्रतिपत्तौ विधीयमानायां नाऽप्राज्ञः सभापतिस्तत्र तत्समयोचितं तथा तथा विवेक्तुमलम्, न चासौ सभ्यैरपि बोधयितुं शक्यते । स्वाधिष्ठितवसुन्धरायामस्फुरिताऽऽज्ञैश्वर्यो न स कलहं व्यपोहितुमुत्सहते, उत्पन्नकोपा हि पार्थिवा यदि न तत्फलमुपदर्शयेयुः, तदा निदर्शनमकिंचित्कराणां स्युः, इति सफले तेषां कोपे वादोपमर्द एव भवेदिति । कृतपक्षपाते च सभापतौ सभ्या अपि भीतभीता इवैकतः किल कलङ्कः, अन्यतश्चालम्बितपक्षपातः प्रतापप्रज्ञाधिपतिः सभापतिरिति 'इतस्तटमितो व्याघ्रः' इति

नयेन कामपि कक्षां दशामाविशेयुः, न पुनः परमार्थं प्रथयितुं प्रभवेयुः, इत्युक्तं प्रज्ञाऽऽज्ञैश्वर्यक्षमामाध्यस्थ्यसंपन्न इति ॥ २० ॥

## वादिसभ्याभिहितावधारणकलहव्यपोहादिकं चास्य कर्म ॥ २१ ॥

वादिभ्यां सभ्यैश्चाभिहितस्याऽर्थस्याऽवधारणम्, वादिनोः कलहव्यपोहो यो येन जीयते स तस्य शिष्य इत्यादेर्वादिप्रतिवादिभ्यां प्रतिज्ञातस्यार्थस्य कारणा, पारितोषिकवितरणादिकं च सभापतेः कर्म ।

"विवेकवाचस्पतिरुच्छ्रिताज्ञः क्षमान्वितः संहृतपक्षपातः ।
सभापतिः प्रस्तुतवादिसभ्यैरभ्यर्थ्यते वादसमर्थनार्थम्" ॥१॥२१॥

अथ जिगीषुवादे कियत्कक्षं वादिप्रतिवादिभ्यां वक्तव्यमिति निर्णेतुमाहुः—

## सजिगीषुकेऽस्मिन् यावत्सभ्यापेक्षं स्फूर्तौ वक्तव्यम् ॥ २२ ॥

सह जिगीषुणा जिगीषुभ्यां जिगीषुभिर्वा वर्तते योऽसौ तथा तस्मिन् वादे, वादिप्रतिवादिगतायाः स्वपक्षसिद्धिपरपक्षप्रतिक्षेपविषयायाः शक्तेरशक्तेश्च परीक्षणार्थं यावत् तत्रभवन्तः सभ्याः किलाऽपेक्षन्ते, तावत् कक्षाद्वयत्रयादि स्फूर्तौ सत्यां वादिप्रतिवादिभ्यां वक्तव्यम्। ते च वाच्यौचित्यपरतन्त्रतया कदाचित् कचित् कियदप्यपेक्षन्ते इति नास्ति कश्चित् कक्षानियमः। इह हि जिगीषुतरतया यः कश्चिद् विपश्चित् प्रागेव पराक्षेपपुरःसरं वादसङ्ग्रामसीम्नि प्रवर्तते, तस्य स्वयमेव वादविशेषपरिग्रहे, तदपरिग्रहे सभ्यैस्तत्समर्पणे वाऽग्रवादेऽधिकारः। तेन सभ्यसभापतिसमक्षमक्षोभेण प्रतिवादिनमुद्दिश्याऽवश्यं स्वसिद्धान्तबुद्धिवैभवानुसारितया साधु साधनं स्वपक्षसिद्धयेऽभिधानीयम्। अथ क्षोभादेः कुतोऽपि प्रागेवाऽसौ वक्तुमशक्तो भवेत्, तदानीं दूरीकृतसमस्तमत्सरविकारैः सभासारैरुभयोरपि वस्तुव्यवस्थापनदूषणशक्तिपरी-

क्षणार्थं तदितरस्याग्रवादेऽभिषेकः कार्यः । अथ वादिनस्तूष्णीम्भावादेव पराजितत्वेन कथापरिसमाप्तेः किमितरस्याग्रवादाभिषेकेण ?, इति चेत् । स्यादेतत्, यदि प्रतिवादिनोऽपि पक्षो न भवेत्, सति तु तस्मिन् वादीव तमसमर्थयमानोऽसौ न जयति, नापि जीयते, प्रौढिप्रदर्शनार्थं तु तद्गृहीतमुक्तमग्रवादमङ्गीकुर्वाणः श्लाघ्यो भवेत् । उभावप्यनङ्गीकुर्वाणौ तु भङ्ग्यन्तरेण वादमेव निराकुरुत इति तयोः सभ्यैः सभाबहिर्भाव एवाऽऽदेष्टव्यः । तत्र वादी स्वपक्षविधिमुखेन वा, परपक्षप्रतिषेधमुखेन वा साधनमभिदधीत, यथा—जीवच्छरीरं सात्मकं प्राणादिमत्त्वान्यथानुपपत्तेरिति, नेदं निरात्मकं तत एवेति । अत्र च यद्यप्यर्थान्तराद्यभिधानेऽपि वस्तुनः साधनदूषणयोरसंभवाद् न कथोपरमः, तथापि परार्थानुमाने वक्तुर्गुणदोषा अपि परीक्ष्यन्त इति न्यायात् स्वात्मनोऽश्लाघ्यत्वविघाताय यावदेवावदातं तावदेवाभिधातव्यम् । अन्यथा शब्दानित्यत्वं साधयितुकामस्य 'प्रागेव नाभिप्रदेशात् प्रयत्नप्रेरितो वायुः प्राणो नामोर्ध्वमाक्रामन्नुरःप्रभृतीनां स्थानानामन्यतस्मिन् स्थाने प्रयत्नेन विधार्यते, स विधार्यमाणः स्थानमभिहन्ति, तस्मात् स्थानाद् ध्वनिरुत्पद्यते ' इत्यादिशिक्षासूत्रोपदिष्टशब्दोत्पत्तिस्थानादिनिरूपणां कर्णकोटरप्रवेशप्रक्रियां च प्रकाश्य य एवंविधः शब्दः सोऽनित्यः कृतकत्वादिति हेतुमुपन्यस्य पुनः पटकुटादिदृष्टान्तमुत्पत्त्यादिमुखेन वर्णयतः प्रथमकक्षैव न समाप्येत, कुतः प्रतिवादिनोऽवकाशः ? । किञ्च, परप्रतिपत्तये वचनमुच्चार्यत इति यावदेव परेणाऽऽकाङ्क्षितम्, तावदेव युक्तं वक्तुम् । लोकेऽपि वादिनोः करणावतीर्णयोरेकः स्वकीयकुलादिवर्णनां कुर्वाणः पराक्रियते, प्रकृतानुगतमेवोच्यतामिति चानुशिष्यते । किं पुनस्तदवदातम् ? इति चेत्, यस्मिन्नभिहिते न भवति मनागपि सचेतसां चेतसि क्लेशलेशः, एते हि महात्मानो निष्प्रतिमप्रतिभाप्रेयसीपरिशीलनसुकुमारहृदयाः स्वल्पेनाप्यर्थान्तरादिसंकीर्तनेन प्रकृतार्थप्रतिपत्तौ विघ्नायमानेन न नाम न क्लिश्यन्ति । तेन स्वस्वदर्शनानु-

सारेण साधनं दूषणं चाऽर्थान्तरन्यूनक्लिष्टतादिदोषाऽकलुषितं वक्तव्यम्। तत्रार्थान्तरं प्रागेवाऽभ्यधायि। न्यूनं तु नैयायिकस्य चतुरवयवाद्यनुमानमुपन्यस्यतः। क्लिष्टं यथा—यत् कृतकं, कृतकश्चायं, यथा घटः, तस्मादनित्यस्तत्तदनित्यम्, कृतकत्वाच्छब्दोऽनित्य इत्यादि व्यवहितसंबन्धम्। नेयार्थं यथा—शब्दोऽनित्यो द्विकत्वादिति, द्वौ ककारौ यत्रेति द्विकशब्देन कृतकशब्दो लक्ष्यते, तेन कृतकत्वादित्यर्थः। व्याकरणसंस्कारहीनं यथा—शब्दोऽनित्यः कृतकत्वस्मादिति। असमर्थं यथा—अयं हेतुर्न स्वसाध्यगमक इत्यर्थेनाऽसौ स्वसाध्यघातक इति। अश्लीलं यथा—नोदनार्थे चकारादिपदम्। निरर्थकं यथा—शब्दो वै अनित्यः कृतकत्वात् खल्विति। अपरामृष्टविधेयांशं यथा—अनित्यशब्दः कृतकत्वादिति, अत्र हि शब्दस्याऽनित्यत्वं साध्यं प्राधान्यात् पृथग् निर्देश्यम्, न तु समासे गुणीभावकालुष्यकलङ्कितमिति। पृथग्निर्देशेऽपि पूर्वमनुवाद्यस्य शब्दस्य निर्देशः शस्यतरः, समानाधिकरणतायां तदनुविधेयस्यानित्यत्वस्याऽलब्धास्पदस्य तस्य विधातुमशक्यत्वादित्यादि। तदेवमादि वदन् वादी समाक्षिप्यते नियतमश्लाघ्यतया। प्रतिवादिना तु स्वस्यानुषङ्गिकश्लाघ्यत्वसिद्धये तत्प्रकाश्य साधनदूषणे यत्नवता भाव्यम्, न तु तावतैव स्वात्मनि विजयश्रीपरिरम्भः संभावनीयः। प्रकटिततीर्थान्तरीयकलङ्कोऽकलङ्कोऽपि प्राह—वादन्याये दोषमात्रेण यदि पराजयप्राप्तिः पुनरुक्तवच्छ्रुतिदुष्टार्थदुष्टकल्पनादुष्टादयोऽलङ्कारदोषाः पराजयाय कल्पेरन्निति। ननु वादी साधनमभिधाय कण्टकोद्धारं कुर्वीत वा, न वा?, कामचार इत्याचक्ष्महे। तत्राऽकरणे तावद् न गुणो न दोषः। तथाहि—स्वप्रौढेरप्रदर्शनाद् न गुणः, परानुद्भावितस्यैव दूषणस्यानुद्धाराच्च न दोषः; उद्भावितं हि दूषणमनुद्धरन् दुष्येत। अथ कथं न दोषः?, यतः सत्यपि हेतोः सामर्थ्ये तदप्रतिपादनात् संदेहे प्रारब्धासिद्धिः, इत्यवश्यकरणीयं दूषणोद्धरणमिति चेत्। कस्यायं सन्देहः? वादिनः, प्रतिवा-

१ चोदनमित्यर्थः।

दिनः, सभ्यानां वा । न तावद् वादिनः; तस्यासत्यपि सामर्थ्ये तन्निर्णयाभिमानेनैव प्रवृत्तेः, किं पुनः सति प्रतिवादिसभ्यसंदेहापोहाय तु सामर्थ्यं प्रमाणेनैव प्रदर्शनीयम् ? । तत्रापि प्रमाणान्तरेण सामर्थ्याप्रदर्शने संदेहः, प्रदर्शने तु तत्रापि प्रमाणान्तरेण तत्प्रदर्शनेनाऽनवस्था । अथ यथा स्वार्थानुमाने हेतोः साध्यमध्यवसीयते, हेतोश्च प्रत्यक्षादिभिः प्रतिपत्तिः, न चाऽनवस्था, तथा परार्थानुमानेऽपीति चेत्, तर्हि यथा प्रत्यक्षादेः कस्यचिदभ्यासदशायां स्वतःसिद्धप्रमाणतयाऽनपेक्षितसामर्थ्यप्रदर्शनस्यापि गमकत्वम्, एवमन्ततो गत्वा कस्यचित् परार्थानुमानस्यापि तथैव तदवश्यमभ्युपेयम्; इति गतं सामर्थ्यप्रदर्शननियमेन । अथ यत्रानभ्यासदशायां परतः प्रामाण्यसिद्धिः, तत्र तत्प्रदर्शनीयमेवेति चेत्, यदि न प्रदर्श्यते किं स्यात् ?, ननूक्तमेव—संदेहात् प्रारब्धासिद्धिः, इति चेत् । तर्हि यथा सदपि सामर्थ्यमप्रदर्शितं न प्रतिवादिना प्रतीयते, तद्वत् संदेहोऽपि प्रतिवादिगतोऽप्रदर्शितः कथं वादिना प्रतीयेत ? । स्वबुद्ध्योत्प्रेक्ष्यत इति चेत्, इतरेणापि यदि तत्सामर्थ्यं स्वबुद्ध्यैवोत्प्रेक्ष्यत, तदा किं क्षूणं स्यात् ? । अथ वादिनः साधनसमर्थनशक्तिं परीक्षितुं न तदुत्प्रेक्ष्यते, तर्हि प्रतिवादिनो दूषणशक्तिं परीक्षितुमितरेणापि न संदेहः स्वयमुत्प्रेक्ष्यते । अथ द्वितीयकक्षायां दूषणान्तरवत् संदेहमपि प्रदर्शयन् स्फोरयत्येव दूषणशक्तिं प्रतिवादी, इति चेत् । तर्हि वाद्यपि तृतीयकक्षायां दूषणान्तरवत् संदेहमपि व्यपोहमानः किं न समर्थनशक्तिं व्यक्तीकरोति ? । किञ्च, केनचित् प्रकारेण सामर्थ्यप्रदर्शनात् कस्यचित् संदेहस्यापोहेऽपि तस्य प्रकारान्तरेण संभवतोऽनपोहे कथं प्रारब्धसिद्धिः ?; विप्रतिपत्तेरिव संदेहस्यापि ह्यपरिमिताः प्रकाराः, इति कियन्तस्ते स्वयमेवाशङ्क्याऽऽशङ्क्य शक्याः पराकर्तुम् ? । न च प्रदर्शितेऽपि सामर्थ्ये स्वपक्षैकपक्षपातिनोऽस्य विश्रम्भः संभवति, येन प्रारब्धमवबुध्येत । दृश्यन्ते हि साधनमिव तत्समर्थनमपि कदर्थयन्तः प्रतिवादिनः, इति साधनमभिधाय

सामर्थ्याऽप्रदर्शनेऽपि दोषाभावात् स्थितमेतदकरणे न गुणो न दोष इति । करणे तु यदेव संदेहस्य विवादस्य वा भवेदास्पदम्, तस्यैवोद्धारं कुर्वाणः समलंक्रियते प्रौढतागुणेन, यदुद्धरेत् तत्संदिग्धमेव विवादापन्नमेव चोद्धरेदित्येवमवधार्यते, न तु यावत् संदिग्धं विवादापन्नं वा तावत् सर्वमुद्धरेदेव; असंख्याता हि सन्देहविवादयोर्भेदाः, कस्तान् कार्त्स्न्येन ज्ञातुं निराकर्तुं वा शक्नुयात्? । इति यावत्तेभ्यः प्रसिद्धिः प्रतिभा वा भगवती प्रदर्शयति, तावदुद्धरणीयम्, तदधिकोद्धारकरणे तु कदर्थ्यते सिद्धसाधनाभिधानादिदोषेण । सिद्धमपि साधयंश्च कदा नामायं वावदूको विरमेदिति सत्यं व्याकुलाः स्मः, एकेन प्रमाणेन समर्थितस्यापि हेतोः पुनः समर्थनाय प्रमाणान्तरोपन्यासप्रसङ्गात्, साध्यादेरप्येवम्, इति न काञ्चिदमुष्य सीमानमालोकयामः । तेन सिद्धस्य समर्थनमनर्थकत्वाद् न कर्तव्यम् । 'सिद्धसाध्यसमुच्चारणे सिद्धं साध्यायोपदिश्यते' इति न्यायात् साध्यसिद्धये त्वभिधानस्यावश्यमुपेयम्, अपरथा ह्यसिद्धमासिद्धेन साधयतः किं नाम न सिद्ध्येत्? । यत्र तु सिद्धत्वेनोपन्यस्तस्यापि सिद्धत्वं संदिग्धं विवादाधिरूढं वा भवेत्, तत्र तत्समर्थनं सार्थकमेव । ततः स्थितमेतद् यो यत् सिद्धमभ्युपैति, तं प्रति न तत्साधनीयमिति । **बौद्धो** हि **मीमांसकं** प्रत्यनित्यः शब्दः सत्त्वात्, इत्यभिधायोभयसिद्धस्यार्थक्रियाकारित्वरूपस्य सत्त्वस्यासिद्धत्वमुद्धरन् न कमप्यर्थं पुष्णाति, केवलं सिद्धमेवार्थं समर्थयमानो न सचेतसामादरास्पदम् । अनैकान्तिकत्वं पुनराशङ्क्योद्धरन्नधिरोपयति सरसे सभ्यचेतसि स्वप्रौढिवल्लरीम् । तदिह यथा—कश्चित् चिकित्सकः कुतश्चित् पूर्वरूपादेः संभाव्यमानोत्पत्तिं दोषं चिकित्सति, अन्यः कश्चिदुत्पन्नमेव, कश्चित्त्वसंभाव्यमानोत्पत्तितयाऽनुत्पन्नतया च निश्चिताभावम्, इत्येते त्रयोऽपि यथोत्तरमुत्तममध्यमाधमाः तद्वद्वाद्यप्येकः कथञ्चिदाशङ्क्यमानोद्भावनं दोषं समुद्धरति, अपरः परोद्भावितम्, अन्यस्त्वनाशङ्क्यमानोद्भावन-

मनुद्भावितं चेति, एतेऽपि त्रयो यथोत्तरमुत्तममध्यमाधमा इति परमार्थः ।

"स्वपक्षसिद्धये वादी साधनं प्रागुदीरयेत् ।
यदि प्रौढिः प्रिया तत्र, दोषानपि तदुद्धरेत्" ॥ १ ॥

इति संग्रहश्लोकः ।

द्वितीयकक्षायां तु प्रतिवादिना स्वात्मनो निर्दोषत्वसिद्धये वादिवदवदातमेव वक्तव्यम् । द्वयं च विधेयम्—परपक्षप्रतिक्षेपः, स्वपक्षसिद्धिश्च । तत्र कदाचिद् द्वयमप्येतदेकेनैव प्रयत्नेन निर्वर्त्यते, यथा—नित्यः शब्दः कृतकत्वात्, इत्यादौ विरुद्धोद्भावने, परप्रहरणेनैव परप्राणव्यपरोपणात्मरक्षणप्रायं चैतत् प्रौढतारूपप्रियसखीसमन्वितामेव विजयश्रियमनुषञ्जयति । असिद्धताद्युद्भावने तु स्वपक्षसिद्धये साधनान्तरमनित्यः शब्दः सत्त्वादित्युपाददानः केवलामेव तामवलम्बते । तदप्यनुपाददानस्त्वसिद्धताद्युद्भावनमूतं श्लाघ्यतामात्रमेव प्राप्नोति, न तु प्रियतमां विजयश्रियम् ; यदुदयनोऽप्युपादिशत्—वादिवचनार्थमवगम्याऽनूद्य दूषयित्वा प्रतिवादी स्वपक्षे स्थापनां प्रयुञ्जीत, अप्रयुञ्जानस्तु दूषितपरपक्षोऽपि न विजयी, श्लाघ्यस्तु स्यात्, आत्मानमरक्षन् परघातीव वीर इति । तद्यदीच्छेत् प्रौढतान्वितां विजयश्रियम्, तत्राऽप्रयत्नोपनतां तयोः प्राणभूतां हेतोर्विरुद्धतामवधीरयेत्, निपुणतरमन्विष्य सति संभवे तामेव प्रसाधयेत् । न च विरुद्धत्वमुद्भाव्य स्वपक्षसिद्धये साधनान्तरमभिदधीत, व्यर्थत्वस्य प्रसक्तेः । एवं तृतीयकक्षास्थितेन वादिना विरुद्धत्वे परिहृते चतुर्थकक्षायामपि प्रतिवादी तत्परिहारोद्धारमेव विदधीत, न तु दूषणान्तरमुद्भाव्य स्वपक्षं साधयेत्, कथाविरामाभावप्रसङ्गात् । नित्यः शब्दः कृतकत्वात्, इत्यादौ हि कृतकत्वस्य विरुद्धत्वमुद्भावयता प्रतिवादिना नियतं तस्यैवाऽनित्यत्वसिद्धौ साधनत्वमध्यवसितम्, अत एव न तदाऽसौ साधनान्तरमारचयति । स चे-

द्यं चतुर्थकक्षायां तत्परिहारोद्धारमनवधारयन् प्रकारान्तरेण परपक्षं प्रतिक्षिपेत् ; स्वपक्षं च साधयेत् , तदानीं वादिना तद्दूषणे कृते स पुनरन्यथा समर्थयेत् ; इत्येवमनवस्था । किञ्च, एवं चेत् प्रतिवादी विरुद्धत्वोद्भावनमुखेनाऽनित्यत्वसिद्धौ स्वीकृतमपि कृतकत्वं हेतुं परिहृत्य सत्त्वादिरूपं हेत्वन्तरमुररीकुर्यात् , तदा वाद्यपि नित्यत्वसिद्धौ तमुपात्तं परित्यज्य प्रत्यभिज्ञायमानत्वादि साधनान्तरमभिदधानः कथं वार्येत ?, अनिवारणे तु सैवानवस्था सुस्थायते । तदिदमिह रहस्यम्—उपक्रान्तं साधनं दूषणं वा परित्यज्य नापरं तदुदीरयेदिति । विरुद्धत्वोद्भावनवत् प्रत्यक्षेण पक्षबाधोद्भावनेऽप्येकप्रयत्ननिर्वर्त्ये एव परपक्षप्रतिक्षेपस्वपक्षसिद्धी । कदाचिद् भिन्नप्रयत्ननिर्वर्त्ये एते संभवतः, तत्र चायमेव क्रमः—प्रथमं परपक्षप्रतिक्षेपः, तदनु स्वपक्षसिद्धिरिति । यथा—नित्यः शब्दश्चाक्षुषत्वात् , प्रमेयत्वाद् वा ; इत्युक्तेऽसिद्धत्वानैकान्तिकत्वाभ्यां परपक्षं प्रतिक्षिपेत् , अनित्यः शब्दः कृतकत्वात् , इत्यादिना च प्रमाणेन स्वपक्षं साधयेत् । ननु न परं निगृह्य स्वपक्षसिद्धये साधनमभिधानार्हम् , पराजितेन सार्धं विवादाभावात् ; न खलु लोकेऽपि कृतान्तवक्त्रान्तरसंचारिणा सह रणो दृष्टः श्रुतो वेति । तत् किमिदानीं द्वयोर्जिगीषतोः क्वचिद्देशे राज्याभिषेकाय स्वीकृतविभिन्नराजबीजयोरेकश्चेदन्यतरं निहन्यात् , तदा स्वीकृतं राजबीजं न तत्राभिषिञ्चेत् ?, तदर्थमेव ह्यसौ परं निहतवान् । अकलङ्कोऽप्यभ्यधात्—

" विरुद्धं हेतुमुद्भाव्य वादिनं जयतीतरः ।
आभासान्तरमुद्भाव्य पक्षसिद्धिमपेक्षते" ॥ १ ॥ इति ।

परपक्षं च दूषयन् यावता दोषविषयः प्रतीयते, तावदनुवदेत् , निराश्रयस्य दोषस्य प्रत्येतुमशक्यत्वात् । न च सर्वं दोषविषयमेकदैवाऽनुवदेत् ; एवं हि युगपद् दोषाभिधानस्य कर्तुमशक्यत्वात् , क्रमेण दोषवचने कार्ये । ततो निर्धार्य पुनः प्रकृतदोषविषयः प्रदर्शनीयः,

अप्रदर्शिते तस्मिन् दोषस्य वक्तुमशक्यत्वात्, तथा च द्विरनुवादः स्यात्, तत्र च प्राक्तनं सर्वानुभाषणं व्यर्थमेव भवेदिति । अनुवादश्चाऽनित्यः शब्दः कृतकत्वादित्युक्ते कृतकत्वादित्यसिद्धो हेतुः, कृतकत्वमसिद्धम्, असिद्धोऽयं हेतुरित्येवमादिभिः प्रकारैरनेकधा संभवति । अथ दूषणमेकमनेकं वा कीर्तयेत्, किमत्र तत्त्वम्? । पर्षदजिज्ञासायामेकमेव, तस्मादेव परपक्षप्रतिक्षेपस्य सिद्धेर्द्वितीयादिदोषाभिधानस्य वैयर्थ्यात्, तज्जिज्ञासायां च संभवे यावत्स्फूर्त्यनेकमपि प्रौढिप्रसिद्धेः, इति ब्रूमः ।

" दूषणं परपक्षस्य स्वपक्षस्य च साधनम् ।
प्रतिवादी द्वयं कुर्याद् भिन्नाभिन्नप्रयत्नतः " ॥ १ ॥

इति संग्रहश्लोकः ।

तृतीयकक्षायां तु वादी द्वितीयकक्षास्थितप्रतिवादिप्रदर्शितदूषणमदूषणं कुर्यात्, अप्रमाणयेच्च प्रमाणम्, अनयोरन्यतरस्यैव करणे वादाभासप्रसङ्गात् । उदयनोऽप्याह—नापि प्रतिपक्षसाधनमनिर्वर्त्य प्रथमस्य साधनत्वावस्थितिः, शङ्कितप्रतिपक्षत्वादिति; अदूषयंस्तु रक्षितस्वपक्षोऽपि न विजयी, श्लाघ्यस्तु स्याद्, वञ्चितपरप्रहार इव तमप्रहरमाण इति चेति । न च प्रथमं प्रमाणं दूषितत्वात् परित्यज्य परोदीरितं च प्रमाणं दूषयित्वा स्वपक्षसिद्धये प्रमाणान्तरमाद्रियेत, कथाविरामाभावप्रसङ्गादित्युक्तमेव । अत एव स्वसाधनस्य दूषणानुद्धारे परसाधने विरुद्धत्वोद्भावनेऽपि न जयव्यवस्था; तदुद्धारे तु तदुद्भावनं सुतरां विजयायेति को नाम नानुमन्यते? । सोऽयं सर्वविजयेभ्यः श्लाघ्यते विजयो यत्परोऽङ्गीकृतपक्षं परित्याज्य स्वपक्षाराधनं कार्यत इति । वादी तृतीयकक्षायां प्रतिवादिप्रदर्शितं दूषणं दूषयेत्, पूर्वं प्रमाणं चाप्रमाणयेदिति । एवं चतुर्थपञ्चमकक्षादावपि स्वयमेव विचारणीयम् ॥ २२ ॥

अथ तत्त्वनिर्णिनीषुवादे कियत्कक्षं वादिप्रतिवादिभ्यां वक्तव्यमिति निर्णेतमाहुः—

## उभयोस्तत्त्वनिर्णिनीषुत्वे यावत् तत्त्वनिर्णयं यावत्स्फूर्ति च वाच्यम् ॥ २३ ॥

एकः स्वात्मनि तत्त्वनिर्णिनीषुः; परश्च परत्र, द्वौ वा परस्परम्, इत्येवं द्वावपि यदा तत्त्वनिर्णिनीषू भवतस्तदा यावता तत्त्वस्य निर्णयो भवति, तावत् ताभ्यां स्फूर्तौ सत्यां वक्तव्यम्; अनिर्णये वा यावत् स्फुरति तावद् वक्तव्यम् । एवं च स्थितमेतत्—

स्वं स्वं दर्शनमाश्रित्य सम्यक् साधनदूषणैः ।
जिगीषोर्निर्णिनीषोर्वा वाद एकः कथा भवेत् ॥ १ ॥
भङ्गः कथात्रयस्याऽत्र निग्रहस्थाननिर्णयः ।
श्रीमद्रत्नाकरग्रन्थाद् धीधनैरवधार्यताम् ॥ २ ॥

यतः—

प्रमेयरत्नकोटीभिः पूर्णो रत्नाकरो महान् ।
तत्रावतारमात्रेण वृत्तेरस्याः कृतार्थता ॥ ३ ॥
प्रमाणे च प्रमेये च बालानां बुद्धिसिद्धये ।
किञ्चिद् वचनचातुर्यचापलाधेयमादधे ॥ १ ॥
न्यायमार्गादतिक्रान्तं किञ्चिदत्र मतिभ्रमात् ।
यदुक्तं, तार्किकैः शोध्यं तत् कुर्वाणैः कृपां मयि ॥ २ ॥

आशावासःसमयसमिधां संचयैश्चीयमाने
स्त्रीनिर्वाणोचितशुचिवचश्चातुरीचित्रभानौ ।
प्राजापत्यं प्रथयति तथा सिद्धराजे जयश्री-
र्यस्योद्वाहं व्यधित स सदा नन्दताद् देवसूरिः ॥ ३ ॥
प्रज्ञातः पदवेदिभिः स्फुटदृशा संभावितस्तार्किकैः
कुर्वाणः प्रमदाद् महाकविकथां सिद्धान्तमार्गाध्वगः ।

दुर्वादिकुञ्जरदेवसूरिचरणाम्भोजद्वयीषट्पदः
श्रीरत्नप्रभसूरिरल्पतरधीरेतां व्यधाद् वृत्तिकाम् ॥ ५ ॥
वृत्तिः पञ्च सहस्राणि येनेयं परिपठ्यते ।
भारती भारती चाऽस्य प्रसर्पन्ति प्रजल्पतः ॥ ६ ॥

इति प्रमाणनयतत्त्वालोकालङ्कारे श्रीरत्नप्रभाचार्यविरचितायां
रत्नाकरावतारिकाख्यलघुटीकायां वादस्वरूपनिर्णयो
नामाष्टमः परिच्छेदः ।



શ્રી જિનશાસન જય હો !!!
॥ શ્રી ગૌતમસ્વામીને નમઃ ॥ ॥ શ્રી સુધર્માસ્વામીને નમઃ ॥

જિનશાસનના અણગાર, કલિકાલના શણગાર પૂજ્ય ભગવંતો અને જ્ઞાની પંડિતોએ શ્રુતભક્તિથી પ્રેરાઈને વિવિધ હસ્તલિખિત ગ્રંથો પરથી સંશોધન-સંપાદન કરીને અપૂર્વ જહેમતથી ઘણા ગ્રંથોનું વર્ષો પૂર્વે સર્જન કરેલ છે અને પોતાની શક્તિ, સમય અને દ્રવ્યનો સદ્‌વ્યય કરીને પુણ્યાનુબંધી પુણ્ય ઉપાર્જન કરેલ છે. કાળના પ્રભાવે જીર્ણ અને લુપ્ત થઈ રહેલા અને અલભ્ય બની જતા મુદ્રિત ગ્રંથો પૈકી પૂજ્ય ગુરુદેવોની પ્રેરણા અને આશીર્વાદથી સં.૨૦૬૫માં ૫૪ ગ્રંથોનો સેટ નં-૧ તથા સં.૨૦૬૬માં ૩૬ ગ્રંથોનો સેટ નં-૨ સ્કેન કરાવીને મર્યાદિત નકલ પ્રીન્ટ કરાવી હતી. જેથી આપણો શ્રુતવારસો બીજા અનેક વર્ષો સુધી ટકી રહે અને અભ્યાસુ મહાત્માઓને ઉપયોગી ગ્રંથો સરળતાથી ઉપલબ્ધ થાય.

પૂજ્ય સાધુ-સાધ્વીજી ભગવંતોની પ્રેરણાથી જ્ઞાનખાતાની ઉપજમાંથી તૈયાર કરવામાં આવેલ પુસ્તકોનો સેટ ભિન્ન-ભિન્ન શહેરોમાં આવેલ વિશિષ્ટ ઉત્તમ જ્ઞાનભંડારોને ભેટ મોકલવામાં આવ્યા હતા. આ બધાજ પુસ્તકો પૂજ્ય ગુરુભગવંતોને વિશિષ્ટ અભ્યાસ-સંશોધન માટે ખુબજ જરુરી છે અને પ્રાયઃ અપ્રાપ્ય છે. અભ્યાસ-સંશોધનાર્થે જરૂરી પુસ્તકો સહેલાઈથી ઉપલબ્ધ બને તેમજ પ્રાચીન મુદ્રિત પુસ્તકોનો શ્રુત વારસો જળવાઈ રહે તે શુભ આશયથી આ ગ્રંથોનો જીર્ણોદ્ધાર કરેલ છે. જુદા જુદા વિષયોના વિશિષ્ટ કક્ષાના પુસ્તકોનો જીર્ણોદ્ધાર પૂજ્ય ગુરૂભગવંતોની પ્રેરણા અને આશીર્વાદથી અમો કરી રહ્યા છીએ. તો અભ્યાસ તથા સંશોધન માટે વધુમાં વધુ ઉપયોગ કરીને શ્રુતભક્તિના કાર્યને પ્રોત્સાહન આપશો.

લી.શાહ બાબુલાલ સરેમલ બેડાવાળાની વંદના

**મંદિરો જીર્ણ થતાં આજકાલના સોમપુરા દ્વારા પણ ઊભા કરી શકાશે.....!**
**પણ એકાદ ગ્રંથ નષ્ટ થતા બીજા કલિકાલસર્વજ્ઞ કે**
**મહોપાધ્યાય શ્રી યશોવિજયજી ક્યાંથી લાવીશું...???**